[अहं खलु प्रत्यर्थिराजाभिषेणनसंनाहं कस्यापि पुरुषस्य मुखाच्छ्रुतवता राज्ञा 'इमं वृत्तान्तं पुरं प्रविश्य जानीहि' इति प्रेषितास्मि । मयापि तापसीवेषया तथा ज्ञात्वा राज्ञः समीपे समागम्यते । एष विज्ञानशर्मा अमात्य आगच्छति । भवतु । वेषेण प्रतारयाम्येनम् । यद्यपि सर्वस्मिन्नपि कार्येऽस्यानुमतिं विना राजा न प्रवर्तते तथापि यन्मम संशयो वर्तते तदेककस्य प्रकाशो न भवेत् ।]

पङ्क्ती इति द्विवचनान्तत्वमपि संपद्यते । रदच्छदः-अधरः । चुबुकं-हनुः । (चिबुकमिति विपुलो व्यवहारः ।) मन्दहासः-ललितं स्मितं च । धारणायां-परिचितपूर्वायां जीवस्य परिजनभूतायां स्त्रियामिव । ईक्ष्यते-परिदृश्यते । अस्यास्तापस्या मुखलक्षणानीङ्गितानि च विलक्षणानि तान्येव धारणायाः परिचितचरायाः संवदन्तीवेति भावः ॥ २१ ॥

धारणेति ।—धारणा नाम मनस एकाग्रता । "यमादिगुणसंयुक्ते मनसः स्थितिरात्मनि । धारणा प्रोच्यते सद्भिः योगशास्त्रविशारदैः ॥" इति वसिष्ठः । "ध्येये चित्तस्य स्थिरबन्धनम् धारणा" इति हेमचन्द्रः । अहं खु रण्णा पेसिदह्मि (अहं खलु राज्ञा प्रेषितास्मि) इत्यन्वयः । प्रत्यर्थी चासौ राजा च प्रत्यर्थिराजः-शत्रुनृपतिः, तस्य अभिषेणनसंनाहं-समराय सज्जीकृतया सेनया सहाभियोगरूपं समुद्यमम् । "यत्सेनयाभिगमनमरौ तदभिषेणनम्" इत्यमरः । कस्यापि पुरुषस्य मुखाच्छ्रुतवतेति

मन्त्री—(दृष्ट्वा स्वगतम्) इयं तापसी राजप्रहिता प्रच्छन्ना किं धारणा भवेत्। भवतु, पृच्छामि। (प्रकाशम्) अये तापसि, का त्वम्। कुत आगच्छसि।

धारणा—(स्वगतम्) इमस्स पडिवअणं भासन्तरेण भणेमि। अण्णहा कहं वि जाणिस्सदि इअं सेति।

[अस्य प्रतिवचनं भाषान्तरेण भणामि। अन्यथा कथमपि ज्ञास्यति इयं सेति।]

(प्रकाशम्) अहं खलु गार्गी यक्ष्मणो राज्ञो वयस्या, देव्या गृहिण्याः स्नेहसर्वस्वभाजनं तदन्तःपुरादेवागच्छामि।

मन्त्री—(स्वगतम्) भवेदेवेयं धारणा। तापसीवेषेण रिपुप्रवृत्तिमुपलभ्यागतवती। अयं स्वनामानुगुणं अभिज्ञो वा न वेति मां परीक्षितुं संस्कृतभाषया वेषानुगुणं अपलपते। प्रतिपक्षकुले च पक्षपातमात्मनः

अनेन सामान्यां किंवदन्तीमपि नैष लघुतरं मत्वा तिष्ठत्यनवहित इति व्यज्यते। **पुरमिति**। नगरस्यान्तः सर्वतो गत्वा भूतार्थं अवधारयेति राजाज्ञा। पुरमिति जीवराजस्य निवासभूतनगरात्मकं देहमपि निर्दिश्यते। "तनुस्तनूः संहननं शरीरं कलेबरं क्षेत्रवपुःपुराणि" इति राजनिघण्टुः। शरीरस्य बाह्याभ्यन्तराः सर्वेऽपि भागाः कथंचिदपि यक्ष्मप्रभृतिभी रिपुभिः न यथाभिभूताः स्युः तथा सावहिति समुद्युक्ताया धारणाया द्वारा पुरनिरीक्षणे जीवराजो जागरूकस्तिष्ठतीति वाच्यार्थो व्यङ्ग्यार्थश्च। तापसीवेषधारणं परेभ्यः स्वात्मनो गोपनार्थम्। एककस्य-कस्यचिदपि। संशयालुरहमिति न कोऽपि विदांकरोतु इति भावः। **भासन्तरेणेति**। प्राकृतेन व्यवहरन्त्या धारणायाः संस्कृतं भाषान्तरं भवति। **गार्गीति** अलीकनाम। वयस्या-सखी। **सर्वं** च तत् स्वं च सर्वस्वम्, स्नेह एव सर्वस्वम्, तस्य भाजनं-असाधारणप्रीतिपात्रम्। **रिपुप्रवृत्तिमिति**। रिपुप्रवृत्तिम्-शत्रूणां वृत्तान्तम्। स्वनामानुगुणं-विज्ञानशर्मेति नाम्नोऽनु-

सूचयति । भवतु । अहमपि अजानन्निव अनुनयन् पृच्छाम्येनाम् । (प्रकाशम्) अये तापसि,

निखिलं जगतश्चरितं विज्ञातं ते समाधिनैव भवेत् ।
तन्मे महाप्रभावा भाग्येनासादिता भवती ॥ २२ ॥

धारणा—(स्वगतम्) मं तावसिं एव्व जाणिअ मह मुहादो पच्चत्थिराअप्पउत्तिं सुणिदुं अणुणअप्पआरो एसो । होदु । अहं वि अजाणन्तीव पुच्छामि । [मां तापसीमेव ज्ञात्वा मम मुखात् प्रत्यर्थिराजप्रवृत्तिं श्रोतुं अनुनयप्रकार एषः । भवतु । अहमप्यजानतीव पृच्छामि ।] (प्रकाशम्) कस्त्वम् । क्व गच्छसि । सूनृतेन ते वचनेन साधुर्भवानिति पृच्छामि ।

मन्त्री—(स्वगतम्) इयमात्मानं गोपयति । अहमपि तथैवोत्तरयामि । (प्रकाशम्) कार्यविशेषेऽधिकृतं जानीहि । येनैवमधिकृतस्तन्निकटे गच्छामि ।

रूपं यथा तथा । संस्कृतभाषयेति । अपलपते-वस्तुतत्त्वं निगूहते । "अपलापस्तु निह्नवः" इत्यमरः । (भाषान्तरं वेषानुगुणमवलम्बत इति पाठान्तरम् ।)

निखिलमिति । समाधिना-ध्यानकर्मणैव । "मनसा ध्याननिष्पाद्यं समाधिः सोऽभिधीयते" इति तल्लक्षणम् । जगतो निखिलं चरितम्-अशेषश्च वृत्तान्तः । ते-तव । विज्ञातं भवेत् । तत्-तस्मात् । महाप्रभावा भवती मे भाग्येन आसादिता-प्राप्ता । धारणायाश्च तादृशी शक्तिः स्वतस्सिद्धेति भावगर्भितमिदं विशेषणम् ॥ २२ ॥

सूनृतेनेति । सूनृतेन-प्रियेण । कार्यविशेष इति । कार्यविशेषे-विशिष्टे राजकार्ये । अधिकृतं-अधिकारित्वेन नियुक्तम् । मामिति शेषः ।

धारणा—(स्वगतम्) एसा विपक्खजणपक्खवादिणित्ति गोपणप्पआरो एसो। [एषा विपक्षजनपक्षपातिनीति गोपनप्रकार एषः।] (प्रकाशम्) केनाभिकृतोऽसि।

मन्त्री—भगवति, त्वमेव जानासि। यतः प्रणिधानेन योगिनः सकलमपि प्रत्यक्षयन्ति।

धारणा—(स्वगतम्) कहं एदं आपडिदम्। होदु। जोइणी विअ आसिअं करिअ अमच्चं वञ्चेमि। (इति ध्यानारूढा तिष्ठति।)

[कथमेतदापतितम्। भवतु। योगिन इवासिकां कृत्वा अमात्यं वञ्चयामि।]

मन्त्री—(स्वगतम्) एषा खलु—

> कृत्वा स्वस्तिकमासनं करयुगं विन्यस्य जानुद्वये
> नासाग्रार्पिततारका नतमृजूकृत्यावलग्नं दृढम्।
> निश्वासोच्छ्वसितोपरोधघटितस्तैमित्यपीनस्तनी
> चित्ते मे कृतसंयमेव कुरुते धूर्ता महत् कौतुकम्॥ २३॥

यत इति। प्रणिधानेन-ध्यानेन। प्रत्यक्षयन्ति-प्रत्यक्षं कुर्वन्ति।

जोइणी विअ इति स्वयं धारणया मन्त्रिणापि छद्मयोगिनीत्वं अमुया ज्ञातत्वात् योगिन इवेति इवशब्दः प्रयुक्तः। आसिकां-उपवेशम्।

कृत्वेति। स्वस्तिकं-तन्नाम्ना प्रसिद्धम्। आसनम्। योगिनः निदिध्यासनावसरे निषीदन्ति पञ्चसु पद्म-स्वस्तिक-भद्र-वज्र-वीराख्येषु आसनेषु अन्यतममाश्रित्य। तेषु स्वस्तिकमत्र गृहीतम्। तल्लक्षणं तु—"जानूर्वोरन्तरे सम्यक् कृत्वा पादतले उभे। ऋजुकायो विशेद्योगी स्वस्तिकं तत् प्रकीर्त्यते॥" इति तन्त्रसारे। कृत्वा-स्वस्तिकासनेन स्थित्वेत्यर्थः। करयोः युगम् जानुद्वये विन्यस्य। नासाया अग्रं नासाग्रं तस्मिन् अर्पिते तारके यया सा; नासिकाग्रमेव पश्यन्ती। नतं-आभुग्नम्। अवलग्नं-मध्यप्रदेशम्। दृढं-बलवद्यथा तथा। ऋजूकृत्य-सम्यगुन्नमय्य। स्थित्वेति शेषः। निश्वासः-बहिर्विसृज्यमानो रेचकश्वासः.

(प्रकाशम्) परिनिष्ठितं योगाभासनं भवत्याः ।

धारणा—(आत्मानं दिश्य सस्मितम्) जीवनस्य राज्ञो मन्त्री विज्ञानशर्मा भवान् ।

मन्त्री—महाप्रभावा योगसिद्धिमती भवती । तथाहि—

बुद्ध्या महत्या कृतसाहचर्या देवे निजे दर्शितभूरिभक्तिः ।
परप्रवृत्तिं विदती महिम्ना साधारणा त्वं त्वहिते हिते च ॥ २४ ॥

उच्छूसितं-पूरणाख्य अन्तरागृह्यमाणः श्वासः, तयोः उपरोधेन-अवष्टम्भेन, घटितं-आपादितं यत् स्तैमित्यं-स्तब्धत्वम्, तेन पीने-वृद्धिते स्तने यस्याः सा । धूर्ता-वञ्चनशीला धारणा । कृत्रिमध्यानकर्मणि प्रवृत्ता योगाभासं प्रकटयतीति भावः । कृतसंयमेव-यथावद्विहितसमाधिरिव । मे चित्ते-मम मनसि । महत् कौतुकं-विशिष्य विनोदम् । कुरुते-उपजनयति ॥ २३ ॥

परिनिष्ठितमिति । योगस्य-विषयान्तरेभ्यश्चित्तवृत्तिनिरोधपूर्वकस्य ध्यानस्य, आभासनं-आसमन्तात् प्रकटनम् । योगाचरणवत् कृतकप्रकटनमिति च आन्तरोऽर्थः । परिनिष्ठितं-सम्यक् संपादितम् । कृतकध्यानकृतविषयविशेष-प्रकटनप्रवृत्तत्वात् सस्मितत्वम् । महाप्रभावेति अन्तर्विडम्बनपूर्वकं क्रियमाणा कपटप्रशंसा ।

बुद्ध्येति । महत्या-प्रकृत्या । बुद्ध्या । कृतसाहचर्या-विहितसाहाय्या । धारणायाः सर्वदा विषयाणां सविमर्शं ग्रहणार्थं बुद्धिं पुरस्कृत्यैव प्रवृत्तेः सहजत्वात् । अन्यत्र महादेव्या जीवपत्न्या बुद्ध्या च । निजे देवे-स्वाभीष्टे देवताविशेषे । अन्यत्र स्वकीये राजनि । दर्शितभूरिभक्तिः आविष्कृतासाधारणभक्तिः । महिम्ना-तपःप्रभावेण । परस्य-ईश्वरस्य, प्रवृत्तिं-विषयम्, स्वरूपमिति यावत् । अन्यत्र परप्रवृत्तिं प्रतिपक्षिणां वृत्तान्तम् । विदती-अवगतवती । त्वम् । हिते-मित्रवर्गे । अहिते-शत्रुवर्गे च । साधारणा-समानप्रवृत्तिमती । योगिन्याः पक्षपाताभावात् । नु खल्वर्थे । सा इति, धारणा इति च पदविभागेन 'त्वं सा-तथा प्रसिद्धा

धारणा—(स्वगतम्) किं जाणिदम्हि अमच्चेण जहत्थणामधेएण जं तावसीवण्णणव्वाजेण अहं जेव्व वण्णिदा । होदु । एव्वं भणामि ।

[किं ज्ञातास्म्यमात्येन यथार्थनामधेयेन यत्तापसीवर्णनव्याजेनाहमेव वर्णिता । भवतु । एवं भणामि ।] (प्रकाशम्) महान् खलु योगप्रभावः ।

मन्त्री—भगवति, तव न किञ्चित् प्राणिनामन्तर्गतमविदितमस्ति । अतस्त्वां प्रार्थये, कथमस्माकं राजनि यक्ष्मा मन्यते । योगिन्यास्तव दुःखितेषु कथमेषां दुःखविमुक्तिः स्यादिति चित्तपरिकर्मविशेषः करुणा भवत्येव । योगाङ्गेषु यमेषु वाङ्मनसयोः यथार्थत्वरूपः

धारणा खलु' इत्यपि भूतार्थो व्यञ्जितः । "प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये । बन्धं मोक्षं च या वेत्ति बुद्धिः सा . . ." इति गीतोक्तं तत्त्वं बुद्धिसहकृताया धारणाया विषये व्यपदिश्यते कविना ॥ २४ ॥

महानिति । महान् खलु योगप्रभाव इति सोल्लुण्ठनं वचनम् ।

भगवतीति । अन्तर्गतं-मनसि स्थितम् । कथं मन्यते कीदृशमनोभावविशिष्टो भवतीति पृच्छ्यते । एषां-दुःखितानाम् । चित्तपरिकर्माणि-मनःप्रसाधनानि, तेषां विशेषः । तादृशविशेषगुणत्वेन करुणा परिगण्यते । मैत्री करुणा मुदिता उपेक्षा इत्याख्येषु मनसः संस्कारोपकरणभूतेषु चतुर्षु गुणेषु करुणा भवत्यन्यतमो गुणः । योगे संनिविष्टमनसां सत्त्वगुणभूयिष्ठानां दुःखितजनदुर्दशापनोदनविषये निर्धूतनिजपरभेदं निर्विशेषं कारुण्यं निरर्गलं स्वतः समुद्भवतीति वाक्यस्यास्य फलितो भावः । भवत्येव इत्यत्र एवकारः कारुण्यप्रवृत्तेः अवश्यंभावित्वं आविष्करोति । योगाङ्गेषु-योगस्यावयवभूतेषु । यमेषु-शरीरसाधनापेक्षेषु नित्येषु दशसु कर्मसु । "शरीरसाधनापेक्षं नित्यं यत् कर्म तद्यमः" इत्यमरः । वाक् च मनश्च वाङ्मनसे ; अचतुरेत्यादिना अच्प्रत्ययान्तो निपातः । तयोः । यथार्थत्वरूपः-तथ्यात्मकः । मनसि वचसि च विषयाभिन्नत्वमिति यावत् । सत्यं नाम मनसि स्थितस्य विषयस्य किञ्चिदप्यविपर्यासेन वाचा व्यवहरणमेव । दश यमास्तावत्....

सत्यं नाम द्वितीयो यमोऽपि तथा । अत इदं निर्विशङ्कं प्रार्थनापूर्वं पृच्छामि ।

धारणा—(सप्रणामम्) जक्खरायपक्खवादविसेसे वि जोइणीए पुच्छिदस्स जहत्थुत्तरं अभणिअ असक्कं ठादुं त्ति मण्णइ अमच्चो ।

[यक्षराजपक्षपातविशेषेऽपि योगिन्या पृष्टस्य यथार्थोत्तरमभणित्वा न शक्यं स्थातुमिति मन्यतेऽमात्यः ।] (प्रकाशम् ।) किमन्यत । पुरात् निष्क्रमयितव्यो ऽयमिति मन्यते ।

मन्त्री—कथमेतदेतस्य संघटते । सामादिषु चतुर्षूपायेषु एकैकस्यापि प्रयोगेण सुसाधो हि रिपुमनोरथभङ्गः ।

धारणा—नन्विमं दुष्करं पश्यामि ।

"अहिंसा सत्यमस्तेयं ब्रह्मचर्यं क्षमा धृतिः । दयार्जवं मिताहारः शौचं चैते यमा दश" इति हठप्रदीपिका । मनःप्रसादनेषु यथा करुणाया द्वितीयत्वम्, तथा यमेषु सत्यस्यापि द्वितीयत्वमिति, योगिनां दुःखितेषु यथा करुणायाः प्रवृत्तिर्नैसर्गिकी, तथैव वाङ्मनसयोरभिन्नप्रवृत्तिरूपं सत्यमपि नैसर्गिकं अवश्यादरणीयं च भवतीति अर्थपुष्टि 'द्वितीयो यमोऽपि तथा' इति वाक्यमिदं विशिनष्टि । योगिनां दयार्द्रहृदयत्वम्, मनसि वचसि चाभिन्नवृत्तिमत्वं च विवृण्वन् मन्त्री स्वसमीहितार्थं तन्मुखाज्जिगृक्षुः योगिनीं निपुणमेवं उपरुणद्धि । अतः-एवं विदित-निगम रहस्यत्वादित्यर्थः । निर्विशङ्कं-वीतभयं यथातथा । पुरादिति । पुरात्-नगरात्, अयमिति च । अयं-जीवराजः । कथमेतदिति । एतत्-पुरात् निष्क्रमण-कार्यम् । एतस्य-यक्ष्मणः । सामादिषु-सामदानभेददण्डाख्येषु । एकैकस्यापि प्रयोगेण । सामोपायो यदि प्रथमं प्रयुक्तो न सिध्यति ततो दानोपायः, यदि स च न फलति ततो भेदः, स च न चेत् सिध्यति जागर्त्येवान्ततश्चान्तिम उपाय इति भावोऽर्थः । अतो जीवस्य पुरादपनयनं दुर्घटमिति यावत् ।

नन्विति । इमं-रिपुमनोरथभङ्गम् । दुष्करं-न सुसाधम् पश्यामि ।

यक्ष्मणि विभौ प्रयोगं घटयन्ति न सामभेददानानि ।
दण्डः प्रभवेन्नु कथं प्रबलतरे रिपुजने स्वस्मात् ॥ २५ ॥

मन्त्री—यथार्थमाह भवती । किंत्विदं पक्षपातवचनम् । केनेममस्मत्प्रबलतरं मन्यसे ।

धारणा—(स्वगतम्) एसो अत्तकेरअस्स पहुणो अमच्चो । ता पहुजणविषअणीए मन्तविचारसिद्धीए परपक्खबलट्ठिदिं एदस्स जेव्व कहइस्सम् ।

[एष आत्मीयस्य प्रभोरमात्यः । तत् प्रभुजनविषयिण्या मन्त्रविचारसिद्धेः परपक्षबलस्थितिमेतस्यैव कथयिष्यामि ।] (प्रकाशम्) सर्वरोगराजो यक्ष्मा निष्प्रती-

---

स्वाशयस्य हेतुमाह यक्ष्मणीति । यक्ष्मणि विभौ-सर्वात्मना कार्यनिर्वहणक्षमे सति; आनन्तरिकस्यानुवादस्य हेतुभूतोऽयं विभुशब्दः । सामभेददानानीति त्रयश्चोपायाः । प्रयोगं न घटयन्ति-न कार्यनिष्पादनक्षमाणीत्यर्थः । स्वस्मात्-जीवराजस्य पक्षात् । रिपुजने-शत्रुपक्षीयपरिवारे । प्रबलतरे-अधिगतबलाधिक्ये सति । दण्डः-युद्धादिभिः शत्रुदमनोपायः । कथं नु प्रभवेत्-केन प्रकारेण शक्येत । न कथंचिदपीति भावः । हीनबले समबले वा रिपौ दण्डनीत्याः प्रयोगः प्रसज्येत; न तु विशिष्य रिपुपक्षे बलवत्तरे कृतमतयस्तां नीतिमाद्रियन्त इति भावः ॥२५॥

यथार्थमिति । समर्थे बलवत्तरे च प्रतिपन्थिनि उपायाः सामादयश्चत्वारोऽपि न प्रयोगमर्हन्तीति यदुक्तं राजनीतितत्त्वं तदखिलं तथ्यमेव । किन्तु इदं-'प्रबलतरे रिपुजने' इति भवत्या यदभिहितम् । तत् पक्षपातवचनं-रिपुजनाहितप्रीतिवशात् प्रोक्तं वचः; न त्वेषा तटस्थोक्तिरिति यावत् । एसो इति । आत्मीयस्य-स्वकीयस्य (धारणासंबन्धिनः) । प्रभोः जीवराजस्य । प्रभुजनाः-राजामात्यादयः, तेषां विषयः प्रभुजनविषयः, सोऽस्या अस्तीति प्रभुजनविषयिणी, तस्याः । मन्त्रविचारः-राजनीतिसंबन्धिनां गुप्तार्थानां विमर्शः, तस्य सिद्धेः-फलनिष्पत्तेः । (प्रभुजन-

कार इति सर्वजनविदितमेतत् । शृणु तावत् । परीवारा एतस्य रोगविशेषा भीमरूपा बहवः । तथाहि—

ज्वरपाण्डुप्रमेहार्शश्शूलगुल्मभगन्दराः ।
कासश्वासावतीसारसन्निपाताश्मरीव्रणाः ॥ २६ ॥

विषयिण्यै मन्त्रविचारसिध्यै इति चतुर्थ्यन्तं पाठान्तरमपि दृश्यते ।) परपक्षबलस्थितिं-शत्रुभूतयक्ष्मवर्गबलप्रकारम् । एतस्यैव-राज्ञः सविधे निवेदनादपि राजसचिवस्य धुरि कथनमपि समीचीनमेवेति एवकारस्यार्थः । एष एवाशयः 'राज्ञो निवेदनादपि तव पुरतः कार्यनिवेदनमभ्यर्हितम्' इति स्पष्टीकरिष्यते पश्चात् । सर्वरोगाणां राजा सर्वरोगराजः । "इति व्याधिसमूहस्य रोगराजस्य" इति बहुव्याधिपरीतत्वं रोगराजत्वं च चरकादिभिरस्य व्यक्तमभिहितम् । "सर्वरोगाग्रजो बली" इति प्रबलत्वं निष्प्रतीकारत्वं च यक्ष्मणः प्रसिद्धमायुर्वेदे ।

समुद्भूते राजयक्ष्मणि तस्य प्रबलस्य परिपन्थिनः परिवारत्वेन प्रादुर्भवन्तो भीमरूपा बहवो रोगा एव नामतो निर्दिश्यन्ते ज्वरेति । "प्रतिश्यायं ज्वरं कासमङ्गमर्दं शिरोरुजम् । श्वासं विड्भेदमरुचिं पार्श्वशूलं स्वरक्षयम् । करोति चांससन्तापमेकादशमिहाङ्गहृत" इति यद्यपि विद्यते व्याधिभिरेकादशभिरभिव्याप्तत्वं यक्ष्मणः प्रोक्तम्, तथापि रोगाणां राजेति, व्याधिसमूहरूप इति च चरकादिभिर्व्यवह्रियमाण एष व्याधिव्यूहाधिराजो यक्ष्मा लक्षणात्मकैरेकादशभिरामयैः समन्वित इति, अस्य परिवारत्वेन परिगण्यमानाः सर्वेऽप्यपरे रोगाः प्रायः प्रादुर्भवन्त्युपद्रवत्वेनेति च मन्तव्यम् । अत एवात्र रूपपर्यायत्वेन परिगृहीतेषु आमयेष्वेकादशसु अनन्तर्भूताः बहुमेह-शूनोदर-शूनमुष्क-पाण्डुदेहादयो विकाराः "कृच्छ्रेण बहु मेहन्तं यक्ष्मा हन्तीह मानवम्", "शूनमुष्कोदरं चैव यक्ष्मिणं परिवर्जयेत्", "पाण्डुदेहो यथापूर्वं क्षीयन्ते चास्य धातवः" इत्यादिभिर्वचनैः प्रतिपादिताः प्रदृश्यन्ते रुग्विनिश्चयादिषु ग्रन्थेषु; अत इह ज्वरपाण्डुप्रमेहार्शःप्रभृतीनां अपरेषां बहूनां रोगाणां राजयक्ष्मपरिवारत्वेन परिगणनं नैव स्यादनुपपन्नम् ॥ २६ ॥

किं च ।

रोगा मूर्ध्नि शतं चतुर्नवतिरेवाक्ष्णोस्तथा नासिकां
प्रत्यष्टादश कर्णयोरपि तथा वक्त्रे चतुस्सप्ततिः ।
पञ्चैवं हृदि किंच सन्ति बहवः सर्वेऽप्यमी दुस्तराः
प्राप्तौ कल्ककषायलेह्यवटकप्रायौषधानामपि ॥ २७ ॥

किंच बहवोऽप्यपरे रोगा विशेषतश्चोर्ध्वजत्रुगता राजयक्ष्माणं नियमेनानुबध्नन्तीत्याचष्टे रोगा इति । मूर्ध्नि शतं रोगाः-शिरोगता रोगाः शतसङ्ख्याकाः । एकादशैव शिरोरोगा इति प्रायः सर्वेऽपि ग्रन्थकाराः । अतः शतं शिरोरोगा इत्यस्य प्रमाणं मृग्यम । अक्ष्णो -नेत्रयोः । चतुर्नवती रोगाः । वाग्भटश्च तथैवाचष्टे । किन्तु षट्सप्ततिरेव नेत्रामया इति सुश्रुतमाधवकरौ । नासिकां प्रति-नासिकामाश्रित्य । अष्टादश व्याधयः । एकत्रिंशन्नासिकारोगा इति सुश्रुतः । माधवनिदाने त्वष्टादशैव । तथा कर्णयोरपि-अष्टादश रोगाः । माधवकरस्तु एकविंशतिं कर्णरोगान् पठति । वक्त्रे-मुखे । चतुस्सप्ततिः । पञ्चषष्टिर्मुखरोगा इति माधवकरः । वाग्भटस्तु पञ्चसप्ततिसङ्ख्याकान् मुखरोगानाह । नेत्र-नासिका-कर्ण—मुखाश्रितानां रोगाणां सङ्ख्याविषये कवेरस्य च शार्ङ्गधरस्य च मतं समानं दृश्यते । हृदि-हृदयावयवे । पञ्च रोगाः । अत्र नैव क्वचिद्विसंवादः । न केवलमेतावन्त एव, किंच सन्ति बहवो रोगा अपरेऽपि, ये रोगराजमनुधावन्ति । अमी सर्वेऽपि व्याधयः । कल्कः-खल्वादिसाहाय्येन सजलं अजलं वा पिष्टं द्रव्यम्; कषायाः-स्वरस-कल्क-क्वाथ-हिम-फाण्टभेदेन पञ्चविधा औषधपाकाः; लेह्यं-अवलेहनयोग्यं औषधम्; वटकः-मोदको गुटिका वा; तत्प्रायाणि यानि औषधानि तेषाम । प्राप्तावपि-अधिगमेऽपि (प्राप्ता इति प्रथमान्तः पाठो न सुगमः ।) दुस्तराः-दुस्साध्याः । भवन्ति । बहुकल्पैर्बहुगुणैरपि साधारणौषधिवर्गपरिकल्पितैरौषधैः यत्नेन चिकित्स्यमानोऽपि बहुरोगपरीतो यक्ष्मा दुर्जय इति भावः । रसादिधातुवर्गस्य लोहवर्गस्य च संबन्धिनां औषधानां इहानिर्देशस्य कारणं, तादृशौषधैरेव रोगराजविजयः साध्येतेति परस्तात् प्रतिपादनमेवेति पाठकैरवधेयम् ॥ २७॥

तस्माद्दुर्जयो यक्ष्मा युष्माभिः ।

मन्त्री—(स्वगतम्) इयं किल भीत्या निसर्गकातरा प्रबलपरबलप्रवेशहृदया मदीयप्रभावमजानती स्वबुद्ध्यनुरूपं किमपि प्रलपति । भवतु । किमनया वृथासंवादकदर्थनया । प्रस्तुतकार्यसाधनार्थमिमां तावत् अन्तरयामि ।

(प्रकाशम्, सोपहासम्)

आलोक्य शात्रवबलं बहु धारणे त्वं
भीतासि संप्रति नसंप्रतिपन्नधैर्या ।
जीवस्य जीवितसमे मयि सत्यमात्ये
भूयात् कथं बत विरोधिशिरोधिरोहः ॥ २८ ॥

तस्मादिति । (तस्माद्दुर्जयो युष्माभिरिति पाठे यक्ष्मेत्यध्याहार्यः ।) इयमिति । प्रबलानां परबलानां प्रवेशो हृदये यस्याः सा ; बलवतां शत्रूणां शक्तिमेव मनसा चिन्तयन्तीत्यर्थः । स्वबुद्ध्यनुरूपं-स्वकीयालोचनानुगुण्येन । अन्तरयामि-कपटसल्लापस्यान्तरायं आचरामि । इतःपरं स्वात्मनिगूहनादिकं निवार्य सुस्पष्टसंभाषणाय यतिष्ये इत्यर्थः ।

सोपहासमिति । वैरिबलवैशिष्ट्यविषयेऽवहेलनप्रदर्शनपरमिदम् ।

आलोक्येति । धारणे-परिचितचरेयं व्यक्तिरिति प्रबोधनाय संबोधनमिदम् । संप्रति त्वम् । बहु-अनल्पम् । शात्रवबलं-शत्रुसैन्यम् । आलोक्य । नसंप्रतिपन्नधैर्या-विशिष्य वीतधैर्या सती ; अत्र नञो न लोपः । भीतासि । बहुधा रणे-युद्धे ; युद्धाय सज्जीक्रियमाणमिति यावत् । शात्रवबलं विलोक्य त्वं भीतासि इत्यपि आपाततोऽपरोऽर्थः । (रसं प्रतिपन्नधैर्येति अपभ्रंशः पाठः!) जीवस्य-जीवराजस्य । जीवितसमे-प्राणैः समाने । अमात्ये मयि सति-जीवति सति । विरोधिनः-शत्रोः, शिरोधेः-कन्धरस्य, रोहः-वृद्धिः इति विरोधिशिरोधिरोहः । विरोधिशिरसः अधिरोहः-उन्नमनमिति च समुचितैव व्युत्पत्तिः । कथं भूयात् ।

धारणा—(विहस्य) कधं जाणिदह्मि अमच्चेण । ता कहेमि विस्सद्धं जहत्थं सुणादु अमच्चो । अहं खु देईए बुद्धीए सहअरी रण्णा जीवेण तावसीवेसं करिअ रत्तिम्मि पुरं पविसिअ जक्खराअस्स विआरणीओ ववसाओ त्ति पेसिदह्मि । तह ज्जेव्व विचारिअ अज्जं पदारेदुं पच्छण्णे व ठिदह्मि ।

[कथं ज्ञातास्म्यमात्येन । तत् कथयामि विस्रब्धं यथार्थं शृणोत्वमात्यः । अहं खलु देव्या बुद्धेः सहचरी, राज्ञा जीवेन तापसीवेषं कृत्वा रात्रौ पुरं प्रविश्य यक्ष्मराजस्य विचारणीयो व्यवसाय इति प्रेषितास्मि । तथैव विचार्य आर्यं प्रतारयितुं प्रच्छन्नेव स्थितास्मि ।]

मन्त्री । युज्यत एतत् । अतो राजसमीपमेव गच्छावः ।

धारणा—तुमं जेव्व गदुअ इमं वुत्तन्तं भणाहि । रण्णो णिवेदणादो वि

सकलराजतन्त्रस्वतन्त्रधिषणे सचिवोत्तमे सति जीवति मयि, कथंचिदपि कन्धरोन्नमनायापि कोऽपि न प्रभवेत् प्रतिपक्ष इति यावत् । बतेति विस्मये । विदितमत्प्रभावा भवत्यपि भीतेति विस्मयास्पदमिदमिति भावः ॥ २८ ॥

विहस्येति । एतावता च कृतकयोगिनीवेषेण कृतोऽयं व्यवहार इति विषयस्य व्यक्तीभावजनितविस्मयप्रकटनाय विहसनम् । विस्रब्धं-विशङ्कं यथा तथा । यथार्थं-तथ्यम् । इतःपरं न किमपि गोपनीयमस्ति, भूतार्थमेव ब्रूयां श्रूयतामित्याह । सहचरी-सखी । व्यवसायः-उद्यमः । आर्यं-भवन्तमित्यर्थः; आर्य इति सज्जनवाचकश्शब्दः । प्रतारयितुं-वेषान्तरकृतविडम्बनेन मोहयितुम् । तथा प्रच्छन्नरूपस्य प्रकटनमपि प्रकृतकार्यनिर्वहणाय समुचितमेवेति युज्यत इत्यनेन मन्त्री स्वाभिनन्दनं तत्र प्रकटयति ।

तुममिति । इमं वृत्तान्तं-'पुरान्निष्क्रामयितव्योऽयम्' इत्यादिभिः प्रागभिहितां शत्रुपक्षीयां प्रवृत्तिम् । अभ्यर्हितं-प्रशंसार्हम्, अतीव समुचितमित्यर्थः ।

तुह पुरदो कज्जणिवेदणं अब्भहिदम् । अहं उण दुज्जणसंसग्गकिदं कलुसं पक्खालेदुं महाणदिं ण्हादुं गच्छेमि । (इति निष्क्रान्ता ।)

[त्वमेव गत्वा इमं वृत्तान्तं भण । राज्ञो निवेदनादपि तव पुरतः कार्यनिवेदनमभ्यर्हितम् । अहं पुनः दुर्जनसंसर्गकृतं कलुषं प्रक्षालयितुं महानदीं स्नातुं गच्छामि ।]

मन्त्री---(सविचारम्) यद्यपि कुटिलप्रकृतयः स्वामिनि निबद्धदृढभक्तयो दुर्जया एव परसैनिकास्तथापि किमसाध्यं बुद्धिविभवस्य । यतः---

दुर्जाते सुमहत्यपि क्षितिपतेः शालीनतां संत्यजन्
शत्रून् जेतुमथेप्सितं घटयितुं शक्नोत्युपायेन यः ।
प्रायो मन्त्रिपदं महोन्नतमतिः प्राप्तुं स एवार्हति
स्वोत्सेकी न तु पण्डितो भुवि जनो वाचा वदन् पौरुषम् ॥२९॥

दुर्जनसंसर्गकृतं कलुषं-पापभूयिष्ठजनसंयोगोपनतं दोषम् । प्रक्षालयितुं-सम्यक् शोधयितुम् । कासश्वासच्छर्दिकुष्ठप्रभृतीनां कश्मलभूयिष्ठानां संसर्गतः सङ्क्रान्तं जुगुप्सावहं दोषमसहमाना, तत्प्रक्षालनविषये कालविलम्बमक्षमन्ती, दैववशात् मध्येमार्गं समागतवते मन्त्रिणे निखिलमपि निवेद्य वृत्तान्तं सत्वरं जिगमिषति धारणा जलावगाहायेति भावः ।

सविचारमिति । सविमर्शमित्यर्थः । कुटिला-विकृता प्रकृतिः-स्वभावः येषां ते । स्वामिनि-प्रभौ यक्ष्मणि । निबद्धा-सम्यगाहिता दृढा भक्तिः यैस्ते । सत्यप्याजानसिद्धे विरोधिवरूधिनीनां अनार्जवे, स्वामिनि विनिहितनिरवधिकभक्तिभरत्वात् तद्दुर्जयत्वमिह संभाव्यत इति भावः । तथापि मतिमहिम्ना महदपि कार्यं स्वात्मना साधु साध्येतेति निरूपयति पद्येनानन्तरेण ।

दुर्जात इति । यः-पण्डितः । क्षितिपतेः-राज्ञः । सुमहति दुर्जाते-अतिप्रबले कष्टे सत्यपि समुपनते । शालीतां-अधाष्टर्यम्, मान्द्यमिति यावत् । "स्यादधृष्टे तु शालीनः" इत्यमरः । संत्यजन्-विसृजन्; पौरुषमवलम्ब-

अत इदानीम्—

संचिन्तयामि कञ्चन सम्प्रति समयोचितं जयोपायम् ।
येनास्माकं श्रेयो भविता सहसा पराजयो द्विषताम् ॥ ३० ॥

(इति ध्यानं नाटयति ।) आः, चिन्तितोऽयं अबाधितोपायः । तथा हि—

न्नित्यर्थः । उपायेन-गूढमन्त्रबलेन, सामदानभेददानेष्वन्यतमेन राजतन्त्रेण वा । शत्रून् जेतुम् । अनन्तरं ईप्सितं-अभीष्टार्थम् । घटयितुं-निर्वोढुं च । शक्नोति । शत्रुनिषूदनपूर्वकं सङ्कल्पितार्थस्य संपादनक्षमो य इति भावः । सः-तादृशः । महोन्नत-मतिः-अतिप्रौढप्रज्ञावानेव । प्रायः मन्त्रिपदं-अमात्यस्य स्थानम् । प्राप्तुं अर्हति । स्वोत्सेकी-आत्मनि गर्वभूयिष्ठः । पण्डितः-अभिज्ञंमन्यः । वाचा पौरुषं वदन्-स्वयमेव स्वपराक्रमं प्रशंसन् । जनः-पुरुषस्तु । भुवि न मन्त्रिपदमर्हति । अपेत-पौरुषोऽहंभावी विकत्थनपरो वाचाटश्च न राज्यतन्त्रनिर्वहणाय प्रभवेदिति भावः । अधो निर्दिश्यमानां मुद्राराक्षसीयां चाणक्यस्य वाक्यशैलीं पद्यमिदं ज्ञापयति—

"अप्राज्ञेन च कातरेण च गुणः स्याद्भक्तियुक्तेन कः
प्रज्ञाविक्रमशालिनोऽपि हि भवेत् किं भक्तिहीनात् फलम् ।
प्रज्ञाविक्रमभक्तयः समुदिता येषां गुणा भूतये
ते भृत्या नृपतेः कलत्रमितरे संपत्सु चापत्सु च ॥" ॥ २९ ॥

संचिन्तयामीति । शत्रून् जेतुं स्वपक्षस्य श्रेयः साधयितुं च, एवं कार्यद्वय-मेकदैव संपादयितुम्, 'किमसाध्यं बुद्धिविभवस्य' इति पूर्वोक्तं दृढनिश्चयं मनसि कृत्वा, प्रतीक्षितप्रयोजनद्वयवितरणदक्षमुपायमेव निपुणं मन्त्रयति मन्त्रीति पद्यमिदं प्रतिपादयति ॥ ३० ॥

आः इति स्मरणार्थे । अबाधितश्चासौ उपायश्च अबाधितोपायः, निराटङ्कं गूढनयः । निराबाधो वैरिविध्वंसनोपायो निर्णीत इत्यर्थः ।

प्रथन्ते यास्तिस्रः प्रबलजडतीक्ष्णाः प्रकृतयो
वशीकारे तासां जगति सदुपायाः परममी ।
क्रमात् स्नेहास्ते ते कुशलमतिभिः सद्भिरुदिता-
स्तथा तीक्ष्णोपाया नियतमुपचाराश्च मधुराः ॥ ३१ ॥

निराबाधं गूढनीतिप्रकारमेव प्रतिपादयति प्रथन्त इति । प्रबलजडतीक्ष्णाः-क्रमेण महाशक्तिसंपन्नाः मन्दस्वभावाः क्रूरगुणविशिष्टाश्च । याः तिस्रः प्रकृतयः-त्रिविधाः शत्रुसंबन्धिन्यः प्रजाः । प्रथन्ते-प्रसिद्धाः सन्ति । तासां वशीकारे-स्वायत्तीकरणे । जगति । सदुपायाः परममी-वक्ष्यमाणा एव फलावहा उपायाः । तानेव विशिनष्ट्युत्तरार्धेन । ते ते स्नेहाः-मैत्रीप्रदर्शनपूर्वकं प्रयुज्यमानाः सामोपायाः । प्रबलानां वशीकरणायैते सदुपायाः । तथा तीक्ष्णोपायाः-त्रासजनका निशिता दण्डनीतयः । अनेन जडप्रकृतयो वशीकर्तुं शक्यन्ते । मधुरा उपचाराश्च-दानादयो हृदयङ्गमा आवर्जनोपायाश्च । अनेन च क्रूरप्रकृतयो वश्या भवन्ति । एवं रीत्या कुशलमतिभिः-नीतिप्रयोगनिपुणधिषणैः । सद्भिः-विदितवेदितव्यैर्महद्भिः । नियतम् । सदुपायाः क्रमादुदिताः-प्रबलस्य स्नेहः, जडस्य तीक्ष्णः, तीक्ष्णस्य मधुर इति च यथाक्रमं उत्तमाः सनिर्णयं सन्त्यभिहिता उपायाः । इत्येष सामान्योऽर्थः । वैद्यशास्त्रानुरोधेन यास्तिस्रः प्रथन्ते प्रकृतयः ता वातकफपित्ताख्याः । ताश्च क्रमेण गुणतः प्रबल-जड-तीक्ष्णा भवन्ति । "पित्तं पङ्गु कफः पङ्गुः पङ्गवो मलधातवः । वायुना यत्र नीयन्ते तत्र गच्छन्ति मेघवत्" इति प्रमाणमनुरुध्य वातस्य दोषान्तरापेक्षया विशिष्टबलयुक्तत्वं विदितमेव वैद्यविदुषाम् । तेषां दोषाणां त्रयाणामपि शमनाय घृततैलवसामज्जाख्याः परश्शतधा पक्का अपक्काश्च ते ते स्नेहाः, कटूष्णगुणभूयिष्ठा विविधास्तीक्ष्णा भेषजप्रयोगाः, मधुरशीतवीर्यादियुक्ता औषधादिप्रयोगाश्च क्रमशो नियमेन पटिष्ठैः परमसूक्ष्मार्थपारंगतैः भिषक्तन्त्रप्रवर्तकैः साधु सन्ति निर्धारिताः । "वातस्योपक्रमः स्नेहः" इति, "श्लेष्मणो विधिना युक्तं तीक्ष्णं वमनरेचनम्" इति, "पित्तस्य सर्पिषः पानं स्वादुशीतै-

तस्मात् प्रबलजडतीक्ष्णप्रकृतीनां वातपित्तकफानां मध्ये प्रबलो यो वातः स तु बहुविधस्नेहविशेषप्रयोगेण वशीकार्यः । तदनुगतस्य पित्तस्य मधुरोपचारेणैव सुकरो वशीकारः । उभयविरुद्धो जडो यः कफः तत्रेतरोपायस्य अप्रसरात् तीक्ष्णप्रयोगेणैव स वशमानेतव्यः । एवं च तत्तत्समुचितैरुपायैः सर्वामयनिदानेषु वातादिषु स्वाधीनेषु तज्जनितानामितरेषामुन्मेष एव दूरतोऽपास्तः । किंच—

विरेचनम्" इति च वात-कफ-पित्तानां स्नेह-तीक्ष्ण-मधुरोपचाराः क्रमशः सुतरामुपशमनोपाया इति वाग्भटादिभिरस्त्युपपादितम् । एवं लौकिकव्यवहाररीत्या वैद्यतन्त्रमार्गानुरोधेन च वैरिविध्वंसनाय व्याधिनिषूदनाय च क्रमशो निराबाधा ये प्रशस्ता उपायास्ते सम्यगालोच्य निर्णीता इति पूर्ववाक्योक्तमर्थं कविः पद्येनानेन साधु समर्थितवान् ॥ ३१ ॥

प्रथन्त इति पूर्वपद्येनाभिहितमेव विषयं प्रपञ्चयति तस्मादित्यादिभिर्वाक्यैः । बहुविधस्नेहविशेषप्रयोगेण-घृततैलादिभिः पानाभ्यञ्जनसेकवस्तिप्रभृत्यात्मना क्रियमाणेन विविधेन चिकित्साविशेषेण । तदनुगतस्य-स्वतन्त्रप्रवृत्तिमन्तं तं वायुमनुधावतः । उभयविरुद्धः-स्वभावतो वातात् पित्तादपि विरुद्धः ; न हि वातवत् बलवान् न वा पित्तवत् तीक्ष्ण इत्यर्थः । इतरोपायस्य-अन्यतरोपायस्य ; स्निग्धोपचारस्य मधुरोपचारस्यवेति यावत् । अप्रसरात्-प्रवृत्त्यभावात् । तादृशाभ्यां उपचाराभ्यां न श्लेष्मा वशमभ्युपैति, परं तु प्रकुप्येत् । सर्वामयनिदानेषु-समस्तरोगहेतुभूतेषु । वातादिषु-वात-पित्त-कफेषु । तज्जनितानां-तैर्वातादिभिरुत्पादितानाम् । इतरेषां-कासश्वासज्वरादीनां अशेषाणामपि व्याधीनाम् । उन्मेषः-आविष्कार एव । दूरतोऽपास्तः-तेषां समुत्पत्तिकथापि न संभवेदित्यर्थः । मूलच्छेदे सति तरुलतादीनामाविर्भाव एव न प्रसज्यते ; तद्वत् वैषम्यमापन्नानां वातादीनां आदावेव विहिते प्रशमे तन्मूला व्याधयश्च विहता एवेति तात्पर्यम् । "तत्र प्रकृतयस्तिस्रो वातपित्तकफात्मकाः । तत्र यः प्रबलो वातः स तु स्नेहैर्वशीकृतः ॥ तदनुगतं

सर्वस्मिन् विषये निरङ्कुशतया यद्दुर्निरोधं मनः
प्रायो वायुरिव प्रकृष्टबलवत् सर्वात्मना चञ्चलम् ।
तत् कामादिभिरुद्धतैरुपहतं संप्रेरितैर्यक्ष्मणा
तत्सौहार्दमुपेत्य यद्यपि पुनर्नः प्रातिकूल्यं चरेत् ॥ ३२ ॥

अतस्तदपि महाधिकारेण वशीकृत्य महति व्यापरे विनियोज्य

यत् पित्तं मधुरमयैस्तद्विजेयमुपचारैः । पङ्गुर्यस्तत्र कफस्तीक्ष्णोपायैर्वशं स चानीतः ॥" इति द्वितीयाङ्के वक्ष्यमाणेन विषयेण सम्यगेत एवार्थाः स्पष्टीभविष्यन्ति ।

सर्वस्मिन्निति । सर्वस्मिन् विषये-ज्ञानेन्द्रियपञ्चकमपि यत्र यत्र प्रवर्तते तत्र सर्वत्रापि विषये । निरङ्कुशतया-निराबाधप्रवृत्तिमत्त्वात् । दुर्निरोधं-निग्रहाक्षमम् । यत् मनः-अन्तःकरणम् । प्रायो वायुरिव-वातस्य गुणैः सदृश एव भूत्वा । अत एव प्रकृष्टबलवत् । सर्वात्मना-सर्वप्रकारेण । तद्वच्चञ्चलं च । तत्-उक्तरीत्या अशेषेष्वपि विषयेष्वप्रतिहतप्रवृत्तिमत् प्रकृत्यैव बलवदतिचञ्चलं मनः । यक्ष्मणा संप्रेरितैः । उद्धतैः-दौश्शील्यतो धृष्टैः । कामादिभिः-कामक्रोधमदमात्सर्यादिभिः । उपहतं-अभिभूतं सत् । तत्सौहार्दं-तैः कामादिभिः सह सौहार्दं-मैत्रीम् । उपेत्य-प्राप्य । नः प्रातिकूल्यं-विरोधम् । यद्यपि चरेत्-विदध्यात् । अतः कारणादिति अनन्तरवाक्येनान्वयः । वातादिदोषाणां व्याधिवर्धिनीप्रधानाधारभूतानां स्नेहादिभिः सदुपायैः सत्यपि साध्ये वशीकरणे, वातस्येव चञ्चलस्य बलवत्तरस्य महदुपबलसंधुक्षितस्य मनसो दुर्दमस्य वशीकरणं तु दुस्साधं स्यात् । व्याधीनां निर्वर्तनविषये वातस्येव, आधीनां समुत्पादने मनसः सुतरां वीर्यं अनिवार्यमिति, अतोऽत्र किं विधेयमिति च विमृशति विज्ञानशर्मा ॥ ३२ ॥

अत इति । अस्माद्धेतोः । तत्-मनोऽपि । महाधिकारेण-विषयनिवारणनिपुणानां विचित्रप्रभावाणां विवेकादीनां बलवता नियोगेन । महति व्यापारे-यमनियमनिदिध्यासनादिबाह्येन्द्रियनिग्रहकर्मणि । विनियोज्य-बलवत् प्रेरयित्वा ।

तैरपि दुर्भेदं करिष्यामि । यद्यपि मद्विरोधिचेष्टो ज्ञानशर्मा मदसंनिधाने राज्ञ उपजापेन कार्यभेदमेव जनयेत् तथापि जाग्रति मयि स निष्फलकर्मैव ।

सर्वानर्थनिदाने यक्ष्मणि तस्मिन् समूलमेव मया ।
उन्मूलिते ततो नः कर्तव्यं नावशिष्यते किञ्चित् ॥ ३२ ॥

तथा कर्तुमेव तावत् राजनिकटमेव गच्छामि । (इति कतिचित् पदानि गत्वा पुरो विलोक्य ।) इदं तद्राजभवनम् । यावत् प्रविशामि । कः कोऽत्र भोः ।

तैः-कामादिभिरपि । मद्विरोधिचेष्टः-मदभीष्टप्रतिकूलप्रवृत्तिमान् । ज्ञानशर्मा-मोक्षसाधको जीवमन्त्री । (अज्ञानशर्मेत्यसाधुः पाठः ।) मदसन्निधाने-राजसविधात् मयि क्वचिदपगते । उपजापेन-मित्रभेदोपायेन । कार्यभेदं-प्रतिरूपं प्रयत्नम्; जीवस्यान्यथाप्रवृत्तिरूपं कार्यमेवेति भावः । यद्यपि जनयेत् । तथापि जाग्रति-मयि जागरूके सति । स निष्फलकर्मैव । मत्पुरतो ज्ञानशर्मा नूनमकिञ्चित्कर इति यावत् । अयमत्र भावः । विज्ञानशर्मा जीवं त्रिवर्गे प्रवर्तयति । ज्ञानशर्मा नाम प्रथमः सचिवः प्रेरयति तमपवर्गप्रवृत्तौ । (मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः इत्यमरः ।) यमनियमाद्यनुष्ठाने सति यथाविधि प्रसक्ते, ज्ञानशर्मणः परिचये च तदनुषङ्गतो बलात् समुपनते, स्वस्यावलम्बकं त्रिवर्गमेव तृणीकृत्य केवलमपवर्गोद्युक्तः स्याज्जीवः; तदानीं निश्शेषितेन्धनेन निर्वाणमधिगच्छता पावकेन परित्यक्तो धूमोत्कर इव पश्यत एव नश्येयमिति विह्वलचित्तो विमृशति किंकर्तव्यताविषये विज्ञानशर्मा ।

सर्वानर्थेति । सर्वानर्थनिदाने-त्रिवर्गसाधकानां ऐहिकानां श्रेयसां आपवर्गिकस्य निश्श्रेयसस्य च निर्मूलनहेतौ । सर्वेषामपि शारीरमानसिकानां विकाराणां हेतुभूते च । तस्मिन्-प्रबलव्याधिपरिवारपरिवृते तथाविधे । यक्ष्मणि । समूलमेव उन्मूलिते-श्लेष्मप्रधानैः विकृतैः हेतुभूतैः दोषैः सह निरवशेषतया समूलं आच्छिद्य परिहृते । "कफप्रधानैर्दोषैस्तु रुद्धेषु रसवर्त्मसु । क्षीयन्ते धातवः सर्वे ततः शुष्यति मानवः" इति कफप्रधाना विकृता दोषा रसवहमार्गनिरोधना-

(प्रविश्य)

प्रतीहारः—मन्त्रिन्, किमाज्ञापयसि ।

मन्त्री—प्राण दौवारिक, संप्राप्तं मां राज्ञे निवेदय ।

प्राणः—तथा । (इत्यन्तःपुरं प्रविष्टः ।)

मन्त्री—(परितो विलोक्य) इह खलु—

संमृज्य शोधनीभिश्चत्वरवेदीतलेषु रम्येषु ।
रचयन्ति रङ्गवल्लीरन्तःपुरचारिका एताः ॥ ३४ ॥

दिद्वारा शोषमुपजनयन्तीति निदाने । अतो विकृतानां कफप्रधानानां दोषाणां निर्दिष्टपूर्वैरुपायैः निरसनेन व्याधिसमूहानुसृतो यक्ष्मा स्वयं क्षीयत इति भावः । वैरिनिषूदनेन शरीराख्ये पुरे निष्कण्टके निष्पन्ने, वैकल्यरहितैः विश्वस्तविहारैः विनयनिभृतैः भृत्यैरिव विचक्षणैरिन्द्रियैः सावहिति जीवस्य नियोगेषु निर्वर्त्यमानेषु विज्ञानशर्मप्रभृतयो निर्वृतात्मानो निभृतं जीवविनोदनपरा भवेयुरिति फलितमर्थं 'ततो नः कर्तव्यं' इत्यादिकमवशिष्टं वाक्यं निरूपयति ॥ ३३ ॥

प्राणेति । प्राणवायोः प्रतीहारत्वं अत्र विवक्ष्यते । तस्य वायोः कण्ठमुखस्थितत्वात्, तन्मूलत्वात् देहधारणस्य च तस्येह द्वारपालकत्वेन व्यवहारः । वाय्वन्नादीनां अन्तर्मार्गदायित्वं च तदधीनं भवति । "वायुर्यो वक्त्रसञ्चारी स प्राणो नाम देहधृक् । सोऽन्नं प्रवेशयत्यन्तः प्राणांश्चाप्यवलम्बते" इति सुश्रुतः ।

संमृज्येति । एता अन्तःपुरचारिकाः-अन्तःपुरे नियमिताः चेटीजनाः । शोधनीभिः-संमार्जनीभिः । संमृज्य-अवकरादीनां अपनयपूर्वकं संशोध्य । अत एव रम्येषु । चत्वराणि च वेद्यश्च चत्वरवेद्यः-प्राङ्गणवितर्दयः, तासां तलेषु-स्थलेषु । रङ्गवल्लीः-स्थलप्रसाधनचित्राणि । रचयन्ति । अनेन पद्येन आनन्तरिकेण च जीवराजस्य अधिष्ठानभूतं शरीराख्यं सामान्यं हृत्पुण्डरीकाख्यं प्रधानं च पुरं लौकिकन्यायरीत्या वर्णितम् ॥ ३४ ॥

गृह्णन् वेत्रलतां वसत्यवसरापेक्षो जरत्कञ्चुकी
राजा मामवलोकयेदिति समं वत्सेन गौस्तिष्ठति ।
वादित्रध्वनिमण्डलीकृतगरुद्बर्ही नटत्यङ्गणे
देव त्वं विजयीभवेति गुणयन्नास्ते शुकः पञ्जरे ॥ ३९ ॥

गृह्णन्निति । जरत्कञ्चुकी-वृद्धः सौविदल्लः । “ अन्तःपुरचरो वृद्धो विप्रो गुणगणान्वितः । सर्वकार्यार्थकुशलः कञ्चुकीत्यभिधीयते ” इति कञ्चुकिलक्षणम् । वेत्रलतां गृह्णन् । अवसरापेक्षः-अन्तःपुरे अवश्यकर्तव्यानां कार्याणां विषये देवी-नृपादीनां आज्ञां अनवरतं प्रतीक्षन् सन् । वसति-द्वारि तिष्ठति । गौः-राजगृहाभ्यर्चिता धेनुः । वत्सेन समं-स्वकीयेन तर्णकेन सह । ‘ मां राजा अवलोकयेत् ’ इति सोत्कण्ठं नृपागमनं प्रतीक्षमाणा तिष्ठति । राज्ञा स्वहस्तदत्ततृणभक्ष्यकबलादिभिः संतर्पिता राजगृहसंवर्धनलालिता गौः सप्रमोदं प्रभोः प्रेक्षणं प्रतीक्षत इति यावत् । वादित्रस्य-ततादिचतुर्विधवाद्यसमुदायस्य, ध्वनिभिः-तत्स्वनानां आकर्णनेनेत्यर्थः ; मण्डलीकृतः गरुत्-बर्हभारः येन सः । “ ततं चैवावनद्धं च घनं सुषिरमेव च । चतुर्विधं तु विज्ञेयं वादित्रं लक्षणान्वितम् ” इति भरतः । ततं नाम तन्त्रीततं वीणादिकम । आनद्धं नाम चर्मादिपिनद्धं मुरजादिकम् । घनं नाम कांस्यादि-निर्मितं तालादिकम् । सुषिरं नाम शब्दपूरणोपयोगिभिर्द्वारैराचितं वंशीप्रभृतिकं च । एतत्समुदायस्यैव आतोद्यमिति च नामान्तरम् । तथाविधो बर्ही-गृहमयूरः । अङ्गणे-अन्तःपुरसन्निहिते क्वचिच्चत्वरे । नटति-वादित्रनिनादाकर्णनसंधुक्षितचित्त-वृत्तिर्नृत्यति । पञ्जरे विद्यमानः शुकः । ‘ देव त्वं विजयीभव ’ इति राजान-मुद्दिश्य जयशब्दम् । गुणयन्-पौनःपुन्येन समुच्चारयन् । आस्ते । संचिन्त-यामीति श्लोकादारभ्य मुखसन्धेरारम्भकं बीजं नामाङ्गं संघटयन्, तदन्तरा परिषद्रञ्जनार्थं लौकिकीं रीतिमनुरुध्य एवं राजभवनवर्णनादिकमपि कविना प्रस्तुतम् ॥ ३९ ॥

(प्रविश्य)

दौवारिकः—(मन्त्रिणं प्रति) स्वामिन्, भवन्तं द्रष्टुं बुद्ध्या देव्या सह भद्रासनमधिवसति राजा ।

मन्त्री—

अतिपरिचयेऽपि राज्ञो बिभेमि सहसोपगन्तुमभ्यर्णम् ।
येनाग्नेरिव तेजः स्फुरदस्यारान्निवर्तयति ॥ ३६ ॥

(विचिन्त्य) परपक्षं प्रति प्रतिविचारणाय प्रेषितां धारणां प्रतीक्षमाण इव लक्ष्यते । भवतु तदेतदहं वक्ष्यामि ।

(ततः प्रविशति बुद्ध्या देव्या सह राजा जीवः ।)

मन्त्री—(उपसृत्य) विजयतां महाराजः ।

राजा—इतो निषीदतु भवान् । (इति मन्त्रिणे आसनं निर्दिशति ।)

मन्त्री—(आसने उपविश्य स्वगतम्) एष खलु—

अतिपरिचयेति । अतिपरिचये-पर्याप्ते पारस्परिके सत्यपि परिचये । राज्ञोऽभ्यर्णं-अन्तिकम् । सहसोपगन्तुं-नियोगानन्तरमेव यथेष्टमुपसर्तुम् । बिभेमि-अननुभूतपूर्व इव सङ्कुचितमनस्को भवामि । येन-हेतुना । अस्य तेजः-आधिकारिकं असाधारणं औज्वल्यम् । जीवोऽपि स्वयं नित्यनिर्मलो निरवधिकप्रभाभासुरश्च स्यात् । अग्नेरिव स्फुरत्-अनुपदं वैद्युतमिव तेजः प्रसरत् सत् । आरात् निवर्तयति-दूरात् वारयति । "आराद्दूरसमीपयोः" इत्यमरः ॥ ३६ ॥

परपक्षमिति । प्रतिविचारणाय-विमर्शपूर्वकं वृत्तान्तावगमाय । तदेतत्-यत् धारणया पूर्वमावेदितं तदिति यावत् । एष खल्विति राज्ञस्तादात्विकं अवस्थानप्रकारं निरूपयति ।

गण्डूषोदकशोधितेऽपि वदने ताम्बूलरक्ताधरः
स्नानापोहितचन्दनेऽपि वपुषि प्रोद्दामतत्सौरभः ।
निर्णिक्ते सिचये धृतेऽपि कनकाकल्पेन पीताम्बरः
सोऽयं सत्यपि न प्रमाद्यति सदाचारादतिप्राभवे ॥ ३७ ॥

(प्रकाशम् ।) महाराजेन प्रहिताया धारणाया मुखात् तत्रत्यः सर्व-वृत्तान्तो विदित एव । सा पुनर्दुर्जनसंसर्गदोषपरिहाराय नदीं स्नातुं गता । तया च मयि संक्रामितस्तत्रत्यवृत्तान्तः ।

गण्डूषेति । वदने-अस्य राज्ञो मुखे । गण्डूषोदकेन-आस्यक्षालनार्थमुपयुक्तेन सलिलेन, शोधिते सत्यपि । ताम्बूलरक्ताधरः-ताम्बूलचर्वणेन रञ्जितः अधरः यस्य सः । ताम्बूलचर्वणशीलानां मुखप्रक्षालनेनाप्यधरदन्तादीनां रागो न सुलघु अपनीयते । वपुषि । सत्यपि स्नानापोहितचन्दने । प्रोद्दामं-सुनिर्भरम्, तस्य-चन्दनस्य, सौरभं-सुगन्धि यस्मिन् सः । निर्णिक्ते-सम्यक् क्षालितत्वात् धवले । सिचये-वस्त्रे । धृतेऽपि-सत्यपि वसाने । कनकाकल्पेन-ध्रियमाणेन हिरण्मयेनाभरणेन । पीतं-गौरवर्णम्, अम्बरं यस्य सः । भास्वराणां स्वर्णाभरणानां छायासंयोगतः शुद्धं धवलं अदसीयं परिधानमपि पीतवर्णविशिष्टवद्भासत इति यावत् । अतिप्राभवे-असाधारणाधिकारिकमहिम्नि । सत्यपि-विद्यमानेऽपि । सोऽयं-तत्तादृशप्रभावसंपन्न एष महाराजः । सदाचारात् । न प्रमाद्यति-नैव स्खलति । अप्रतिहतेन अधिकारप्राबल्येन संयुक्तोऽपि, सामान्याधिकारविशिष्ट इवापरः प्रमत्तः सन् न ह्येष किमप्युच्छृङ्खलं कदाप्याचरेदिति भावः । यद्यपीह जीवात्मा कथानायकस्तथापि लौकिकं व्यवहारमनुरुध्य ताम्बूलरक्ताधरत्वादिकं राज्ञो वर्ण्यत इति मन्तव्यम् ॥ ३७ ॥

महाराजेनेति । प्रहितायाः-परपक्षसम्बन्धिनां विषयाणां तत्त्वावगमाय रहसि प्रेषितायाः । तत्रत्यः-शत्रुवर्गसम्बन्धी । संक्रामितः-विसृष्टः । सर्वोऽपि

राजा—(सोत्कण्ठम्) कथमिव ।

देवी—अहं वि अवहिदह्मि । [अहमप्यवहितास्मि ।]

मन्त्री—(स्वगतम्) इयं हि देवी—

किमपि नियमिताग्रैः कुन्तलैः स्निग्धनीलैः
परिलसदपराङ्गा धारयन्ती दुकूलम् ।
धवलमुपरि भर्तुश्चामरं धूयमानं
विरमयति करेण व्यक्तमाकर्णनाय ॥ ३८ ॥

वृत्तान्तो मयि निवेशितोऽस्ति धारणयेत्यर्थः । सोत्कण्ठमिति, अहं वि अवहिदह्मि इति च वाक्याभ्यां उभयोरपि राजतत्पत्न्योः शात्रववृत्तान्तानां अवगमविषये विद्यमान औत्सुक्यातिरेकोऽभिव्यज्यते ।

देव्यास्तत्कालोचितामवस्थानरीतिमवलोक्य मन्त्री कौतुकाविष्टमनाः स्वात्मनि स्वभावोक्त्या निर्वर्णयति तां किमपीति । इयं हि देवीति पूर्ववाक्यमत्र संयोजनीयम् । इयं देवी इति कर्त्री । किमपि कथंचित् । नातिदृढमिति यावत् । नियमितानि वेल्लनेन संयतानि अग्राणि येषां तैः । स्नानादिभिः संस्कारानन्तरं केशभाराग्राणां आवेष्टनपूर्वकं ग्रथनं सामान्यमाचरणं कुलस्त्रीसमुदाये; यदेवात्र कविनास्ति वर्णितम् । तथा स्निग्धाः-स्नेहसंपृक्ताश्च ते नीलाश्च तैः । कुन्तलैः-कबरीभारैः । परिलसत्-सौन्दर्यमभिपोषयत्, अपराङ्गं-शरीरस्य पश्चाद्भागः यस्याः सा । दुकूलं-कौशेयम् । धारयन्ती । भर्तुः-अन्तिकस्थितस्य पत्युः । उपरि-शिरस ऊर्ध्वम् । धूयमानं-वीजमानम् । धवलं चामरम् । व्यक्तं-सुस्पष्टं यथा तथा । आकर्णनाय-मन्त्रिणा अभिधीयमानस्य परपक्षवृत्तान्तस्य श्रवणाय । करेण-स्वहस्तेन । विरमयति-निवारयति । विषयविशेषस्याकर्णनासक्ता वनिता वस्त्राञ्चलं कराभ्यां परामृशन्त्यो विषयं निभृतं निशमयेयुरिति विदितमेव बहूनाम् । अत्र चेयं देवी निभृतावस्थितापराङ्गा, दुकूलाञ्चलं अचलत् करेण धारयन्ती,

(प्रकाशम्) श्रोतव्यमिदं धारणावचनम्। यक्ष्महतकः पुरान्निष्क्रामणमेवास्माकमिच्छतीति।

राजा—किमत्र प्रतिविधातव्यम्।

देवी—(सोद्वेगम्) दाणिं किं कुम्मो। [इदानीं किं कुर्मः।]

मन्त्री—देवि मा भैषीः। प्रतिविधानप्रकारोऽपि धारणया विदितः।

राजा—कथमिव।

मन्त्री—(कर्णे) एवमेवम्।

राजा—कथमिदं धारणया निर्धारितम्।

मन्त्री—रसगन्धकप्रयोगमन्तरेण सपरिवारोऽहमजय्य इति यक्ष्मराजस्य हृदयं विश्वसनीयया तापसीवेषया धारणया गृहीतम्।

देवी—(साश्वासम्) जइ एव्वं ता कहं अह्मेहिं रसगन्धआ संपादणिज्जेत्ति।
[यद्येवं तत् कथमस्माकं रसगन्धकौ संपादनीयौ इति।]

श्रुतिपथावरोधमाचरच्चामरं हस्ताग्रेणापनयन्ती वृत्तान्तश्रवणे नितान्तं बद्धश्रद्धा विलोक्यत इति निर्वर्णयति मन्त्री ॥ ३८ ॥

श्रोतव्यमिति। धारणावचनं-धारणाया वाक्यम्; धारणासविधादधिगतो वृत्तान्त इत्यर्थः। पुरात्-जीवस्यावासनगरभूतात् शरीरात्। मा भैषीः-न भेतव्यम्। माङि लुङ्; न माङ्योग इति अडागमप्रतिषेधः। धारणया विदितः-धारणया विमृश्य निर्धारित इत्यर्थः। एवमेवं-एतादृश उपायः समुपकल्पित इति निगूढं श्रोत्रान्तिके निवेदितं मन्त्रिणा। रसगन्धकेति। अहमिति राजयक्ष्मा निर्दिश्यते। सपरिवारः-कुष्ठकिलासगलगण्डपाण्डुज्वरविषूचीप्रभृतीनां व्याधीनां समूहोऽस्य परिवारः; तत्सहितः। रसगन्धकयोः पृथक् संयुक्तयोर्वा यथायोगं संस्कृतयोः प्रयोगेण रोगसमूहनिरासपूर्वकं देहदृढीकरणात्मकं रसायनविधानमपि

राजा—शम्भोर्वीर्यं रसो नाम शर्वाण्या नाम गन्धकः ।
ताभ्यामेव प्रसन्नाभ्यां तौ ग्राह्याविति मे मतिः ॥ ३९ ॥

देवी—केण उण उवाएण ताणं पसादो संपादणिज्जो ।
[केन पुनरुपायेन तयोः प्रसादः संपादनीयः ।]

मन्त्री—उपासनयैव ।

राजा—युक्तमुक्तं भवता । श्रूयते हि पुरा मृकण्डुरुमापतिमुपास्य पुत्रं लेभे । तत्पुत्रोऽपि तदुपासनया मृत्युमुखान्मुक्तो दीर्घमायुरलभतेति ।

निष्पद्यत इति विदितमेव भिषजाम् । तथा च वैद्यके—"शुद्धः स्यात् सकलामयैकशमनो यो योगवाहो मृतः सूतः षड्गुणगन्धयुग्गदहरो वेगेन धात्वादिभुक् । वृष्यो मृत्युविनाशनो बलकरः कान्ताजनानन्दनः शार्दूलातुलसत्त्वकृत् क्रमभुजां यक्ष्मापहारी ततः" इति । यक्ष्मणां राजा-यक्ष्मराजः; रोगराट्; राजयक्ष्मेति यावत् । साश्वासं-उपात्तधैर्यं यथा तथेत्यर्थः ।

शम्भोरिति । रसः-पारदः । शम्भोः-शिवस्य । वीर्यं-सप्तमः शुक्राख्यो धातुः । गन्धकः-तदाख्यः खनिज उपधातुः । शर्वाण्याः-गौर्याः । वीर्यं-रजो नाम स्त्रीधातुः । तौ-रसगन्धकौ । ताभ्यां-शिवाभ्याम् । प्रसन्नाभ्यामेव । तयोः प्रसादमधिगत्यैवेत्यर्थः । ग्राह्यौ-प्राप्तुं शक्यौ । इति मे मतिः-इत्यहं अभिप्रैमि । "पारदः शिववीर्यं स्यात् दुर्गावीर्यं च गन्धकः" इति रसशास्त्रम् । पार्वतीपरमेश्वरयोः प्रसादेन तद्वीर्यभूतयो रसगन्धकयोः सेवा समुचितेति, तत्सेवया च देहसिद्धिं प्राप्तुं प्रभवति पुरुष इति च रसशास्त्रविदो वदन्ति । यथा रसरत्नसमुच्चये—"दिव्या तनुर्विधेया हरगौरीसृष्टिसंयोगात्" इति । हरगौरीसृष्टिसंयोगो नाम रसगन्धकयोः संयोग एव ॥ ३९ ॥

उपासनयेति । ध्यानार्चनादिसेवाविधिना । मृकण्डुः-भृगुनाम्नो मुनेः पुत्रो महर्षिः । "पुरा कल्पे मुनिश्रेष्ठो मृकण्डुर्नाम विश्रुतः । भृगोः पुत्रो महाभागः सभार्यस्तप्तवांस्तपः ॥ तस्य पुत्रस्तदा जातः शिवस्यानुग्रहाद्वने ॥" इति

मन्त्री—सम्यगवगतं महाराजेन । यतः खल्वेषः—

पादाघातत्रुटितयमुनाभ्रातृबाह्वन्तरोद्य-
द्रक्तस्रोतस्समुपशमिताशेषशोकाश्रयाशम् ।
मार्कण्डेयं व्यतनुत यदा सर्वभूतैस्तदादि
स्तुत्यं मृत्युञ्जय इति यशः स्फारमीशः प्रपेदे ॥ ४० ॥

पार्वतीपतेरुपासनया मृकण्डोः पुत्रोत्पत्तिविषयः प्रतिपादितोऽस्ति मार्कण्डेयपुराणे रुद्रसर्गाध्याये । तत्पुत्रः-मार्कण्डेयः । तदुपासनया-तस्येश्वरस्योपासनया । उमापतिं प्रति कृतेन उग्रेण तपसा मार्कण्डेयो मृत्युवशमप्राप्य चिरंजीवित्वमवाप्रेति कथा सुप्रसिद्धा । किन्तु नारसिंह्मे पुराणे महाविष्णुं प्रति मार्कण्डेयस्तपस्तत्वा दीर्घं जीवितं अभजदिति प्रतिपादितमस्ति । तद्यथा—"मार्कण्डेयो महाभागो बाल्यत्वे च महाद्युतिः । अथ तस्मिन् जातमात्रे आदेशी कश्चिदब्रवीत् । वर्षे हि द्वादशे पूर्णे मृत्युरस्य भविष्यति । श्रुत्वा तन्मातापितरौ दुःखितौ तौ बभूवतुः । तौ दृष्ट्वा दुःखसंपन्नौ मार्कण्डेयो महामतिः । उवाच वचनं तत्र किमर्थं दुःखमीदृशम् । अपनेष्यामि मे मृत्युं तपसा नात्र संशयः । इत्युक्त्वा तौ समाश्वास्य पितरौ वनमभ्यगात् । तत्र विष्णुं प्रतिष्ठाप्य गन्धपुष्पादिभिः क्रमात् । पूजयित्वा हरिं तत्र तपस्तेपे सुदुष्करम् । निराहारो मुनिस्तत्र वर्षमेकमतन्द्रितः । ततो यमालयात्तत्र चागता यमकिङ्कराः । पाशहस्तास्तु तं नेतुं विष्णुदूतैस्तु ते हताः ॥" इति नारासिंह्मपुराणे मार्कण्डेयमृत्युञ्जयाध्याये ॥

परमेश्वरस्य यः किल पारेगिरां प्रभावस्तमेव प्रतिपादयति **पादाघातेति** । यतः खल्वेष इति पूर्ववाक्यमत्र योजनीयम् । एष खलु उमापतिरीशः । पादाघातेन त्रुटितं-विदारितम्, यमुनाभ्रातुः-यमस्य, बाह्वन्तरं-वक्षस्स्थलम्, तस्मात् उद्यता-उद्गच्छता, रक्तस्रोतसा-शोणितधारया, समुपशमितः-सम्यक् प्रशमितः, अशेषश्चासौ शोकश्चाशेषशोकः, स एव आश्रयाशः-अग्निः यस्य तम् । मृकण्डोरपत्यं पुमान्-मार्कण्डेयः, तम् । यदा व्यतनुत-यस्मिन् काले कृतवान् ।

स्तविष्ठामि[1] । स्तोष्यामि त्वामहं विश्वस्य भोजन । पालनमशनं वा भोजनः[2] । अमृताग्ने[3] ताताारमभृतं[4] यज्ञियं[5] यजिष्ठं हव्यवाहन ॥

स्तविष्यामि । स्तोष्यामि त्वामहं अमृत सर्वस्य पुरुषस्य भोजयितारम् । अग्ने रक्षितारममृतं यज्ञार्हं यष्टृतमं हविषां वोढः ॥ (५)

सुशंसो॑ बोधि गृण॒ते य॑विष्ठ्य मधु॑जिह्वः स्वा॑हुतः ।
प्रस्क॑ण्वस्य प्रति॒रन्नायु॑र्जी॒वसे॑ नम॒स्या दैव्यं॒ जनम् ॥

सुशंसः । सुशंसो भव[6] गृणते[7] युवतम । मादयितृज्वाल[8] स्वाहुतः । प्रस्कण्वस्य । कण्वपुत्रः प्रस्कण्वः । स चायं घोरस्य[9] कण्वस्य पुत्रः प्रकरणात् । न त्वाजमीव्हस्य[10] । तस्य वर्धन्तायुजदीवनार्थं[11] स्तुहि परिचर वा दैव्यं जनमिति ॥

[1] Read स्तविष्यामि.

[2] Perhaps to read भोजनम्.

[3] Read अमृत । अग्ने. First written अमृताग्न. Then ए mark written below आ mark of ता with a cross above the line between ता and ग्न.

[4] Read त्रातारममृतं.

[5] This is the meaning of मियेध्य in the vocative case and so must be यज्ञिय.

[6] All the letters till भव badly injured, the leaf being worm-eaten. From the context and from the bits that remain, the letters are deciphered. Note the etymology from the root भू.

[7] त in ते completely gone, as the corner of the leaf is broken.

[8] यि looks more like घि than यि.

[9] Read घौरस्य.

[10] व्ह written ळ्ह.

[11] Read वर्धयन्नायुर्जीवनार्थं.

सुशंसो बोधि । सुस्तवो बुध्यस्व स्तुवते युवतम मादयितृजिह्व स्वाहुत: । प्रस्कण्वस्य मम जीवनाय आयुर्वर्धयन् नमस्कुरु सर्वान् देवान् ॥ (६)

होतारं विश्ववेदसं सं हि त्वा विश इन्धते ।
स आ वह पुरुहूत प्रचेतसोऽग्ने देवाँ इह द्रवत् ॥
सवितारमुषसमश्विना भगमग्निं व्युष्टिषु क्षपः ।
कण्वासस्त्वा सुतसोमास इन्धते हव्यवाहं स्वध्वर ॥

होरसि[1] । द्रुच एकार्थः । त्वां कण्वपुत्राः समिन्धते । स त्वं तेषां एतानाबह[2] । द्विरूपोऽग्निर्यष्टा यष्टव्यश्च ॥

होतारं विश्ववेदसम् । होतारं सर्वधनं समिन्धते हि त्वां विश: । स त्वमावह पुरुहूत प्रचेतसोऽग्ने देवानिह क्षिप्रम् ॥ (७)

सवितारम् । सवितृप्रभृतीनग्निं च यष्टव्यं रात्र्या व्युष्टिषु त्वमावह । कण्वपुत्रा अभिषुतसोमास्त्वां दीपयन्ति हव्यवाहं स्वध्वर ॥ (८)

पतिर्ह्यध्वराणामग्ने दूतो विशामसि ।
उषर्बुध आ वह सोमपीतये देवाँ अद्य स्वर्दृशः ।

स्पष्टोत्तरा[3] । स्वव्रशः[4] सूर्यदृशः । स्वरादित्यो भवति स्वरेर्गत्यर्थात् । सूपसृष्टादर्त्तेरिति[5] यास्क[6] इति ॥

[1] Read होतारम् ।

[2] Read एतानावह.

[3] The verse number 9.

[4] Read स्वर्दृशः

[5] Read सूपसृष्टादर्तेरिति.

[6] Cf. स्वरादित्यो भवति । सु अरणः । सु ईरणः । स्वृतो रसान् । स्वृतो भासं ज्योतिषाम् । स्वृतो भासेति वा (नि. २. १४).

पतिर्हि । पतिर्हि यज्ञानां अग्ने दूतो विशामसि । स उषसि प्रबुद्धानावह सोमपानाय देवानद्य सर्वस्य द्रष्टॄन् ॥ (९)

अग्ने॒ पूर्वा॒ अनू॒षसो॑ विभावसो दी॒देथ॑ वि॒श्वद॑र्शतः ।
असि॒ ग्रामे॑ष्ववि॒ता पु॒रोहि॒तोऽसि॒ य॒ज्ञेषु॒ मानु॑षः ॥

अग्ने । अग्ने पूर्वा अनूषसो विभावसो गतासूषस्स्वपि दीङे[1] । विश्वस्य दर्शनीय[2] । त्वमसि ग्रामेषु[3] विता[4] । पुरोहितो हविर्यज्ञेष्वपि चारण्येष्वसि यज्ञेषु सौमिकेषु । मानुषो मनुष्यहित इति ॥

अग्ने पूर्वा । अग्ने गतास्वप्युषस्सु विभावसो प्राज्वलः सर्वस्य दर्शनीयः । स त्वं ग्रामेष्वसि गृहेषु पुरोनिहितो रक्षिता । आरण्येषु च यज्ञेषु पुरोनिहितो मनुष्यहितः ॥ (१०)

नि त्वा॑ य॒ज्ञस्य॒ साध॑नमग्ने॒ होता॑रमृ॒त्विज॑म् ।
म॒नु॒ष्वद्दे॑व धीमहि॒ प्रचे॑तसं जी॒रं दू॒तमम॑र्त्यम् ॥

नि त्वा । यथा त्वां मनुन्निदधे[5] तथा निधीमहि त्वां जीरम् । जीरः क्षिप्रो जरतेः । कात्यायस्वाह[6] रकिन्त्यः[7] प्रसारणे जीर इति[8] ॥

[1] I am not sure what is written. The second letter looks like ङे. Perhaps the scribe was writing दीदेथ.

[2] Read दर्शनीयः

[3] Read ग्रामेषु or सङ्ग्रामेषु.

[4] Read अविता.

[5] Read मनुर्निदधे.

[6] Reading uncertain.

[7] The first letter is mostly worm-eaten. It may be र or न. The word not intelligible.

[8] The explanation not clear.

नि त्वा यज्ञस्य । निधीमहि त्वां यथा मनुर्निदधे क्षिप्रं तद्वदिति[1] ॥ (११)

यद्देवानां मित्रमहः पुरोहितोऽन्तरो यासि दूत्यम् ।
सिन्धोरिव प्रस्वनितास ऊर्मयोऽग्नेर्भ्राजन्ते अर्चयः ॥

यद्देवानाम् । यदा देवानां मित्रमहस्संहतदीप्ते । मित्रो देद्यतेः[2] । मन्त्रैर्वा[3] मंहनीय । यदि वा मित्राणां पूजयितः । अन्तरो यासि दूत्यं दूत्यं कर्तुं देवं प्रति मध्येन गच्छंस्तथोक्तः । परोक्षश्शेषः । सिन्धोरिव प्रस्वनितास्सञ्जन्त[4] इवोर्मयः । अग्नेर्भ्राजन्ते दीप्तयः ॥

यद्देवानाम् । यदा देवानां मित्राणां पूजयितः मनुष्यैः पुरोहितो देवानां मनुष्याणां मध्ये वर्तमानो यासि दूत्यम् । तदानीं समुद्रस्येव प्रकृष्टशब्दा वीचयः तवाग्ने भ्राजन्ते दीप्तयः ॥ (१२)

श्रुधि श्रुत्कर्ण वह्निभिर्देवैरग्ने सयावभिः ।
आ सीदन्तु बर्हिषि मित्रो अर्यमा प्रातर्यावाणो अध्वरम् ॥

श्रुधि । श्रुत्कर्ण इत्युदारं ब्रुवते[5] । श्रुधि श्रुत्कर्ण । वह्निभिरन्यैरग्निभिर्देवैश्चाग्ने सयावभिः । आसीदञ्चिति[6] स्पष्टम् । येऽध्वरं प्रातरागच्छन्ति ते प्रातर्यावाण इति ॥

[1] This is all that is found in the MS. in the Adyar Library.

[2] Read मेद्यतेः

[3] Perhaps to read मित्रैर्वा.

[4] Perhaps to read प्रस्वनिताश्शब्दायन्त.

[5] Perhaps to read ब्रूते.

[6] Read आसीदन्त्विति.

श्रुधि श्रुत्कर्ण । शृणु श्रवणपरकर्ण हविषां वोढृभिरन्यैः त्वया सहैकगमनै-र्देवैः यज्ञं च प्रातर्गच्छद्भिः अस्मिन् बर्हिषि आसीदन्तु मित्रोऽर्यमा चेति ॥ (१३)

शृण्वन्तु स्तोमं मरुतः सुदानवोऽग्निजिह्वा ऋतावृधः ।
पिबतु सोमं वरुणो धृतव्रतोऽश्विभ्यामुषसा सजूः ॥

शृण्वन्तु । शृण्वन्त्विमं मरुतः शोभनदानाः अग्निजिह्वाः सत्यस्य यज्ञस्य वा वर्धयितारम्[1] । पिबत्विति स्पष्टम् ।

अश्विभ्यामुषसा[2] सजूः (ऋ. वे. ५. ५१. ८)

इति चतुर्थेष्टके[3] न स्पृष्टः देवताभेदात् । तद्धि वैश्वदेवं सूक्तम् । अग्ने-र्जिह्वया ये पिबन्ति सोमं तेऽग्निजिह्वा इति[4] ॥

शृण्वन्तु स्तोमम् । त्वया हूयमानाः शृण्वन्तु स्तोमं मरुतः शोभनदानाः अग्न्यास्या यज्ञस्य वर्धयितारः । पिबतु च सोमं वरुणो धृतकर्मा अश्विभ्यामुषसा च सहितः ॥ (१४)

---

[1] Read वर्धयितारः

[2] अश्विभ्या ends the line. The next is the last line. Since the end of the leaf is narrow, it begins only one inch away from the margin.

[3] Read चतुर्थेऽष्टके.

[4] Here there is the figure 12 to mark the end of the sūkta.

त्वमग्ने वसूँरिह रुद्राँ आदित्याँ उत ।
यजा स्वध्वरं जनं मनुजातं घृतप्रुषम् ॥

त्वमग्ने । त्वमग्ने वस्वादीनिह यज । तदेवैकवदाह[1] । यजा स्वध्वरमिति । मनुजातो मनुष्येषु यो जज्ञे प्रादुर्भवति । घृतमुदकं च यः प्रेरयति ॥

त्वमग्ने वसून् । त्वमग्ने अस्मिन् यज्ञे वस्वादीन् यज । तद्व्यतिरिक्तमपि दैव्यं जनं सुयज्ञं मनुष्येषु प्रादुर्भवन्तं घृतं प्रति गन्तारम् ॥ (१)

श्रुष्टीवानो हि दाशुषे देवा अग्ने विचेतसः ।
तान् रोहिदश्व गिर्वणस्त्रयस्त्रिंशतमा वह ॥

स्पष्टोत्तरा[2] । श्रुष्टीवान उदाराः । श्रुष्टिर्दानम् । श्रुषिः प्रेरणार्थः ।

विश्वस्य हि श्रुष्टये देव ऊर्ध्वः (ऋ. वे. २. ३८. २)

इति । शाख्यायनकं तु वाते वा + स्य[3] श्रुष्टयो यदच्चय[4] इति । विचेतसः सुमतयः ॥

श्रुष्टीवानो हि । क्षिप्रसंभक्तारो हि दाशुषे देवा अग्ने सुमतयः । तान् रोहिदश्व गीर्भिर्वननीय इहावह त्रयस्त्रिंशत्संख्याकान् ॥ (२)

[1] After तदेवैक the letter ह written and scored off. Then व written. Folio 36*b* ends with तदेवैकव. The letter द in the next leaf partly worm-eaten.

[2] The verse No. 2.

[3] After वाते वा a letter completely worm-eaten. Perhaps वाते वाग्रस्य ; not clear.

[4] Read यदर्चय.

प्रियमेधवदत्रिवज्जातवेदो विरूपवत् ।
अङ्गिरस्वन्महिव्रत प्रस्कण्वस्य श्रुधी हवम् ॥
महिकेरव ऊतये प्रियमेधा अहूषत ।
राजन्तमध्वराणामग्निं शुक्रेण शोचिषा ॥
घृताहवन सन्त्येमा उ षु श्रुधी गिरः ।
याभिः कण्वस्य सूनवो हवन्तेऽवसे त्वा ॥

स्पष्ट एवोत्तरसृचः[1] । महिप्रतो[2] महाकर्माः[3] । महिकेरवश्च । केरुः कर्म करोतेः । प्रियमेधा[4] नाम ऋषिः । तत्कुलीनः कण्व इत्येकम् । अन्य-कुलेन[5] इत्यपरम् । प्रिययज्ञाः[6] स एव नरं प्रियमेधा[7] इति तृतीयमिति ॥

प्रियमेधवत् । प्रियमेधादिचतुष्कस्येव महाकर्मन् प्रस्कण्वस्यापि शृणु ह्वानमिति ॥ (३)

महिकेरव । महाकर्माण ऊतये प्रियमेधः त्वामहूषत । ईशानं यज्ञानां अग्निं शुक्रेण तेजसा ॥ (४)

घृताहवन । प्रियघृतहविष्क भजनशील इमाः स्तुतीः शृणु । याभिः कण्वपुत्रा रक्षणाय त्वां हवन्ते ॥ (५)

[1] Read एवोत्तरस्तृचः The verses 3-5.

[2] Read महिव्रतो.

[3] Read महाकर्मा

[4] Read प्रियमेधो.

[5] Read अन्यकुलीन.

[6] Perhaps to read प्रिययज्ञः

[7] धा mostly worm-eaten. Not clear. Perhaps something missing. Perhaps to read नरः प्रियमेध.

त्वां चित्रश्रवस्तम् हवन्ते विक्षु जन्तवः ।
शोचिष्केशं पुरुप्रियाग्ने हव्याय वोळ्हवे ॥

त्वाम् । त्वां चित्रश्रवस्तम ते सर्वै[1] भवन्ते[2] ये मनुष्येषु जाताः । शोचन्त इव ह्येतस्य समिद्धस्य रश्मयः केशा इवेति वाजसनेयकम्[3] ।

इळायास्त्वा पदे वयम् (ऋ. वे. ३. २९. ४)

इत्यत्र अग्ने हव्याय वोळ्हवे इति[4] न विस्रति[5] । तत्र जातवेदःप्रकृतत्वादग्निरप्रधान[6] इति ॥

त्वां चित्रश्रवस्तम । चित्रेण श्रवसा श्रुतेन योऽतिशेते तं त्वां स्तुतिभिर्मनुष्येषु जाता हवन्ते ज्वालाकेशं बहुप्रिय अग्ने हविषो वहनाय ॥ (६)

नि त्वा होतारमृत्विजं दधिरे वसुवित्तमम् ।
श्रुत्कर्णं सप्रथस्तमं विप्रा अग्ने दिविष्टिषु ॥

[1] Read सर्वे.

[2] Read हवन्ते.

[3] The printed edition of S'. B. has शोचन्तीव ह्येतस्य केशाः समिद्धस्य (श. ब्रा. १. ४. १. ३८)

[4] The last pāda in R. V. 3. 29. 4.

[5] Read विसृजति.

[6] जा is completely gone. Only a conjecture. तवेद् is in tact. Then a few syllables completely lost. A few bits alone remain. The visarga and प्रकृतत्वादग्नि only a conjecture from the bits that remain. रप्रधान is in tact.

नि त्वा । स्पष्टा । यस्सर्वत एवात्यन्तं पृथुस्सप्रथस्तमः[1] । दिविष्टष्व-ध्वरेषु[2] । दिवसा वा दिष्टयो[3] दिवादित्येन प्रेरिताः[4] ॥

कुरुःगस्य[5] दिविष्टिषु (ऋ. वे. ८. ४. १९)

इति ॥

नि त्वा होतारम् । निदधिरे त्वां होतारं ऋत्विजं अतिशयेन धनानां लम्भयितारं श्रुत्कर्णं सर्वतः पृथुतमं मेधाविनोऽग्ने दिवसागमनेषु अहर्मुखेषु ॥ (७)

आ त्वा विप्रा अचुच्यवुः सुतसोमा अभि प्रयः ।
बृहद्भा बिभ्रतो हविरग्ने मर्ताय दाशुषे ॥

आ त्वा । आच्यावयन्ति त्वा[6] सुतसोमा विप्रा अन्नं प्रति । बृहन्तं भासमानां[7] बृहन्तो भासमाना इति वा । धारन्ते[8] हविरग्नय इति[9] स्पष्टम् ॥

आ त्वा विप्राः । आगमयन्ति त्वामभिषुतसोमा मेधाविनः सोमलक्षण-मन्नमभि । बृहतीर्दीप्तीर्हविश्च धारयन्तोऽग्ने मर्त्याय यजमानाय होतारः ॥ (८)

[1] Read पृथुस्स सप्रथस्तमः

[2] Read दिविष्टिष्वध्वरेषु.

[3] Read दिविष्टयो.

[4] There are only two small vertical strokes after ता and not a visarga.

[5] Read कुरुङ्गस्य.

[6] Better read त्वां.

[7] Read भासमानं.

[8] Read धारयन्तो.

[9] Read हविरग्ने इति.

प्रातुर्याव्र्णः सहस्कृत सोमुपेयाय सन्त्य ।
इहाद्य दैव्यं जनं बुर्हिरा सादया वसो ॥

उत्तरा च[1] । प्रातरागच्छतो देवान् बलेन मथीतस्सहस्तुतः[2] । इहाद्य दैव्यं जनमित्येकवद्वाक्यस्योपसंहार इति ॥

प्रातर्याव्णः । प्रातर्याव्णो देवान् मथनबलेन कृत सोमपानार्थं भजनीय अस्मिन् यज्ञे बर्हिरासादय दैव्यं जनं वासयितः । पूर्वार्धस्य संग्रह उत्तरः ॥ (९)

अर्वाञ्चं दैव्यं जनमग्ने यक्ष्व सहूतिभिः ।
अयं सोमः सुदानवस्तं पात तिरोअह्न्यम् ॥

अर्वाञ्चम् । इतोमुखं दैव्यं जनं अग्ने यज समानाह्वानैस्सह । तांश्च प्रत्याह अयं सोम इति । यस्सोमं[3] पूर्वेद्युभिषितो[4] परेद्युः प्रातर्भूयते[5] तं तिरोअह्न्यं ब्रुवते । अह्नि तिरोहितेऽप्यास्त इति[6] ॥

अर्वाञ्चं दैव्यम् । अस्मदभिमुख दैव्यं जनं अग्ने यज समानाह्वानैः तत्तदनुचरैः । सहायदेवानाह । अयं सोमोऽभिषुतः शोभनदानाः । तं पिबत पूर्वस्मिन्नहनि तिरोभूते जातम् । अथवा प्राप्तेऽहनि प्रादुर्भूतं इति ॥ (१०)

---

[1] स्पष्ट to be taken from the commentary on the previous verse. उत्तरा is verse No. 9.

[2] Read मथितस्सहस्कृतः

[3] Read यस्सोमः

[4] Read पूर्वेद्युरभिषुतः

[5] Read प्रातर्हूयते.

[6] A few words omitted. Here there is the figure 13 to mark the end of the sūkta.

एषो उषा अपूर्व्या व्युच्छति प्रिया दिवः । स्तुषे वामश्विना बृहत् ॥

एषो उषाः । एषो उषा अपूव्या[1] मुख्या । देवानां व्युच्छति प्रिया सर्वेषां दिवः सकाशात् । स्तौमि वामहं तत्राश्विनौ बृहत् बृहता स्तोत्रेण ॥

एषो उषाः । यतः पूर्वमन्यो न प्रादुर्भवति सैषा अपूर्व्या प्रादुर्भवति दिवो दुहितृत्वात् प्रिया । तत्राहं बृहता स्तोत्रेण वामश्विनौ स्तौमि भवतोः काले ॥ (१)

या दस्रा सिन्धुमातरा मनोतरा रयीणाम् । धिया देवा वसुविदा ॥

या । यौ दर्शनीयौ सिन्धुमातृकौ । सूर्याचन्द्रमसौ हि तौ । तौ चाद्भ्य उदेतः । मनोतरा मनुमन्तरौ रधीणाम्[2] । धिया कर्मणा । देवौ वसूनां लम्भकौ । तौ स्तुष इति ॥

या दस्रा । यौ दर्शनीयौ नदीनां निर्मातारौ धनानामनुमन्तारौ कर्मणा देवौ वसूनां लम्भयितारौ स्तौमि ॥ (२)

वच्यन्ते वां ककुहासो जूर्णायामधि विष्टपि । यद्वां रथो विभिष्पतात् ॥

वच्यन्ते । उच्यन्ते युवयोः स्तुतयो जूर्णायां जीर्णायाम् । अधि लिष्टपि[3] । विष्टपो विष्टभ्नाति भूतानीति । यस्मिन् काले युवयोः[4] रथोऽश्वैः पततीति ॥

[1] Read अपूर्व्या.

[2] Read रयीणाम्.

[3] Read अधि विष्टपि. The letter वि is completely worm-eaten.

[4] Folio 37*a* ends with युव. From भूतानीति, the corner of the leaf is very much damaged, being worm-eaten. The letters can scarcely be made out.

[7] The first letter in the next line lost, as the end of the leaf is broken. न is the first letter seen; perhaps पि is the missing letter and the reading should चतुष्कोऽपि. The passage not clear.

विजानीहि। विविच्य जानीह्यार्यान् दस्यूंश्च। ततोऽव्रताननुशास त्वं यजमानाय वशं नय। सहायो भव यजमानस्य धनस्य चोदयिता। सर्वाण्येव तानि यज्ञेषु वक्तुमहं कामितवानस्मि ॥　(८)

अनु॑व्रताय र॒न्धय॒न्नप॑व्रताना॒भूभि॒रिन्द्रः॑ श्न॒थय॒न्नना॑भुवः ।

वृ॒द्धस्य॑ चि॒द्वर्ध॑तो॒ द्याम॒नक्ष॑तः॒ स्तवा॑नो व॒म्रो वि ज॑घान सं॒दिहः॑ ॥

अनुव्रताय। यजमानाय रन्धयन्नयजमानान् अभृहिः[1] ये देवानाभवन्ति यज्ञैरुपगच्छन्ति तैरिन्द्रः श्नथयन्ननाभुवो[2] मा भूत्[3]। वृद्धस्य चिद्वर्धतः पुनर्वर्धमानस्येन्द्रस्य द्यामिनक्षतो व्याप्नुवत[4] इन्द्रस्य स्तुतिं कुर्वन् वम्र[5] ऋषिः सन्दिहो वल्मीकवपा उपचिता जघान।

वम्रभिः[6] पुत्रमश्रवो[7] अदानम् (ऋ. वे. ४. १९. ९)

वम्रकः पड्भिरुप[8] सर्पदिन्द्रम् (ऋ. वे. १०. ९९. १२)

इति ॥

अनुव्रताय। अनुगतकर्मणे यजमानाय वशं नयन् अयजमानान् आभवद्भिर्वर्धमानैः विपरीतान् विश्लथयन् इन्द्रो वृद्धस्य वर्धमानस्य च शत्रोर्दिवं व्याप्नुवतः स्तूयमानो वमितेषूणां विहन्ति समुपचयान् ॥　(९)

[1] Read आभूभिः

[2] Between श्नथ and य there is another य written below the line.

[3] मा भूत् not wanted.

[4] इनक्ष ends the line. The first letter in the next line lost as the end of the leaf is broken. Perhaps what was written was तो: The space must be more than what is required for तः

[5] म्र completely worm-eaten.

[6] Read वम्रीभिः

[7] Read पुत्रमग्रुवो.

[8] ड्भि not at all legible.

तक्षद्यत्त उशना सहसा सहो वि रोदसी मज्मना बाधते शवः ।
आ त्वा वातस्य नृमणो मनोयुज आ पूर्यमाणमवहन्नभि श्रवः ॥

तक्षत् । इन्द्रस्य[1] । उशना काव्यः । सचा भवन्ति ससश्वस्का[2] + येन[3] बलेन यदा तव बलं तदा तव शवो विबबाध रोदसी मज्मना वेगेन संगते पृथक् चकार । यदि वा रोदस्योर्भयं बाधार्थम् । आवहन् त्वा वातस्य मनोयुजः । वातस्याश्वा वेगवन्तः तथोच्यते[4] । नृमणो बलेनापूर्यमाणं श्रवोऽन्नमभीति[5] ॥

तक्षद्यत्ते । यदा तव बलमुशनाः स्तुतिबलेन समस्करोत् तदा महत्तया द्यावापृथिव्यौ अवबाधते । तदानीं त्वामश्वा वातस्य श्रवणमभ्यावहन् बलेनापूर्यमाणं नृमणो मनोवेगाः । शुष्णान्महान् वातो निर्गतस्तमभ्यवहन् इति ॥ (१०)

मन्दिष्ट यदुशने काव्ये सचाँ इन्द्रो वङ्कू वङ्कुतराधि तिष्ठति ।
उग्रो ययिं निरपः स्रोतसासृजद्वि शुष्णस्य दृंहिता ऐरयत्पुरः ॥

मन्दिष्ट[6] । यदा कविपुत्रे उशनसि सोमेन मन्दिष्ट सचा सन् तदानीमिन्द्रो वङ्कू हरि[7] अध्यतिष्ठत् । वङ्कुरश्वो वकेः कुटिलगत्यर्थात् । अत्यन्तं वङ्कुर्वङ्कुतरः । प्रकृत्यर्थप्रकर्षे[8] तरप्रत्ययो यथा ।

[1] The need for this word not clear.

[2] Passage not clear. This must belong to the next verse. This ends the line.

[3] The first letter in the line lost as the end of the leaf is broken. येन is what is seen.

[4] It ought to be तथोच्यन्ते.

[5] भी mostly worm-eaten.

[6] न्दिष्ट mostly worm-eaten.

[7] Perhaps to read वङ्कूं वङ्कुतरा or वङ्कू हरी.

[8] प्र in प्रकर्षे mostly worm-eaten.

अहन् वृत्रं वृत्रतरं (ऋ. वे. १. ३२. ५)

इति[1] । तत्र वंकुतराविति पुनः प्रकृतेर्निर्देशः प्रत्ययप्रत्ययोगार्थः[2] । यदा[3]

दस्रा दंसिष्ठा (ऋ. वे. १. १८२. २)

यथा वा

गवामसि गोपतिरेक इन्द्र[4] (ऋ. वे. ७. ९८. ६)

इति । उग्र इन्द्रो यर्धि[5] मेगमूपम्[6] । कानि[7] । स्रेतसा[8] मार्गेण । निरस्रजदिति द्विकर्मकः[9] । वैरयश्च[10] शुष्णासुरस्य प्रापकारैद्दाहिकाः[11] पुरः ॥

मन्दिष्ट यत् । कविपुत्रे उशनसि स्तोत्रेण यदा सहाय इन्द्रोऽमन्दिष्ट तदानीमिन्द्रो वङ्कुं वङ्कुतरं च अश्वौ गमनार्थमध्यतिष्ठत् । अथोद्गूर्ण इन्द्रो मेघरूपं शुष्णासुरं स्रोतसापो निरसृजत् । व्यैरयत् शुष्णासुरस्य शिला-संघटिताः पुरः ॥ (११)

आ स्मा रथं वृषपाणेषु तिष्ठसि शार्यातस्य प्रभृता येषु मन्दसे ।
इन्द्र यथा सुतसोमेषु चाकनोऽनर्वाणं श्लोकमा रोहसे दिवि ॥

[1] All the letters after यथ up to मि mostly worm-eaten. Reading only a conjecture.

[2] Read प्रत्ययप्रयोगार्थः

[3] Read यथा.

[4] इन्द्र completely lost as a piece of the leaf is broken off.

[5] Read यर्धिं.

[6] Read मेघरूपम्.

[7] This word seems unwanted. Folio 41*b* ends here.

[8] Read स्रोतसा.

[9] क and one म in र्मं completely worm-eaten.

[10] Read व्यैरयश्च.

[11] Not clear.

आ स्म । आतिष्ठसि स्म रथं वृषपाणेषु सोमेषु । तेषां पानार्थम् । वृषपाणाः सोमाः वृष्णां देवानां पेया इति[1] । शार्यातस्य राजर्षेर्यज्ञे संभृतास्सोमा अभवन् । येषु सोमेषु[2] त्वं मन्दसे । यथेन्द्रस्सुतसोमेष्वन्येषां यज्ञेषु सोमांश्चाकन एवं शातर्यातस्यापि[3] सोमांश्चाकनः । तेनानवाणं प्रश्वलितं[4] श्लोकं यशो दिव्यारोहसे प्रापयसि[5] । च्यवनो भ वै[6] भार्गव[7] शार्यातस्य यज्ञेऽश्विनोराश्विनग्रहमगृह्णात् । तत्र क्रुद्धोऽभूदिन्द्रः । पुनश्चानुनीतस्तत्र सोममपिबत् इति शाट्यायनकोक्तः इति ॥

आ स्मा रथम् । आतिष्ठसि रथं सोमपानार्थम । शार्यातस्य इन्द्रं सोममाजिहीर्षतो हविर्धानात् प्रभृताः सोमाः । येषु त्वं मन्दसे । ततो रथमास्थितवानसि । ततो यथान्येषु सुतसोमेषु सोमान् कामितवानसि एवं तत्रापि कामितवानसि । तन्तो प्रस्खलितं श्लोकं आरोहयः । तत्रापि पानादिति ॥ (१२)

अदंदा अर्भां महते वंचस्यवें कुक्षीवंते वृचयामिन्द्र सुन्वते ।
मेनांभवो वृषणश्वस्यं सुक्रतो विश्वेत्ता ते सवंनेषु प्रवाच्यां ॥

अददाः । अददा अर्भा युवतिम् । महते वृद्धाय । उपस्यवः[8]

[1] इति completely worm-eaten.

[2] सो and ए mark in मे mostly worm-eaten.

[3] Read शार्यातस्यापि.

[4] Read प्रस्खलितं. The nearest approximate of what is written is श्व. Not at all legible.

[5] After प्रा space for two letters left blank. The reading only a conjecture.

[6] Read च्यवनो ह वै.

[7] Read भार्गवः

[8] This word not wanted. Or read वचस्यवे.

स्तोत्रमिच्छते कक्षीवते औशिजाय । वृद्धायां[1] नामेन्द्र सुन्वते । कक्षीवान् कक्ष्यावान् । कक्ष्या रज्जवः याजकानं[2] कक्षं सेवन्ते[3] । सोऽयन्देर्घतमस्यो[4] यद्यपि प्रब्रऋषिः[5] उशिक्प्रसूतत्वात् तस्य कुले वृद्धश्चकाराज्यम्[6] । राजसूयेन चेजे । तत एव राजसूये राजसामसु काक्षीवतं चोपमतः[7] कक्षीवानिति क्षत्र्यनामस्योपपन्नं[8] इति । किञ्च मेनाभवो वृषणश्वस्य राज्ञः सुक्रतो । तत्र शाट्यायकम्[9]—वृषणश्वस्य मेन इति । वृषणश्वस्य मे[10] मेना भूत्वा मघवा कुल उवास इति[11] । तां प्राप्तयौवनां स्वयमेवेन्द्रश्चकमे[12] । तथा च ताण्डकम्—वृषणश्वस्य ह मेनस्य मेनस्य[13] मेनका नाम दुहितांस[14] । तां हेन्द्रश्चकमे इति[15] । मेना मन्य[16] मानयति पुरुषं इति यास्कः[17] । विश्वान्येव तानि ते सवनेषु प्रवाच्यानीति ॥

[1] Read वृचयां.

[2] Read याजकानां.

[3] Read सेवते.

[4] Perhaps to read सोऽयन्दैर्घतमस्यो.

[5] Perhaps to read ब्रह्मऋषिः

[6] Reading corrupt. Perhaps to read वृद्धश्चचार राज्यम् .

[7] Perhaps to read चोक्तम् । अतः

[8] Read क्षत्रियनामास्योपपन्नं.

[9] Read शाट्यायनकम् .

[10] Not clear what the correct reading for मे is. Perhaps to read ह.

[11] इति not wanted here. Or perhaps the quotation ends here and the next is not a part of the quotation.

[12] Perhaps इति to come here. Or this is not a part of this quotation and is not wanted. See previous note.

[13] Repetition of मेनस्य not wanted.

[14] Read दुहितास.

[15] Ṣ. B. 1. 1. 16.

[16] Perhaps to read मान्या. The letter म mostly worm-eaten. Only a conjecture.

[17] What is formed in Yāska is : मेना मानयन्त्येनाः (नि. ३. २१).

अददा अर्भाम्। दत्तवानसि कन्यां महते स्तुतिमते इच्छते कक्षीवते वृचयां नाम भार्यां इन्द्र सुन्वते। तथा मेना चाभवो वृषणश्वस्य सुक्रतो। विश्वानि तानि इमानि ते यज्ञेषु प्रवाच्यानि। अत्र शाट्यायनकम्—वृषणश्वस्य मेन इति। वृषणश्वस्य ह मेना भूत्वा मघवा कुले उवास इति। अथ ताण्डकम्—वृषणश्वस्य मेन इति। वृषणश्वस्य हि मेनस्य मेनका नाम दुहितास। तां हेन्द्रश्चकमे इति। वृषणश्वस्य राज्ञो मेना नाम दुहिता त्वमभवः स्वांशेन। अथ तां चकमे चेन्द्र इत्यर्थः॥ (१३)

इन्द्रो अश्रायि सुध्यो निरेके पज्रेषु स्तोमो दुर्यो न यूपः।
अश्वयुर्गव्यू रथयुर्वसूयुरिन्द्र इद्रायः क्षयति प्रयन्ता॥

इन्द्रः। इन्द्रः श्रयति सुकर्मणो यजमानान्। निरेके नैर्धन्ये सति। निरेको रितिचेः[1]। अपिवा निरेतेः।

आ निरेकमुत प्रियम् (ऋ. वे. ८. २४. ४)

इति धने च दृश्यते।

निरेके[2] चिद्यो हरिवो वसुर्ददिः (ऋ. वे. ८. २४. ३)

वज्रा[3] अंङ्गिरसः पज्रकुलजत्वात्। पज्रो वा अङ्गिरसः पशुकामस्तपोऽतप्यतेचे[4] शाट्यायनकम्। तेष्वस्य स्तोमस्तिष्ठति। यथा गृहद्वारि निमितो[5] यूपः स्तोतव्यः[6]। इन्द्रः[7] पज्रेषु तिष्ठति इत्यपरम्। मत्वर्थीयो

[1] Read निरिचेः
[2] The first letter looks more like रि than like नि.
[3] Read पज्रा
[4] Perhaps to read तप्यतेति च.
[5] Perhaps to read निर्मितो. The letters निमि in tact. The next is mostly worm-eaten. May be the ए mark of तो. Then ता in tact. Reading only a conjecture.
[6] Visarga completely worm-eaten.
[7] Folio 42*a* ends with इ.

युः[1] । तथाच निरुक्तम्—इदंयुरिदं कामधानोऽथापि[2] तद्वदर्थे भाष्यन्ते[3] वसूयुरिन्द्रो वसुमानश्वयुर्गव्यू[4] रथयुर्वसूयुरित्यपि निगमो भवति इति[5] । इन्द्र एव राया[6] प्रथन्ता[7] प्रदाता वसति ॥

इन्द्रो अश्रायि । इन्द्रः स्तोतृभिराश्रीयते । सुकर्मणस्तस्य निर्गमने पज्रकुलजातेष्विन्द्रस्य स्तोमो दुर्यः । यज्ञस्थः । अङ्गिरसः पज्राः । पज्रो वाङ्गिरसः पशुकामस्तपोऽतप्यत—इति शाट्यायनकम् । अश्वादीन् स्तोतृभ्य इच्छन् इन्द्र एव धनस्य प्रदाता निवसति ॥ (१४)

इदं नमो वृषभाय स्वराजे सत्यशुष्माय तवसेऽवाचि ।
अस्मिन्निन्द्र वृजने सर्ववीराः स्मत्सूरिभिस्तव शर्मन्त्स्याम ॥

इदम् । इदं नमस्तोत्रं वृषभाय स्वराजे समित्यशुष्माय[8] । शुष्मो बलं शोषयतीति । तवसे वृद्धाय । अवाचि । अस्मिन्निन्द्र वृजने युद्धे सर्ववीराः प्रसृतवीराः । स्मदिति निपातः सुपर्यायः[9] । त्वया दत्ते शर्मणि सूरिभिः पुत्रादिभिः ऋत्विग्भिर्वा सहिताः सुखं वसेमेति[10] ॥

[1] In दुर्य.

[2] Read कामयानो.

[3] Read भाष्यते.

[4] सुमान completely worm-eaten. The printed editions have वसुमानित्यत्रार्थः instead of वसुमान्.

[5] N. 6. 31.

[6] व and रा completely worm-eaten. Reading only a conjecture.

[7] Read प्रमन्ता.

[8] Read सत्यशुष्माय.

[9] Read सुखपर्यायः

[10] Here there is the figure four to mark the end of the sūkta.

इदं नमः । इदं नमनसाधनं स्तोत्रं वृषभाय स्वयमेव सर्वेषामीश्वराय सत्य-बलाय वृद्धाय अस्माभिः उक्तम् । अस्मिन्निन्द्रोपद्रवे सर्वैर्वीरैर्युक्ता अस्माकं स्तोतृभिश्च सह तव सुखे कल्याणे स्याम ॥ (१९)

त्यं सु मेषं महया स्वर्विदं शतं यस्य सुभ्वः साकमीरते ।
अत्यं न वाजं हवनस्यदं रथमेन्द्रं ववृत्यामवसे सुवृक्तिभिः ॥

त्यं सु । तमिन्द्रं सुमहय । मेषं सर्वज्ञम् । शतं स्तोतारस्सह यस्य स्तोत्रमीरयन्ति । यदि वा शतमश्वा यस्य रथं प्रेरयन्ति ।

न वायन्ति सह्वो[1] देवयुक्ताः (ऋ. वे. ७. ६७. ८)

इति । अत्यमिव पानजं[2] हवनं प्रतिगन्तारं यागार्थं प्रति[3] इन्द्रमावर्तयामि सुवृक्तैः स्तोत्रैः । अत्योऽततोः[4] । अपिवा क्येतेः[5] । वाजोऽश्व इति ॥

त्यं सु मेषम् । तं सुष्ठु पूजय सर्वज्ञं मेधातिथेर्मेषम् । शतं यस्य प्राज्ञाः सहोत्तिष्ठन्ति । वेगवन्तमिवाश्वं रथं हवनं प्रति गन्तारं आवर्तयामि इन्द्रं रक्षणाय स्तोत्रैः ॥ (१)

[1] Read सुभ्वो.
[2] Read वाजं.
[3] यागं प्रति is enough.
[4] Read अत्योऽततेः
[5] Not clear.

स पर्व॑तो॒ न ध॒रुणे॒ष्वच्यु॑तः स॒हस्र॑मूति॒स्तवि॑षीषु वावृधे ।
इन्द्रो॒ यद्वृ॒त्रमव॑धीन्नदी॒वृत॑मु॒ब्जन्नर्णां॑सि॒ जर्हृ॑षाणो॒ अन्ध॑सा ॥

स पर्वतः । स शिलोच्चय इवोदकधारासु अक्षीणो बहुरक्षणो बलेषु[1] ववृधे । इन्द्रो यदा वृत्रमवधीन्नदीनां आवारकम् । वृत्रनिरुद्धान्यर्णांसि न्युब्जन् अधः पातयन् । हृष्यन् सोमेन । अन्धस्सोमेत्तेरिति[2] ॥

स पर्वतः । स शिलोच्चय इव उदकधारास्वक्षीणो बहुरक्षणः शत्रुबलेषु प्रविष्टो ववृधे । इन्द्रो यद्वृत्रमवधीन्नदीनां आवरितारं वृत्रनिरुद्धान्युदकानि तेजोभिर्विध्यन् हृष्यन् सोमेन ॥ (२)

स हि द्व॒रो द्व॒रिषु॑ व॒व्र ऊध॑नि च॒न्द्रबु॑ध्नो॒ मद॑वृद्धो मनी॒षिभिः॑ ।
इन्द्रं॒ तम॑ह्वे स्वप॒स्यया॑ धि॒या मंहि॑ष्ठराति॒ स हि पप्रि॒रन्ध॑सः ॥

स हि । वाचो चारयते:[3] । स वारको वारयितृष्विति निर्धारणम् । वम्रो[4] व्याप्तः । ऊधनि । नभ ऊधः जलस्योद्धरणात् । चन्द्रबुध्नो ह्लादकमूलः । ह्लादयति प्रजा अन्तरिक्षे । यदस्य बद्धकर्म[5] । मदवृद्धः सोमैः वर्धितो मनीषिभिः । मनीषा निपुणा बुद्धिः । इन्द्रं तमह्वो[6] ॥

[1] ब mostly worm-eaten.

[2] Read अन्धस्सोमोऽत्तेरिति.

[3] Perhaps to read द्वरो वारयते: The letter चा mostly worm-eaten.

[4] Read वव्रो.

[5] Not clear. Perhaps this has something to do with the words स्वपस्यया धिया which follow.

[6] Read तमह्वे. The rest of the commentary in this verse missing. There is no break in the MS.

स हि द्वरः । स हि वारयिता वारयितृणां मध्ये वरणीयः श्रद्धेयोऽप्यर्थे । कमनीयबुध्नः स्तोत्रैर्वृद्धो मनीषिभिः । तमिन्द्रमहं शोभनकर्मेच्छया बुध्या ह्वयामि पूज्यतमदानम् । स ह्यन्नेन मां पूरयति ॥ (३)

आ यं पृणन्ति दिवि सद्मबर्हिषः समुद्रं न सुभ्व१ः स्वा अभिष्टयः ।
तं वृत्रहत्ये अनु तस्थुरूतयः शुष्मा इन्द्रमवाता अह्रुतप्सवः ॥

नद्यं[1] स्वा अभिगन्त्यः[2] । तं वृत्रहनने अनुतस्थुर्मरुतः । शोषका इन्द्रं वातरहिताः । वातः शोषः । अह्नतप्सवः[3] भारवहनेऽप्यनन्तरूपा इति ॥

आ यं पृणन्ति । आपूरयन्ति यं दिवि स्थितं सोमं उदधिमिव शोभनभवनाः आत्मीया अभिष्टयः । तं वृत्रहननेऽनुतस्थुर्मरुतः शोषकाः इन्द्रं गमनरहिता अपालयितारोऽहिंसितरूपाः ॥ (४)

अभि स्ववृष्टिं मदे अस्य युध्यतो रघ्वीरिव प्रवणे सस्रुरूतयः ।
इन्द्रो यद्वज्री धृषमाणो अन्धसा भिनद्वलस्य परिधीँरिव त्रितः ॥

अभि । अभिसस्र[4] स्वभूतवृष्टिं वृत्रं सोममदे युध्यतोऽस्याग्रे ऊतयः । यथा लघ्व[5] आपः प्रवणे स्यन्दन्ते । इन्द्रो यदा वज्री यविधन्नन्धसा[6]

[1] Read नद्यः This is how the commentary on the verse begins. The earlier portion missing. No break in the MS.; see note 6; p. 401.

[2] Read अभिगन्त्र्यः

[3] Read अह्रुतप्सवः

[4] Read अभिसस्रुः

[5] Read लघ्व्य.

[6] न्नन्ध worm-eaten and can scarcely be deciphered. Perhaps to read धर्षयन् अन्धसा.

पीतेन । यथाप्त्यस्त्रियमतः[1] परिधीन् कूपस्य द्वारि भ्रातृभ्यां[2] निहितान् । एवं वलमभिनदिति ॥

अभि स्ववृष्टिम् । स्वा वृष्टिर्यस्य तं सेममदे युध्यतः इन्द्रस्यास्य साहाय्यार्थं यथा प्रवणे आपो यन्त्येवं अभिसस्रुर्मरुतः । इन्द्रो यदा वज्री सोमेन धर्षयन् बलमभिनत् पापानीव त्रित आप्त्यः ॥ (९)

परीं घृणा चरति तित्विषे शवोऽपो वृत्वी रजसो बुध्नमाशयत् ।
वृत्रस्य यत्प्रवणे दुर्गृभिश्वनो निजघन्थ हन्वोरिन्द्र तन्यतुम् ॥

वरीम्[3] । घृणा दीप्तिर्जिघर्तेः । अन्तोदात्तः । अश्वश्चेदाद्युदात्तः ।

ह्णा न ये ध्रूजसा[4] (ऋ. वे. ६. ३. ७)

इति । परिवारत्येन[5] दीप्तिः । दीप्तश्चाभवत्[6] बलम् । अपो वृत्वा उदकस्य बुध्ने आशिश्ये अन्तरिक्षे । वृत्रस्य यदा प्रवणे वर्तमानस्य दुर्गृहिश्वनः । दुर्ग्रहगतिशीघ्रो दुर्गृहिश्वेत्याहुः । तस्य । रिजघन्ध[7] हनोरिन्द्र[8] तन्यतुं शब्दकारिणं वज्रम् । हनुर्हन्तेदिरिति[9] ॥

[1] Read यथाप्त्यस्त्रितः

[2] First written भ्रातृव्यां. Then भ्य written below व्य.

[3] Read परीं.

[4] Read घृणा न यो ध्रजसा. Here the accent is on घृ. Folio 42*b* ends with ध्रज.

[5] Read परिचरत्येनम्. The letter वा is partly worm-eaten.

[6] त् completely worm-eaten. Read दीप्तश्चाभवत्.

[7] Read निजगन्थ.

[8] Read हन्वोरिन्द्र.

[9] नु and र्ह mostly worm-eaten. Read हनुर्हन्तेरिति.

परीं घृणा। परिचरति वृत्रं दीप्तिः। बलं च तस्य दीप्तम्। अप आवृत्य अन्तरिक्षलोकस्य बुघ्नमपां मूलं आवृत्य अशयत्। वृत्रस्य यदा प्रवणे दुर्ग्रहश्वासस्य निहितवान् हन्वोरुपरि इन्द्र वज्रं शब्दकारिणम्॥ (६)

ह्रदं न हि त्वा न्यृषन्त्यूर्मयो ब्रह्माणीन्द्र तव यानि वर्धना।
त्वष्टा चित्ते युज्यं वावृधे शवस्ततक्ष वज्रमभिभूत्योजसम्॥

ह्दम्[1]। ह्रदस्सरो ह्रादेः शब्दार्थात्। यथा ह्दममेयो[2] न्यृषन्ति तथा त्वा न्याषन्ति[3] ब्रह्माणीन्द्र तव यानि वर्धनानि। त्वधि[4] पुनः पुनः प्रेर्यन्त इत्यर्थः। त्वष्टा च तव योग्यं बलमवर्धयत्। स ततक्ष वज्रमभिभावुकबलमिति॥

ह्रदं न हि। ह्रदमूर्मय इव त्वां तव वर्धनानि स्तोत्राणि न्यृषन्ति तवोपरि चलन्ति। त्वद्विषये पुनः पुनः प्रवर्तन्ते। त्वष्टा च तव सदृशं बलं वर्धितवान्। अकरोद्वज्रमभिभवितृबलम्॥ (७)

जघन्वाँ उ हरिभिः संभृतक्रतविन्द्र वृत्रं मनुषे गातुयन्नपः।
अयच्छथा बाह्वोर्वज्रमायसमधारयो दिव्या सूर्यं दृशे॥

जघ्यन्वान्[5]। जघन्वान्[6] खल्वश्वैः संभृतकर्मन्निन्द्र वृत्रं मनुषे

[1] Read ह्रदम्.

[2] Read ह्रदमूर्मयो.

[3] Read त्वां न्यृषन्ति.

[4] Read त्वयि.

[5] Read जघन्वान्. There is only slight difference between घ and घ्य. But what is written is definitley घ्य and not घ.

[6] न्व completely worm-eaten.

जनाय गातुमिच्छन्नप: प्रावर्तय इति[1] क्रिया[2] । अयच्छथा बाह्वोर्वज्रमयोमयम् । आथसशब्द:[3] अयेष्वित्यन्तोदात्त:[4] । विस्तृतेष्वाद्युदात्त:[5] ।

हस्तयोर्वज्रमायसम् (ऋ. वे. १. ८१. ४)

वाशीमेको विभर्ति हस्त आयसीम् (ऋ. वे. ८. २९. ३)

आयसीमतरत् पुरम् (ऋ. वे. ८. १००. ८)

विस्तृदेतादाहरणम्[6] —

शतं पूर्भिरायसहीभि:[7] (ऋ. वे. ७. ३. ७)

ऊजो पात्[8] पूर्भिरायसीभि: (ऋ. वे. १. ५८. ८)

इति । अधारयश्च सूर्यं दिवि दर्शनीयमिति[9] ॥

जघन्वान् । जघन्वानश्वै: संभृतप्रज्ञ वृत्रं मनुष्यार्थमपो गमयितुमिच्छन् अग्रही: बाह्वोरायसं आयुधम । अथ तं हत्वा सर्वेषां दर्शनाय दिवि सूर्यमधारय: ॥ (८)

बृहत्स्वश्चन्द्रममवद्यदुक्थ्य१मकृण्वत भियसा रोहणं दिवः ।
यन्मानुषप्रधना इन्द्रमूतयः स्वर्नृषाचो मरुतोऽमदन्ननु ॥

[1] इ looks more like ङ.
[2] Perhaps to read क्रियाध्याहार:
[3] Read आयसशब्द:
[4] Perhaps to read अयोमयेष्वन्तोदात्त:
[5] व part in ष्वा completely worm-eaten.
[6] Read विस्तृते तूदाहरणम्.
[7] Read पूर्भिरायसीभि:
[8] Read नपात.
[9] In the first three cases the accent is on स and सी. In the last two cases the accent is on आ.

बृहत् । बृहत साम । स्वश्चन्द्रश्चन्द्रं[1] ह्लादकं तेजः स्वभूतं यस्य । अमवद्बलवत् । यदोर्थार्हं[2] अकण्वत[3] वृत्रहयेन[4] दिवो रोहणनिमित्तम् । द्युभक्ति हि बृहत् तज्जयार्थं प्रयोज्यम् । यदा च मानुषप्रधना मनुष्यहितसङ्ग्रामा इन्द्रं मरुतः स्वः सर्व एव नृषाचः प्राणा भूत्वा नृत्त[5] सेवमानास्त्वामन्वमदन् । उत्तरत्र सम्बन्ध इति ॥

बृहत्स्वश्चन्द्रम् । बृहत्साम स्वयमेव कान्तं बलवद्यदा प्रशस्यमकुर्वत भयेन स्तोतुर्दिवो रोहणनिमित्तम् । यदा वां मनुष्यहितसङ्ग्रामा इन्द्रं मरुतः स्वर्दिवि स्थितं देवाः सन्तो मनुष्यान् सेवमाना अन्वमदन् । उत्तरत्र संबन्धः ॥ (९)

द्यौश्चिदस्यामवाँ अहेः स्वनादयोयवीद्भियसा वज्र इन्द्र ते ।
वृत्रस्य यद्बद्बधानस्य रोदसी मदे सुतस्य शवसाभिनच्छिरः ॥

द्यौश्चित् । द्यौरपि बलवानस्य हेः[6] स्वनात् हिसहायेन[7] तदानीमकम्पत । यदा च तव वज्रो वृत्रस्य सर्वं जगत् बाधमानस्य शिरश्शवसा तव सोमस्य मदेऽभिनदितिन्द्रम्[8] । तदिदं कर्म रोदस्योर्निवेदयति रोदसी इति ॥

द्यौश्चिदस्य । द्यौरपि बलवान् अस्य अहेः स्वनात् तदानीं भयेन अयोयवीत् अकम्पत । यदा द्यावापृथिवी बाधमानस्य सोमस्य मदे तव वज्रो

[1] Read स्वश्चन्द्रं चन्द्रं.
[2] Read यदोक्थार्हं.
[3] Read अकृण्वत.
[4] Read वृत्रभयेन.
[5] Read नृन्.
[6] Read अहेः
[7] Perhaps to read अहिसहायेन or better अहिभयेन.
[8] Read only मदेऽभिनत्. The part इतिन्द्रम् not wanted.

बलेन वृत्रस्य शिरोऽभिनत् तदा अयोयवीदिति । वृत्र एव आहननात् अहि-
रुच्यते ॥ (१०)

यदिन्न्विन्द्र पृथिवी दशभुजिरहानि विश्वा ततनन्त कृष्टयः ।
अत्राह ते मघवन्विश्रुतं सहो द्यामनु शवसा बर्हणा भुवत् ॥

यदित् । यत्खल्विन्द्रेयं पृथिवी दशभुजिर्दशगुणो भवेत् । यदि चाहानि सर्वाण्येव विस्तारयेयुः मनुष्याः । अत्रैव ते मघवन् विश्रुतं सहो बलं वृत्रवधादिकारणम्[1] । न शत्रूणां बलेन कृतावरिबर्हणा[2] द्यामनुभवति । यथा महती द्यौरेवं[3] महती बहुभिर्महता च कालेन तव बलकृतयः शक्याः प्रकाशयितुमित्यर्थः[4] ॥

यदिन्न्विन्द्र । यद्येवेयमिन्द्र पृथिवी दशगुणा भवति यदि चाहानि सर्वाण्येव विस्तारयेयुः मनुष्याः सर्वदा ब्रुवाणाश्चरेयुरत्रैव ते मघवन् बलकृतं सर्वं कर्म विश्रुतं भवति तव बलेनागतं शत्रुहिंसनं द्युसदृशं भवति महत्तया इति ॥ (११)

त्वमस्य पारे रजसो व्योमनः स्वभूत्योजा अवसे धृषन्मनः ।
चकृषे भूमिं प्रतिमानमोजसोऽपः स्वः परिभूरेष्या दिवम् ॥

त्वम् । व्योमान्तरिक्षं व्यवेः व्याप्तं हि । त्वमस्य व्योमनो रजसोऽन्तरिक्षस्य पारे स्वभूत्योजाः स्वभूतबलोऽवसे[5] सर्वेषां च रक्षणाय सपत्नानां

[1] The आ mark in धा and the letter दि completely worm-eaten.

[2] Perhaps to read कृता अरिबर्हणा.

[3] औ mark in द्यौ completely worm-eaten.

[4] Passage not clear.

[5] Folio 43*a* ends with स्वभू.

घर्षणशीलमनः । कृतवानसीमां भूमिं यस्त्वं बलवतां बलस्य[1] प्रतिमानमसि । तथापस्त्वमपः[2] स्वः सर्वम् । अन्तरिक्षम् । आ दिवश्च[3] दिवश्चैष[4] व्याप्तोषि त्वम् ॥

त्वमस्य पारे । त्वमस्यान्तरिक्षलोकस्यान्ते स्थितः सन् स्वभूतबलो रक्षणार्थं शत्रूणामभिभवनशीलचित्त तिष्ठसि । चकृषे कृतवानसि च भूमिम् । बलवतां बलस्य प्रतिद्वन्द्वि त्वमन्तरिक्षं सर्वं परिभवन् आगच्छसि दिवमिति ॥

त्वं भुवः प्रतिमानं पृथिव्या ऋष्ववीरस्य बृहतः पतिर्भूः ।
विश्वमाप्रा अन्तरिक्षं महित्वा सत्यमद्धा नकिरन्यस्त्वावान् ॥

त्वम् । त्वं भुवः[5] प्रतिमानं[6] पृथिव्या दर्शनीयवीयस्य[7] । देवा वीराः । बृहतः स्वर्गस्य पतिरभवः । विश्वं त्वमाप्रा अन्तरिक्षं महत्वेन । सत्यमर्धा[8] सत्यं तथा सोऽयमर्थः । नास्त्यन्यस्त्वत्सदृश इति ॥

त्वं भुवः । त्वं भुवः प्रतिमानं पृथिव्या दर्शनीयवीरस्य स्वर्गस्य पतिरभवः । विश्वमापूरितवानसि अन्तरिक्षं महत्तया । सत्यं अद्धा इति सत्यनामनी । सत्यं तथैव न त्वत्सदृशः कश्चिदस्तीति ॥ (१३)

[1] ब completely worm-eaten.

[2] Read तथा त्वमपः

[3] श्च not at all legible. Only a conjecture as the nearest approximation.

[4] Repetition of दिवश्च not wanted. Read दिवं चैषि.

[5] भुवः completely worm-eaten.

[6] मानं completely worm-eaten.

[7] व्या and द completely and the top portion of र्शनी lost as the corner of the leaf is broken. Read दर्शनीयवीर्यस्य.

[8] Read सत्यमद्धा.

न यस्य॒ द्यावा॑पृथि॒वी अनु॒ व्यचो॒ न सिन्ध॑वो॒ रज॑सो॒ अन्त॑मान॒शुः ।
नोत स्ववृ॑ष्टिं॒ मदे॑ अस्य॒ युध्य॑त॒ एको॑ अ॒न्यच्च॑कृषे॒ विश्व॑मानु॒षक् ॥

धनयस्य[1] । धस्येन्द्रस्य[2] द्यावापृथिव्यौ व्यचो व्याप्तिं नान्वानशाते । न चान्तरिक्षे[3] स्यन्दमाना आपः[4] यस्य तेजसान्तमानाशुः[5] । अस्यैव वाक्यस्य शेषो नोतेति । किं च सोममदे वृत्रं युध्यतोऽस्य रजसे[6] नानशुरिति । प्रत्यक्ष उत्तरः पादः ॥

न यस्य । यस्येन्द्रस्य द्यावापृथिव्यावपि व्याप्तिं नान्वानशाते । न नद्योऽपि तेजसोऽन्तमापुः । नापि च वृत्रं सोममदे युध्यतोऽस्य तेजसोऽन्तं आनशुः । किं बहुना एक एव त्वं अन्यत्सर्वमनुस्यूतं कृतवानसि ॥ (१४)

आर्च॑न्नत्र॑ म॒रुतः॒ सस्मि॑न्ना॒जौ विश्वे॑ दे॒वासो॑ अमद॒न्ननु॑ त्वा ।
वृ॒त्रस्य॒ यद्भृ॑ष्टि॒मता॑ व॒धेन॒ नि त्वमि॑न्द्र॒ प्रत्या॒नं ज॒घन्थ॑ ॥

एन्वमदन्[7] ।

अनु त्वा पत्नीहृषीतं[8] वयश्च[9] (ऋ. वे. १. १०३. ७)

[1] Read only न यस्य.

[2] Read यस्येन्द्रस्य.

[3] च in चा completely worm-eaten. It may as well be न वान्तरिक्षे.

[4] आ mostly worm-eaten.

[5] Read तेजसोऽन्तमानशुः The आ mark in मा completely worm-eaten.

[6] Read रजसोऽन्तं.

[7] The beginning of the commentary on this verse missing. There is no break in the MS. Read अन्वमदन्.

[8] Read पत्नीर्हृषितं.

[9] व य mostly worm-eaten.

इत्यत्र विश्वे देवा न मरुत एव । ततो न सृष्टः । वृत्रस्य यदा भृष्टिमता युद्धेन । भृष्टिरश्रिश्रैंशयतीति । जनिजघन्थ[1] त्वमानं[2] प्रति । मुखमानम् । अपि वा प्राणमिति[3] ॥

आर्चन्नत्र । प्रहर भगवो जहि वीरयस्व इति सर्वस्मिन्नस्मिन् सङ्ग्रामे मरुत इन्द्रमार्चन् व्याप्ता मरुतो देवास्त्वां अन्वमदन् । मदिः सकर्मकश्च भवति । वृत्रस्य यदा अश्रिमता वज्रेण निजघन्थ त्वमिन्द्राननसाधनं मुखं प्रति ॥ (१९)

न्यू३ षु वाचं प्र महे भरामहे गिर इन्द्राय सदने विवस्वतः ।
नू चिद्धि रत्नं ससतामिवाविदन्न दुष्टुतिर्द्रविणोदेषु शस्यते ॥

न्यू षु । सुनिप्रहराममो[4] वाच[5] महते इन्द्राय । वाग्वचेः । स्तुतय इन्द्राय भवंति[6] यजमानस्य सदने । स हि क्षिप्रमेव रत्नं स्वपतामिव चोरोऽसुराणां विन्दति । न च दुष्टुतिर्धनप्रदेषु[7] शनस्यते[8] । तस्मात् स्तुतिं सुनिप्रभरामह इति ॥

[1] The initial ज not wanted.

[2] The anusvāra not legible.

[3] Here there is the figure six to mark the end of the sūkta.

[4] Read सुनिप्रभरामो or सुनिप्रभरामहे.

[5] Read वाचं.

[6] First written भवति. Than an anusvāra added after व just below the line. Read भवन्ति.

[7] दु looks more like पु.

[8] Read शस्यते.

न्यू षु वाचम् । सुनिप्रभरामहे स्तोत्रं महते इन्द्राय यजमानस्य गृहे स्तुतय इन्द्राय भवन्ति । क्षिप्रमेव हि शत्रूणां रत्नं स्वपतामिव धनं चोरः इन्द्रो विन्दति । ततः प्रभरामहे । तत्र च धनप्रदेषु दुष्टुतिर्न प्रशस्यते । तस्मात् सुष्टु प्रभरामहे ॥ (१)

दुरो अश्वस्य दुर इन्द्र गोरसि दुरो यवस्य वसुन इनस्पतिः ।
शिक्षानरः प्रदिवो अकामकर्शनः सखा सखिभ्यस्तमिदं गृणीमसि ॥

दुरम्[1] । दुरो ददातेः दाता । द्वारवचन आद्युदात्तः[2] ।

अपावृणोद्दुरो अश्मप्रजानाम्[3] (ऋ. वे. १०. १३९. ६)

वसुन[4] इनः स्वामी । इन इनतः[5] प्रेरणार्थात् । पति[6] पालयिता । शिक्षाना[7] उदारः शिक्षां दानं नयतीति । प्रदिवः पुराणः प्रगता बह्वोऽस्य दिवसा इति । यः स्तोतॄणां न कर्शयति कामान् सोऽकाम-शर्शनः[8] । सखा सखिभ्यां[9] । तमिमं[10] स्तुमः ॥

[1] Read दुरः

[2] त्त looks more like र्त.

[3] Read अश्मव्रजानाम्.

[4] A few words left uncommented.

[5] Read इनतेः

[6] Read पतिः

[7] Read शिक्षानरः. The आ mark in न worm-eaten. But it is ना and not न र.

[8] Read सोऽकामकर्शनः

[9] Read सखिभ्यः

[10] Read तमिदं.

दुरो अश्वस्य । दाता अश्वस्य दाता इन्द्र गोश्च असि । दुरो यवस्य धनस्य ईश्वरः पालयिता । शिक्षाया नेता शासिता सर्वेषां पुराणः कामानामकर्शिता सखा सखिभ्यः । तं वयमिदं स्तुमः ॥ (२)

शचीव इन्द्र पुरुकृद्द्युमत्तम तवेदिदमभितश्चिकिते वसु ।
अतः संगृभ्याभिभूत आ भर मा त्वायतो जरितुः काममूनयीः ॥

शचीवः । प्रज्ञावन् इन्द्र बहवोः[1] कर्ता रतिशयेन[2] दीप्त तवैवेदं संभृतं अपिभीतो[3] दृश्यमानं ज्ञायते धनम् । अतः संगृह्याभिभवितः शत्रूणामह्य[4] देहि । मा त्वामिच्छतः स्तोतुः काममूनीकार्षीः ॥

शचीव इन्द्र । प्रज्ञावन् इन्द्र बहूनां कर्तः अतिशयेन दीप्तिमन् तवैवेदमभितो वसु ज्ञायते । अतो वसु नः संगृह्य अभिभवितः शत्रूणां मह्यं देहि । मा त्वामिच्छतः स्तोतुः काममूनीकार्षीः ॥ (३)

एभिर्द्युभिः सुमना एभिरिन्दुभिर्निरुन्धानो अमतिं गोभिरश्विना ।
इन्द्रेण दस्युं दरयन्त इन्दुभिर्युतद्वेषसः समिषा रभेमहि ॥

एभिः । एभिर्दीप्तैस्सुमनाः[5] । एभिः सोमैः । पुनरेभिरिति पूरणप्रायम् । निरुन्धानोऽस्माकं दारिद्र्यं गोभिर्दत्ताभिरश्विना । अश्ववता च धनेन दत्तेन

[1] Read बह्वोः
[2] Read अतिशयेन.
[3] Read अभितो.
[4] Perhaps to read शत्रूणामह्य.
[5] Read एभिर्दीप्तैस्सुमनाः

सुमना भवेति समाप्तिः । इन्द्रेण दस्युं दरयन्तः पृक्तैरिन्दुभिः प्रीतेन[1] । पृथक्कृतद्वेष्टारो[2]ऽन्नेन संरब्धा भवे[3] संगच्छामहे ॥

एभिर्द्युभिः । एभिर्यागदिवसैः एभिश्च सोमैः प्रीयमाणः स्तोतॄणामर्थाभावजनितामर्मातं गोभिरश्ववता च धनेन निरुन्धान इन्द्रो भवति । वयं तेनेन्द्रेण उपक्षपयितारं दस्युं दरयन्तः प्रत्नैः सोमैः पृथक्कृतद्वेष्टारोऽन्नेन संरब्धा भवेम ॥ (४)

समिन्द्र राया समिषा रभेमहि सं वाजेभिः पुरुश्चन्द्रैरभिद्युभिः ।
सं देव्या प्रमत्या वीरशुष्मया गोअग्रयाश्वावत्या रभेमहि ॥

समिन्द्र । संरभेमहि धनेनेन्द्र । समन्नेन । सं बलैर्बहुदीप्तिभिरभिद्योतमानैः । सञ्च देव्यान्त्वदीयया[4] प्रमत्या वीरबलया[5] गोमुखयाश्ववत्या रभेमहि ॥

समिन्द्र राया । इन्द्र धनेन संरब्धा भवेम अन्नेन च । सं बलैः बहूनां स्पृहणीयैः अभिगतदीप्तिभिः । सं च देव्या प्रमत्या यस्या वीरा बलं भवन्ति गोमुखया अश्वयुक्तया ॥ (५)

ते त्वा मदा अमदन्तानि वृष्ण्या ते सोमासो वृत्रहत्येषु सत्पते ।
यत्कारवे दश वृत्राण्यप्रति बर्हिष्मते नि सहस्राणि बर्हयः ॥

[1] Folio 33*b* ends here.

[2] Read पृथक्द्वेष्टारो or पृथक्कृतद्वेष्टारो.

[3] Read भवेम.

[4] Read देव्या त्वदीयया.

[5] First written वीरबलाया. Then आ in ला deleted with a dot above.

ते त्वा । ते त्वा मादका अमदन् । ते[1] त इत्युक्तं तानि वृष्ण्येति । वृष्ण्यसामानाधिकरण्याल्लिङ्गभेदः । वर्षणनिमित्तं वृष्ण्यम् । सोमा एव तयोक्ताः[2] । ते सोमासो वृत्रंहननेषु[3] सतां पालयितः । यदा त्वं कारवे स्तोत्रे दश सहस्राण्युपद्रवाणा[4] न्युबर्हयसि[5] यजमानाय शत्रुभिः प्रतिगत[6] इति ॥

ते त्वा मदा । ते त्वां सोमा अमदन् । तानि वर्षणनिमित्तानि । के ते इत्याह—ते सोमासो वृत्रहननेषु सतां पते । यदा त्वं दशसहस्राण्युपद्रवाणां निबर्हयसि यजमानाय शत्रुभिरप्रतिगतः ॥ (६)

यु॒धा यु॒ध॒मुप॒ घेदे॑षि धृ॒ष्णु॒या पु॒रा पुरं॒ समि॒दं हं॒स्योज॑सा ।
नम्या॒ यदि॑न्द्र॒ सख्या॑ परा॒वति॑ निब॒र्हयो॒ नमु॑चिं॒ नाम॑ मा॒यिन॑म् ॥

युवा[7] । युद्धेनानुसूतं[8] अन्यद्युद्धमुपगच्छसि धृष्णुस्त्वम् । पुरं[9] शस्त्रगुणां सभेदं[10] विनाशयसि बलेन । भूतार्थे लघूत्तरवाक्यार्थसमभिव्याहारात्[11] ।

[1] Read के.

[2] Read तथोक्ताः

[3] Read वृत्रहननेषु.

[4] Read सहस्राण्युपद्रवाणां.

[5] Read निबर्हयसि. The letter सि slightly worm-eaten.

[6] Read अप्रतिगत.

[7] Read युधा.

[8] Read युद्धेनानुस्यूतं.

[9] Add पुरा before पुरं.

[10] Read शत्रूणां सहेदं.

[11] Read लङ्घत्तरवाक्यार्थसमभिव्याहारात्.

अयं च श्यायस्सर्वत्रानुसन्धेयः[1] । प्रपञ्चितञ्च[2] विभक्त्यनुक्रमण्याम्[3] । नम्या नमिना सख्या सहायभूतेन यदा दूरे स्थितं निबर्हयो नमुचिं नाम मायिनमसुरमिति ॥

युधा युधम् । युद्धेनानुस्यूतमन्यद्युद्धमुपगच्छसि धृष्णुम् । पुरेण च पुरं शत्रूणां सहेदं विनाशयसि बलेन । अनुगुणेन इन्द्र मरुद्गणेन दूरे नमुचिं नम असुरं मायाविनं निबर्हयः तदानीमिति ॥ (७)

त्वं करञ्जमुत पर्णयं वधीस्तेजिष्ठयातिथिग्वस्य वर्तनी ।
त्वं शता वङ्गृदस्याभिनत्पुरोऽनानुदः परिषूता ऋजिश्वना ॥

त्वं करञ्जम् । त्वं करञ्जमपि[4] पर्णयं अवसीस्तेजिष्ठया[5] अतिथियस्य[6] कृत्वे कर्तरी[7] । वर्तन्या शक्या[8] । त्वं शतानि वङ्गृदस्य स्वभूता[9] अहिनत्[10] । अनानुदो बली । स ह्यग्रे युद्धे दीयते । यदि वैकवीरः । यस्य युध्यतोऽनुदीयमानोऽन्यस्सहायो न विद्यते । परिषूताः परिगताः । ऋजिश्वना

[1] Read न्यायस्सर्वत्रानुसन्धेयः

[2] Better read प्रपश्चितश्च. The letter ञ्च partly worm-eaten. But it is ञ्च and not श्च.

[3] This is the fifth of the 12 Anukramaṇīs. Cf. n. 3 on p. 168.

[4] Better read करञ्जमपिच.

[5] Read अवधीस्तेजिष्ठया.

[6] Read अतिथिग्वस्य.

[7] Not clear.

[8] Read शक्त्या.

[9] Better read स्वभूतानि. The word पुरः not commented.

[10] Read अभिनत्.

राज्ञा । ऋजिश्वनावष्टस्य[1] वंग्रदसह्य[2] + ग्रस्य[3] पुराण्यभिनदिति ॥

त्वं करञ्जम् । त्वं करञ्जमपिच पर्णयमवधीः तेजिष्ठया शक्त्या दिवोदासस्य रक्षार्थम् । तथा त्वमृजिश्वनः शत्रोः वङ्गृदस्य बह्वीः पुरः अभिनः या ऋजिश्वना राज्ञा परिगताः । ऋजिश्वनः शत्रुपुराण्यवष्टभ्य अवस्थितस्य साहाय्यं कृतवान् । अस्य अनानुदोऽपश्चाद्भावस्य दातेति ॥ (८)

त्वमे॒ताञ्ज॑नरा॒ज्ञो द्विर्दशा॑ब॒न्धुना॑ सु॒श्रव॑सोपज॒ग्मुषः॑ ।
ष॒ष्टिं स॒हस्रा॑ नव॒तिं नव॑ श्रु॒तो नि च॒क्रेण॒ रथ्या॑ दु॒ष्पदा॑वृणक् ॥

त्वम् । त्वमेतान् जनराज्ञो द्विर्दश्य[4] जनपदानां राज्ञो विंशतिं बन्धुवर्जितेन सुश्रवसा रज्ञा[5] उपजग्युषो[6] युद्धार्थम् । तदनुचराणा[7] योद्धृणां संख्या विष्टिमिति[8] । विश्रुतस्त्वं न्यवधीश्चक्रेण[9] दुष्प्रपदनेन[10] रथ्या रथावयवेनेति ॥

त्वमेतान् । त्वं एतान् जनपदानां राज्ञो विंशतिं बन्धुवर्जितेन सुश्रवसा राज्ञा उपजग्मुषः युद्धार्थं तदनुचराणां भटानां इयं संख्या षष्टिमिति । विश्रुतस्त्वं न्यवधीः चक्रेण दुष्पतनेन रथ्यायाम् ॥ (९)

[1] Read ऋजिश्वनावष्टब्धस्य.

[2] Read वङ्गृदस्य.

[3] The first letter in the line worm-eaten. Perhaps to read उग्रस्य.

[4] Read द्विर्दश.

[5] Read राज्ञा.

[6] Read उपजग्मुषो.

[7] Read तदनुचराणां.

[8] Read षष्टिमिति.

[9] ण at the end of the line, lost as the corner of the leaf is broken.

[10] Read दुष्पतनेन.

त्वमा॑विथ सु॒श्रव॑सं॒ तवो॒तिभि॒स्तव॒ त्राम॑भिरिन्द्र॒ तूर्व॑याणम् ।
त्वम॑स्मै॒ कुत्स॑मतिथि॒ग्वमा॒युं म॒हे रा॒ज्ञे यूने॑ अरन्धनायः ॥

त्वमाविथ । त्वमन्नक्षः[1] सुश्रवस्सं[2] राजानं तवेतिभिः[3] । तव त्राणैरिति[4] कुर्वयाणं[5] च । त्वमस्मै सुश्रवसे महते राज्ञे यूने कुत्सादींस्त्रीन् वशमनयः ॥

त्वमाविथ । त्वमरक्षः सुश्रवसं राजानं तवोतिभिः । तथा तव त्राणै-रिन्द्र तूर्वयाणं च । त्वमस्मै सुश्रवसे महते राज्ञे यूने कुत्सादीन् त्रीन् वश-मनयः ॥ (१०)

य उ॒दृचीन्द्र दे॒वगो॑पाः॒ सखा॑यस्ते शि॒वत॑मा॒ असा॑म ।
त्वां स्तो॑षाम॒ त्वया॑ सु॒वीरा॒ द्राघी॑य॒ आयुः॑ प्रत॒रं दधा॑नाः ॥

य उन्द्दचि[6] । ये वयं वयसं[7] उदके कृ कृ[8] देवैर्गुप्ताः सखाय-स्तेऽत्यन्तं कल्याणा आ[9] अभूम तेवयक्षां[10] स्तुयाम स्तुयाम[11] त्वया सुवृत्रा[12] दीर्घतरं चायुः प्रकृष्टतरं दधाना इति[13] ॥

[1] Read त्वमरक्षः
[2] Read सुश्रवसं.
[3] Read तवोतिभिः
[4] Read त्राणैरिन्द्र.
[5] Read तूर्वयाणं.
[6] Read य उदृचि.
[7] This word not wanted.
[8] द at the end of the line, lost as the corner of the leaf is broken. In the next line there is के and then कृ कृ. Read उदर्के:
[9] आ not wanted.
[10] Read ते वयम् । त्वां.
[11] Repetition of स्तुयाम not wanted.
[12] Read सुपुत्रा.
[13] Here there is the figure seven to mark the end of the sūkta.

य उदृचीन्द्र। ये वयमुदर्के देवैर्गुप्ताः सखायः ते अत्यन्तं कल्याणा अभूम। ते वयं त्वां स्तुयाम। त्वया सुपुत्रा दीर्घतरं च आयुः प्रकृष्टतरं दधाना इति अन्नपुत्रयोराशंसनम्॥ (११)

मा नो॑ अ॒स्मिन्म॑घवन्पृ॒त्स्वंह॑सि न॒हि ते॒ अन्तः॒ शव॑सः परी॒णशे॑।
अक्र॑न्दयो न॒द्यो॒३॑ रोरु॑वद्वना॑ क॒था न क्षो॒णीर्भि॒यसा॒ समा॑रत॥

मा नः। मा दा अस्मादस्मिन्[1] मघव + + पद्रवे +[2] सुसंग्रामेषु[3]। न हि तव शवसोऽन्तः पर्यन्तः पर्यवशे[4] भवति। पर्याप्तुमशक्यमित्यर्थः। स त्वमन्तरिक्षे स्थितो रोरूधमाणो[5] नदीरुदकानि क्रन्दयसीति द्विकर्मकः। कथं त्वद्भिया[6] क्षोणीः पृथिवीय + + + + न[7] संगच्छते।

[1] Read अस्मानस्मिन्.

[2] After मघव only a small part of the next letter seen. Then two letters completely lost as the edge of the leaf is broken. Then पद्रवे is in tact. Another letter is lost as the corner of the leaf is broken, and Folio 44*a* ends. The letter before पद्रवे has only उ and not ऊ joined to it, as is quite clear from the final bit. What was written may be पृत्सु पद्रवेषु.

[3] I find a dot above स and ग्रा as if they are deleted. Perhaps the whole passage to read मा दा अस्मानस्मिन् मघवन्नुपद्रवे पृत्सु संग्रामेषु.

[4] Perhaps to read परिणशे.

[5] Read रोरूयमाणो.

[6] Not wanted.

[7] After य about four syllables missing as the edge of the leaf is missing. Perhaps to read पृथिवीयं भियसा भयेन.

कथं[1] चर्मवद्वेष्टिता[2] न भवति ! बहुवचनान्तं वा क्षोणीरिति । विधृता इतिमे[3] लोकाः कथं न संगच्छन्त इति । अन्तश्शब्दो रेफी निपातः सन्नन्तोदात्तः ।

अन्तविच्छन्ति[4] तं जने (ऋ. वे. ८. ७२. ३)

इति । अयं चकारान्त[5] आद्युदात्त इति ॥

मा नो अस्मिन् । मास्मानस्मिन् सङ्ग्रामेषु जायमाने उपद्रवे त्याक्षीः । न ते बलस्य पर्यन्तं केनचिदपि व्याप्तुं शक्यम् । स त्वं नदीरुदकानि क्रन्दयसि रोरूयमाणः । कथं न पृथिव्यस्तिस्रः तव भयेन संगच्छन्ते । भयाद्धीन्द्रस्य भूमयो विधृतास्तिष्ठन्ति ॥ (१)

अर्चा॑ श॒क्राय॑ शा॒कि॒ने॒ शची॑वते शृ॒ण्वन्त॒मिन्द्रं॑ म॒हय॑न्न॒भि ष्टु॑हि ।
यो धृ॒ष्णुना॒ शव॑सा॒ रोद॑सी उ॒भे वृषा॒ वृष॒त्वा वृ॑ष॒भो न्यृ॒ञ्जते॑ ॥

अर्च । अर्चोच्चारय[6] वचः शक्राय बलवते प्रज्ञापते[7] । शृण्वन्तमिन्द्रं पूजयन्नभिष्टुभि[8] । यः शत्रूणां धर्षकेण बलेन रोदसी उभे नृञ्जते[9]

[1] ते and क completely lost as the corner of the leaf is broken. Only a conjecture.

[2] व worm-eaten and indecipherable. Only a conjecture.

[3] Read इमे.

[4] Read अन्तरिच्छन्ति.

[5] चाकारान्त.

[6] य completely lost as the corner of the leaf is broken. Only a conjecture.

[7] Read प्रज्ञावते.

[8] Read पूजयन्नभिष्टुहि.

[9] Read न्यृञ्जते.

प्रसाधयति वशीकरोति । वृषा वृषत्वेन वृषभः । वृषत्वमस्य वर्षणादेव[1] भवति । वृषभो वृषणवा[2] मुष्कवानिति[3] । यास्कस्तु वृषभो वृषति रेतः प्रजां वर्षति वेति[4] ॥

अर्चा शक्राय । उच्चारय स्तोत्रं शक्राय असहायाय प्रज्ञावते । शृण्वन्तमिन्द्रं पूजयन् अभिष्टुहि । यः शत्रूणामभिभविता बलेन उभे द्यावापृथिव्यौ प्रसाधयति वर्षणशीलो वृषभो वृषत्वेन च इति ॥ (२)

अर्चा॑ दि॒वे बृ॑ह॒ते शू॒ष्यं॑१ वचः॒ स्वक्ष॑त्रं॒ यस्य॑ धृष॒तो धृ॒षन्मनः॑ ।
बृ॒हच्छ्र॑वा॒ असु॑रो ब॒र्हणा॑ कृ॒तः पु॒रो हरि॑भ्यां वृष॒भो रथो॒ हि षः ॥

अर्च । उच्चाय[5] दीप्ताय बृहते सुखकरं वचः । स्वक्षत्रं स्वबलम् । यस्य शत्रून् धर्षयतो धृष्टं मनो भवति स इन्द्रो बृहच्छ्रवा मनाकीर्तिः[6] असुरः शत्रूणां क्षेपकोच्चयासुरोऽसुरतो[7] बलरतोऽपि[8] वा असुमान् । बर्हणा परिबर्हणा सपत्नानां हिंसकः । पुरस्कृतो हरिभ्यामश्वाभ्यां वृषभो रथो रमणः[9] स इन्द्रः ॥

[1] र्ष mostly worm-eaten.

[2] Read वृषणवान्.

[3] The उ mark in मु completely worm-eaten. The क in ष्क and वा lost as the corner of the leaf is broken.

[4] What Yāksa says is: वृषभः प्रजां वर्षतीति वा अतिबृहति रेत इति वा । तद्वर्षकर्मा । वर्षणाद्वृषभः (नि. ९. २२).

[5] Read उच्चारय.

[6] Read महाकीर्तिः

[7] Perhaps to read क्षेपकोऽथवासुरोऽसुमतो.

[8] Read बलवतोऽपि.

[9] Read रंहण;

अर्चा दिवे । उच्चारय दीप्ताय महते बलनिमित्तं वचोऽनाश्रितपरबलम् । यस्य शत्रून् धर्षयतो धृष्टं मनः । महाकीर्तिः शत्रूणामसिता शत्रुपरिबर्हणार्थं तस्येन्द्रस्य रथः कामानां वर्षिता अश्वाभ्यां पुरस्क्रियते स्तोतॄणां इति ॥ (३)

त्वं दि॒वो बृ॑ह॒तः सानु॑ कोप॒योऽव॒ त्मना॑ धृष॒ता शम्ब॑रं भिनत् ।
यन्मा॒यिनो॑ व्र॒न्दिनो॑ म॒न्दिना॑ धृ॒षच्छि॒तां गभ॑स्ति॒मश॑निं पृत॒न्यसि॑ ॥

त्वम् । त्वं दिवो महतो नभसस्सानु समुच्छ्रितमद्रूम्[1] । कोपयोऽवाभिनच्चात्मना धर्षकेण सहायेन शंबरम् । यदा मायिनो व्रन्दिनोऽन्योत्[2] स्वबलेन मुन्दूककूर्मन्दिना[3] सृष्टेन[4] धृषकेण[5] मनसा युक्तस्त्वं शितां तीक्ष्णीकृतां गभस्ति गृहीतमशनिं पृतन्यसि प्रेरयसि ॥

त्वं दिवः । त्वं दिवो महतः समुच्छ्रूतं मेघमकोपयः । अवभिन्नवानात्मनैव धर्षयिता शम्बरमसुरम् । यदा मायावतोऽन्यान् स्वबलेन मृदूकर्तुं हृष्टेन मनसा धृष्टं तीक्ष्णं शत्रूणां गृहीतिमशनिमयोधयः तदानीमिति । यद्वा बाहुमशनिं चेति ॥ (४)

नि यद्वृ॒णक्षि॑ श्वस॒नस्य॑ मू॒र्धनि॒ शुष्ण॑स्य चिद्व्र॒न्दिनो॒ रोरु॑वद्व॒ना ।
प्रा॒चीने॑न॒ मन॑सा ब॒र्हणा॑वता॒ यद॒द्या चि॑त्कृ॒णवः॒ कस्त्वा॒ परि॑ ॥

[1] मु after स partly worm-eaten. Still quite decipherable; after त the next letter is म and the line ends. The first letter in the next line is द्रू. Perhaps to read समुच्छ्रूतं मेघम्.

[2] Perhaps to read व्रन्दिनोऽन्यान्.

[3] Perhaps to read मृदूकर्तुमन्दिना.

[4] Read हृष्टेन.

[5] Read धर्षकेण.

नि धत्[1]। निवृणक्षि यदा श्वसतः शुष्णस्य मूर्धनि व्रन्दिनः। अत्र यास्कः। व्रन्दी व्रन्दत्केर्मृदुभावकर्मणः। निवृणक्षति यच्छसनस्य मूर्धेनिरशुष्णस्यादित्यस्य शोषयितुः। रोरूयमाणो धनानीति वा[2] इति। प्राचीनेन[3] प्राचीनेनापराङ्मुखेन मनसा परिबर्हणावता यद्यद्यापि करोति शत्रुवधं कस्त्वा परिभवेत्। अपि वा निरुन्ध्यादिति ॥

नि यद्वृणक्षि। निवृणक्षि यदा शब्दकारिणः शुष्णस्यादित्यस्य शोषयितुः मूर्धनि मृदूकर्तुं स्थितान्युदकानि रोरूयमाणः। शत्र्वभिभवमुखेन वृद्धिमता मनसा यदीदानीमप्येतत् कृणोषि तं त्वां कः परिभवति ॥ (९)

त्वमा॑विथ॒ नर्यं॑ तु॒र्वशं॒ यदुं॒ त्वं तु॒र्वीतिं॑ व॒य्यं॑ शतक्रतो।
त्वं रथ॒मेत॑शं॒ कृत्व्ये॒ धने॒ त्वं पुरो॑ नव॒तिं द॑म्भयो॒ नव॑ ॥

त्वमाविथ। त्वमरक्षो नर्यादींस्त्रीन्। अपि च वैर्यकुलजं[4] तुर्वीतिश्च[5] शतक्रतो। त्वं रथं चरथोक्तम्[6]।

त्वं रथं प्र भरो योधमृष्वम् (ऋ. वे. ६. २६. ४)

[1] Read नि यत्.

[2] What is found in N. is: व्रन्दी व्रन्दतेर्मृदूभावकर्मणः (५. १५). नि यद्वृणक्षि श्वसनस्य मूर्धनि शुष्णस्य चिद्व्रन्दिनो रोरुवद्वना। निवृणक्षि यच्छ्वसनस्य मूर्धनि शब्दकारिणः। शुष्णस्यादित्यस्य च शोषयितुः। रोरूयमाणो वनानीति वा वधेनेति वा (५. १६).

[3] This word not wanted.

[4] Read वय्यकुलजं.

[5] Read तुर्वीतिं च.

[6] Folio 44*b* ends with चरथो. The word not clear.

इति । तथैतशमप्स्मृर्षिं कृत्व्ये धने कर्तव्ये धने । न संग्राम इत्यत्र[1] । उक्तं च ।

यथोत कृत्व्ये धने (ऋ. वे. ८. ५. २६)

इति । वर्णवाच्येततश्शब्दो[2]ऽन्तोदात्तः ।

यदेतरेभिः[3] पतरैः (ऋ. वे. १०. ३७. ३)

इति । त्वं नव नवतिं शंबरस्य पुरो दंभयोऽभिन इति ॥

त्वमाविथ । त्वमरक्षो नर्यादीन् पञ्च शतकर्मन् । तथा कर्मार्हधननिमित्तं त्वं एतशस्य रथं एतशं चावः । त्वं पुरो नव नवतिं चाप्यनाशयः । एतेषां रक्षणप्रकारमितस्ततो वक्ष्यन्ति ऋषय इति ॥ (६)

स घा राजा सत्पतिः शूशुवज्जनो रातहव्यः प्रति यः शासमिन्वति ।
उक्था वा यो अभिगृणाति राधसा दानुरस्मा उपरा पिन्वते दिवः ॥

स घ । स खलु जनो राजा स्तां[4] च पतिर्व्रद्धते[5] । यो दत्तहविष्कः सन्निन्द्रस्य स्तुतिं प्रेरयति । शासशब्दः स्तुतिशासनयोराद्युदात्तः । शासनोदाहरणम् ।

श्रोषण्ये[6] अस्य शासम् (ऋ. वे. १. ६८. ९)

शासिता चेदन्तोदात्तः ।

[1] Passage not clear.

[2] Read वर्णवाच्येतशशब्दो.

[3] Read यदेतशेभिः

[4] Read सतां. The letter त written very close to and below स so that it is स्त and not सत.

[5] Read पतिर्वर्धते.

[6] Read श्रोषन् ये.

अकवारिं दिव्यं शासमिन्द्रम् (ऋ. वे. ३. ४७. ५)

शास इत्था महाँ असि (ऋ. वे. १०. १५२. १)

उक्तानि[1] च योऽभिवदति । हविषा स ह दातास्मै इन्द्र उपराण्यभ्राणि दिवो दोग्धि । पपेरुपरम्[2] । उप्तमिव नभस्यभ्रमिति ॥

स घा राजा । स खलु जनो राजा सतां च पतिः वर्धते दत्तहविष्कः यः शासितारमिन्द्रं प्रति गच्छति प्रीणयति वा । उक्थान्यभिवदति सह हविषा दाता । अस्मै दिवः सकाशादभ्राणि दोग्धि ॥ (७)

असमं क्षत्रमसमा मनीषा प्र सोमपा अपसा सन्तु नेमे ।
ये त इन्द्र ददुषो वर्धयन्ति महि क्षत्रं स्थविरं वृष्ण्यं च ॥

असमम् । असमं बलम् । असमा च बुद्धिः । तथा प्रतिप्रसन्तु[3] भवन्तु[4] सोमस्य पातारो वधकर्मणा । नेमशब्द एतच्छब्दपर्याया[5] ।

उत घा नेमो अस्तृतः[6] (ऋ. वे. ५. ६१. ८)

इति । एतत्वेन्द्र[7] ददुषः स्तोमं दीदिवांसो[8] वर्धयन्ति महद्बलं प्रवृद्धं पुंस्त्वं च । क्वसोः संप्रसारणं प्रथमाया अपि बहुशो दृष्टमिति ॥

[1] Read उक्थानि.

[2] But Yāska has. उपर उपलो मेघो भवति । उपरमन्तेऽस्मिन्नभ्राणि । उपरता आप इति वा (नि. २. २१)

[3] That text has only प्रसन्तु.

[4] व mostly worm-eaten.

[5] Read एतच्छब्दपर्यायः

[6] Read अस्तुतः

[7] Perhaps to read ये तवेन्द्र.

[8] Perhaps to read ददिवांसः

असमं क्षत्रम् । असमं बलमसमा प्रज्ञा । प्रभवन्तु सोमस्य पातार: कर्मणा । नेमशब्दोऽर्धवचन: । केचनेत्यर्थ: । तानाह । ये तवेन्द्र ददिवांसो वर्धयन्ति महत् बलं प्रवृद्धं पुंस्त्वं च ॥ (८)

तुभ्येदेते बहुला अद्रिदुग्धाश्चमूषदश्चमसा इन्द्रपानाः ।
व्यश्नुहि तर्पया काममेषामथा मनो वसुदेयाय कृष्व ॥

तुभ्येत् । तुभ्यमेवैते बहवो ग्रावदुग्धाश्चमससादिन: सोमा इन्द्रपानार्हा: । तानिमान्याप्तुहि[1] । तपीय[2] च इन्द्रियाणां काममेतै: । अथ मनोऽस्माकं वसुदाताय[3] कुरु ॥

तुभ्येदेते । तुभ्यमेवैते बहवो ग्रावदुग्धा: चमससादिन: सोमा: इन्द्रस्य तव पानार्हा: । तानिमान् व्याप्नुहि । तर्पय च आत्मीयं काममेतै: । अथात्मनो मनो वसुदानाय कुरु ॥ (९)

अपामतिष्ठद्धरुणह्वरं तमोऽन्तर्वृत्रस्य जठरेषु पर्वतः ।
अभीमिन्द्रो नद्यो वव्रिणा हिता विश्वा अनुष्ठाः प्रवणेषु जिघ्नते ॥

अपाम् । धरुणशब्दो धारावचना:[4] । अपां धरुणंबरं[5] निरोधकं तमोऽतिष्ठन् । अस्यैव विशदवचनम् । अन्तर्वृत्रस्य जठरेषूदरेषु अन्त:

[1] Read तानिमान् व्याप्नुहि.

[2] Read तर्पय.

[3] Read वसुदानाय.

[4] Read धारावचन:

[5] Read धरुणह्वरं.

पर्वतो मेघोऽतिष्ठदिति । जठर उदरज्ञग्धमस्मिंस्तिष्ठतीति[1] । जठराग्निश्चे-दाद्युदात्तः[2] ।

याभिः[3] पठर्वा[4] जठरस्य मज्मना (ऋ. वे. १. ११२. १७)

इति । अभिजिघ्नतं ईमेना[5] नदीरिन्द्रो वद्रिणा[6] वृत्रेण निहिता विश्वा व्याप्ता अनुष्ठा अनुतिष्ठन्निन्द्रः प्रवणेषु जघ्नते[7] । वृत्रोदरादिन्द्र उदकानि प्रच्यावयति[8] प्रवणेष्वित्यर्थः ॥

अपामतिष्ठत् । अपामतिष्ठत् धारकगह्वरयुक्तं तमः । एतदेवाह वृत्रासुरस्य जठरेषु मेघोऽतिष्ठदिति । अभिजिघ्नते एनं पर्वतं वारकेण मेघेन निहिता विश्वा नदीरनुतिष्ठन् प्रवणेष्विन्द्रोऽभिजिघ्नते इति । द्विकर्मको निष्पेषो हन्तेरर्थः ॥ (१०)

स शेवृधमधि धा द्युम्नमस्मे महि क्षत्रं जनाषाळिन्द्र तव्यम् ।
रक्षा च नो मघोनः पाहि सूरीन् राये च नः स्वपत्या इषे धाः ॥

सः । शमणं[9] रोगाणाम् । तस्मिन् सति यद्वर्धते तदन्नं धनं

[1] After उदर some letter begun and completely scored off. Then ज्ञ written. स्मिं is completely worm-eaten.

[2] त: mostly worm-eaten.

[3] भि mostly worm-eaten.

[4] र्वा completely worm-eaten.

[5] ई written as a र with an anusvāra before and after it.

[6] Read वज्रिणा.

[7] Read जिघ्नते. This word not wanted here, as it has already been taken up.

[8] च्या mostly worm-eaten.

[9] This is how it begins स शमणं. Perhaps स is the Pratika. ण is mostly worm-eaten. It is ण and not न. Read शमनम्.

सावमस्मास्वधियेहि[1] । महच्च बलमिन्द्रञ्जनस्य[2] अभिभवितृ प्रवृद्धम् । रक्ष चास्मान् धनवतः । पाहि च स्तोतॄन् यनाय[3] । मा चास्मान् धेहि शोभनापश्यायान्नाय[4] । अपत्यं[5] पुत्रो नानेन पततीति[6] ॥

स शेवृधम् । स सुखे वर्धमानं सुखकरमन्नमस्मास्वधिधेहि । महच्च धनं जनस्य अभिभवितृ वृद्धम् । रक्ष चास्मान् शत्रुभ्यो हविष्मतः । पाहि स्तोतॄन् । शोभनापत्याय धनाय च अन्नाय च अस्मान् कुरु । इत्यन्नं पुत्रं च आशास्ते ॥ (११)

दिवश्चिदस्य वरिमा वि पप्रथ इन्द्रं न मह्ना पृथिवी चन प्रति ।
भीमस्तुविष्माञ्चर्षणिभ्य आतपः शिशीते वज्रं तेजसे न वंसगः ॥

दिवः[7] । द्युलोकादपि । स्योरुत्वं[8] विस्तीर्णमासीत् । इन्द्रन्त[9] महत्वेन पृथिव्यपि प्रतिभवति । भीमो यस्मादन्ये बिभ्यति । तुविष्ठान्[10]

[1] सावं not intelligible. Perhaps सर्वम्. Read अस्मास्वधिधेहि.

[2] Read बलमिन्द्र जनस्य.

[3] Read धनाय.

[4] Read शोभनापत्यायान्नाय.

[5] Folio 45*a* ends with अप.

[6] Here there is no figure to mark the end of the Sūkta.

[7] दि Partly worm-eaten.

[8] Read अस्योरुत्वं.

[9] Read इन्द्रन्न.

[10] Read तुविष्मान्.

वृद्धिमान् । चर्षणिभ्यो मनुष्यार्थम् । मनुष्याणां[1] आतपकः[2] । निश्रति[3] वज्र + +[4] तैक्ष्ण्यार्थे[5] । यथा तेजनार्थे[6] ऋषभः शृङ्गे इति ॥

दिविश्चिदस्य । द्युलोकादपीन्द्रस्य उरुत्वं विस्तीर्णमासीत् । इन्द्रं न महत्त्वेन पृथिव्यपि प्रतिभवति । भयंकरो वृद्धिमान् मनुष्यरक्षार्थं वज्रं तीक्ष्णीकरोति शत्रूणामातापयिता । यथा ऋषभः शृङ्गैस्तैक्ष्ण्यार्थं निश्यति ॥ (१)

सो अर्णवो न नद्यः समुद्रियः प्रति गृभ्णाति विश्रिता वरीमभिः ।
इन्द्रः सोमस्य पीतये वृषायते सनात्स युध्म ओजसा पनस्यते ॥

सा[7] । स समुद्र इव नदीस्समुद्रियः समुद्रेऽन्तरिक्षे वर्तमानः । प्रतिगृभ्णात्य + +[8] व्याप्ता उरुत्वैः । सोऽयमिन्द्रस्सोमस्य पानार्थं वृषेवाचरति[9] । वर्धते[10] सनाच्चिरादेवारभ्य[11] । अपिवा सनातनस्सनधस्स[12]

[1] ष्या completely worm-eaten. The other letters in the word also slightly injured. Reading only a conjecture.

[2] The word in the text is only आतपः Perhaps to read आतापकः

[3] Read निश्यति.

[4] Read वज्रं. This is the last word in the line. Then at the end of the line space for about two syllables left blank. But nothing except anusvara seems missing.

[5] र्थे mostly worm-eaten. Read तैक्ष्ण्यार्थम्.

[6] र्थे mostly worm-eaten.

[7] Read either सो or सः

[8] After प्रतिगृभ्णात्य space for two syllables left blank. Perhaps to read प्रतिगृभ्णात्यत्यन्तं.

[9] ति completely worm-eaten.

[10] व completely worm-eaten. Only a conjecture.

[11] It seems there is a dot above च्चि in which case it becomes च्चिं.

[12] Read only सनातनस्स. The letter न in सना mostly worm-eaten.

योद्धा सन् ओजसा बलकर्मणा स्तूयते । नद्यो रदनात्[1] । अहावनदता हते तस्माद्द्यो[2] नाम स्थ इति च मन्द्र[3] इति ॥

सो अर्णवः । स समुद्र इव समुद्रपातिनीर्नदीः प्रतिगृह्णाति विविधं श्रिताः सेनाः उरुत्वैः । इन्द्रः सोमस्य पानाय वृष इवाचरति । चिरादेवारभ्य स योद्धा बलमहत्तया स्तोतृभिः स्तूयते ॥ (२)

त्वं तमिन्द्र पर्वतं न भोजसे महो नृम्णस्य धर्मणामिरज्यसि ।
प्र वीर्येण देवतातिं चेकिते विश्वस्मा उग्रः कर्मणे पुरोहितः ॥

त्वन्तम् । त्वं तमिन्द्र पर्वतं नाकार्षिम्भ्योजनाय[4] । न हि भतो भुक्ते[5] । अपिच महो नृम्णस्य[6] धनस्य धर्मणां[7] धारकाणामीशिषो[8] । सोऽयमिन्द्रो देवत[9] वीर्येणातिचेकिते प्रज्ञात आसीदन्येभ्यो बलिभ्यः । किञ्च विश्वस्मै कर्मणे दुत्तगूर्णोयदेवैः[10] पुरोहित इति[11] ॥

[1] Read नदनात्.

[2] Perhaps to read तस्मादा नद्यो.

[3] Read मन्त्र. T. S. 5. 6. 1. 2.

[4] Read नाकार्षीर्भोजनाय.

[5] Passage not clear. Perhaps to read न हि हतो भुङ्क्ते.

[6] ण in म्ण completely worm-eaten.

[7] All letters in this word slightly worm-eaten.

[8] Read धारकाणामीशिषे.

[9] Read देवतासु.

[10] Read उद्गूर्णोऽयं देवैः

[11] After this there is repeated in the correct form: किञ्च विश्वस्मै कर्मणे उद्गूर्णोऽयं देवैः पुरोहित इति.

त्वं तमिन्द्र । त्वं तमिन्द्र स्तोतारं धनप्रदानेन मेघमिव मनुष्याणां भोगाय करोषि । त्वं महतो धनस्य धारकाणां कर्मणामीशिषे । सोऽयमिन्द्रो देवतासु वीर्येणातिप्रचेकिते । विश्वस्मै कर्मणेऽयमुद्गूर्णो यजमानैः पुरो निधीयते ॥ (३)

स इद्वने नमस्युभिर्वचस्यते चारु जनेषु प्रब्रुवाण इन्द्रियम् ।
वृषा छन्दुर्भवति हर्यतो वृषा क्षेमेण धेनां मघवा यदिन्वति ॥

स इत् । स एवारण्ये नमस्युभिः स्तूयते । शोभनमिन्द्रियकात्मीयं[1] बलं जनेषु प्रब्रुवाणश्चरति ।

यदचरस्तन्वा वावृधानः (ऋ. वे. १०. ५४. २)

इति । किञ्च वृषायञ्चमन्दुरुपपादयिता[2] भवति । हर्यन्तः[3] प्रेप्सतः स्तोतुः । पुनर्वृषेति पूरणम् । क्षेमेण युक्तो मघवा यजमानो धेनां स्तुतिं प्रेरयति यदेति ॥

स इद्वने । स एवारण्ये नमस्युभिः स्तूयते जनपदेऽपि । शोभनमिन्द्रियं जनेषु प्रब्रुवाणः प्रकाशयन्निव ब्रुवाण एव । वर्षिता उपच्छन्दयिता भवतीच्छतो वर्षिता । क्षेमं कुर्वन् यजमानानां मघवा यदि स्तुतिवचनं प्राप्नोति ॥ (४)

स इन्महानि समिथानि मज्मना कृणोति युध्म ओजसा जनेभ्यः ।
अधा चन श्रद्दधति त्विषीमत इन्द्राय वज्रं निघनिघ्नते वधम् ॥

[1] Read शोभनमिन्द्रियमात्मीयं. The beginning looks like शेह as well as शोभ.

[2] Read वृषायं छन्दुरुपच्छन्दयिता.

[3] Read हर्यतः

स इत्। स एव महतः सङ्ग्रामान् बलेन करोति। समिथं युद्धं संयन्त्यस्मिन्निति। योद्धायमोजसा योद्धायमोजसा[1] जनार्थम्। अया[2] चन श्रद्दधति सत्यमिन्द्रो बलीति। दीप्तिमते इन्द्रो[3] निहन्ति वेगवन्तमायुधं पर्वतेषु ॥

स इन्महानि। स एव महतः सङ्ग्रामान् बलेन करोति योद्धा बलेन जनार्थम्। यदायं शत्रुषु हन्तारं वज्रं निहन्ति अथास्मै दीप्तिमते इन्द्राय श्रद्धत्ते सत्यमसौ बलवानिति ॥ (५)

स हि श्र॒व॒स्युः सद॑नानि कृ॒त्रिमा॑ क्ष्म॒या वृ॑धा॒न ओज॑सा विना॒शय॑न्।
ज्योतीं॑षि कृ॒ण्वन्न॑वृ॒काणि॒ यज्य॒वेऽव॑ सु॒क्रतुः॒ सर्त॒वा अ॒पः सृ॑जत् ॥

स हि। स ह्यन्नमिच्छन् सदनान्यसुरपुत्राणि[4] कृत्रिमाणि। क्षुधोजसा[5] विनाशयन्। क्षमा[6] क्षमेरभिभवार्थात्। क्षुधा दध्यष्योजसेति[7]। ज्योतींषि कण्वंस्तेनवर्जितानि[8] यज्यवे अवसृजत्युत्तराणि[9] सरणार्थं सुकर्मेति ॥

स हि श्रवस्युः। स ह्यन्नमिच्छन् असुरपुराणि कृत्रिमान्योजसा विनाशयन् भोगसाधनभूतया पृथिव्या वर्धमानो ज्योतींषि कृण्वन् स्तेनवर्जितानि यजमानायावसृजति सरणायोदकानि ॥ (६)

[1] Repetition of योद्धायमोजसा not wanted.
[2] Read अधा.
[3] Read इन्द्राय.
[4] Read सदनान्यसुरपुराणि.
[5] Read क्ष्मयोजसा.
[6] Read क्ष्मा.
[7] Read क्ष्मया दर्धर्ष्योजसा (ऋ. वे. ५. ८४. ३) इति.
[8] Read कृण्वंस्तेनवर्जितानि.
[9] Read अवसृजत्युदकानि.

दानाय मनः सोमपावन्नस्तु तेऽर्वाञ्चा हरी वन्दनश्रुदा कृधि ।
यमिष्ठासः सारथयो य इन्द्र ते न त्वा केता आ दभ्नुवन्ति भूर्णयः ॥

दाना:य[1] मनस्सोमपातरस्तु तवास्मादभिमुखावश्वौ[2] स्तुतीनां[3] श्रोतराकृणुष्व[4] । यन्तृतमा भि[5] सारथयस्ते भवन्ति ये तव स्वभूतात[6] न त्वाभिमन्तर[7] आदभ्नुवन्ति शीघ्राः ॥

दानाय मनः । दानाय मनः सोमस्य पातरस्तु तव । अस्मदभिमुखावश्वौ स्तुतीनां श्रोतराकृणुष्व । यन्तृतमाः सारथयो ये भवन्ति इन्द्र त्वदीयाः न त्वां शत्रूणामभिमननानि भ्रमणशीलानि आदभ्नुवन्ति ॥ (७)

अप्रक्षितं वसु बिभर्षि हस्तयोरषाळ्हं सहस्तन्वि श्रुतो दधे ।
आवृतासोऽवतासो न कर्तृभिस्तनूषु ते क्रतव इन्द्र भूरयः ॥

अप्रक्षितम् । अप्रक्षीणं धनं बिभर्षि हस्तयोनहिभवनीयं[8] तन्वि शरीरे[9] । विश्रुत इन्द्रो धारयति[10] । यथोदकोद्धरणप्रवृत्तैरवताः कूपाः

[1] Read दानाय. The Pratika is not separately given.

[2] Read तवास्मदभिमुखौ.

[3] Folio 45*b* ends here.

[4] The आ mark in र and the letters कृणु completely worm-eaten. Only a conjecture.

[5] Perhaps to read हि.

[6] Read स्वभूताः ते.

[7] Read त्वाभिमन्तार.

[8] Read हस्तयोरनभिभवनीयम्.

[9] सह: omitted.

[10] First written धरयति. Then आ mark inserted between ध and र below the line.

परिवृता भवन्ति तथा तव तनवः कर्तृभिः बलैः कृतैः कर्मभिरावृता भवन्ति । ततश्च तवाङ्गेष्विन्द्र बहूनि कर्माणि भवन्ति । तत्र ताण्डकम् । इन्द्रं सर्वाणि भूतान्यस्तुवंस्तस्यैकमंगमस्तुतमच्चायत्तदस्यैदेतनास्तौत् इति[1] । तदिदं ब्राह्मणमिन्द्रस्य पायुमधिकृत्य प्रवृत्तमिति[2] ॥

अप्रक्षितम् । अप्रक्षीणं धनं बिभर्षि हस्तयोः । अनभिभूतं बलं शरीरे विश्रुत इन्द्रः धारयति । यथोदकोद्धरणपरैः कूपाः परिवृता भवन्ति एवं तवाङ्गेषु तानि तानि बहूनि कर्माणि परिवृतानि । अत्र ताण्डकम्—इन्द्रं सर्वाणि भूतानि अस्तुवन् । तस्यैकमङ्गमस्तुतमचायत्—इति ॥ (८)

एष प्र पूर्वीरव तस्य चम्रिषोऽत्यो न योषामुदयंस्त भुर्वणिः ।
दक्षं महे पाययते हिरण्ययं रथमावृत्या हरियोगमृभ्वसम् ॥

एषः । एष तस्य यजमानस्य चमससादनीर्बहीरिषः[3] सोमान् प्रावोद्यच्छति । यथाश्वो योषामुद्यच्छति मैथुनमाचरन् । भुर्वणिरत्ता भपूतेरत्तिकर्मणः[4] । प्रवृद्धमात्मानं सोमं पाययते महते कर्मणे वृत्रवधादिकाय । हिरस्मयं[5] रथमावृत्य हरिभ्यां युक्तं दीप्तम । अत्र शाट्यायनकम् । यदा वै प्रत्यक्षं भवत्यथैष इत्याचक्षते । यदा वै परोक्षमथ सत् इति ॥

[1] The passage is: इन्द्रं सर्वाणि भूतान्यस्तुवंस्तस्यश्यं एकमङ्गमस्तुतमचायत्तदस्यैतेनास्तौत (ता. ब्रा. ५. ४. १४).

[2] Here there is no figure to mark the end of the sūkta.

[3] Perhaps to read चमससादिनीर्बह्वीरिषः

[4] Perhaps to read भर्वतेरत्तिकर्मणः

[5] Read हिरण्मयं.

एष प्र पूर्वीः । अयं तस्य यजमानस्य प्रोद्यच्छत्यवस्थितानि चमसादीनि बहून्यन्नानि । अश्वो यथा अश्वां मैथुनाय अधःस्थितां दृढं परिगृह्योद्यच्छति । भुर्वणिः अत्ता भर्वतेरत्तिकर्मणः । प्रसिद्धं सोममात्मानं पाययते मरुते वृत्र-हननकर्मणे । हिरण्मयं रथमावृत्य हरिभ्यां युक्तं दीप्तम् ॥ (१)

तं गूर्तयो नेमन्निषः परीणसः समुद्रं न संचरणे सनिष्यवः ।
पतिं दक्षस्य विदथस्य नू सहो गिरिं न वेना अधि रोह तेजसा ॥

तम् । स्तो + + रा[1] नेमन्निषः । ये नमन्त इच्छन्ति ते तथोक्ताः । यदि वा नीतहविष्काः । परीणस इत्याद्युदात्तो मनुष्यनाम भवति परितो गतिरेषामस्तीति ।

युष्माकेण[2] परीणसा तुरासः (ऋ. वे. १. १६६. १४)

इति[3] मारुतं शर्ध उच्यते ।

परीणसं कृणुते तिग्मशृङ्गः (ऋ. वे. ९. ९७. ९)

इति[4] परितो प्यासिमाह[5] अन्तोदात्तः । इनेर्वा प्रेरणार्थात् उत्तरं पादम्[6] । समुद्रमुदधिमिव सञ्चरणे सनिष्यवो यत्र देशे गच्छन्ति तत्र धनमिच्छन्तो

[1] Between स्तो and रा space for about two syllables left blank. Perhaps to read स्तोतारो. The missing letters must be ता and ए mark in रो.

[2] Read युष्माकेन.

[3] In R. V. 1. 56. 2 and 1. 166. 14 the accent is on प the first syllable in परीणस.

[4] Here the accent is on सं the last syllable in परीणसं.

[5] Read व्याप्तिमाह.

[6] Read पदम्.

धिरो भवन्त्येवं धिरो भवन्ति[1] । त्वं च स्तोतः । पतिमिन्द्रं बलस्य विदथस्य प्रख्यातस्य । क्षिप्रमेव सहस्सस्वन्तं[2] अधिरोह यथा गिरिं वेना भ्रण्डवाहनार्थं[3] अधिरोहन्ति तेजसा तेजनेन स्तोत्रेण ।

नू रोदसी[4] अभिना[5] बुध्न्येन (ऋ. वे. ४. ५५. ६)

इत्यत्र समुद्रं न इति पादो[6] न सृष्टः । श्रुतक्रियो भि[7] सः । यदि वा दिन्निरूपार्थमभत्राध्ययनमिति[8] ॥

तं गूर्तयः । तं त्वामुद्युक्ता गमनमिच्छन्तो मनुष्याः सन्नद्धाः प्रतीक्षन्ते समुद्रमिव संचरणकाले द्वीपान्तराद्धनमिच्छन्तो वणिजः । पतिं बलस्य यज्ञस्य च क्षिप्रं बलं त्वमिन्द्र गिरिमिव कान्तः सिंहः तेजसा युक्तोऽधितिष्ठ ॥　　(२)

न घटशरावादिनिष्पादकपरमाणूनामाकारपरिमाणं भिद्यते। पारिमाण्डल्यलक्षणं हीयेत। अतो ज्ञायते विभिन्नाकारः प्रज्ञप्तिस्थो न द्रव्यम् इति। विभिन्नाकारः पुनः परमाणुशो भज्यते [चेत्] तद्बुद्धिर्नियमेन त्यज्यते। न नीलादेरणुशो भञ्जने तद्बुद्धिस्त्यज्यते। अस्मात् आकारभेदः संवृतिसन्मात्रम्। न नीलादिवत् द्रव्यस्थः। तस्मात्पञ्चविज्ञप्तीनामालम्बनप्रत्ययो न बाह्यं रूपादि इतीदमुपपत्त्या संपन्नम्।

६. ननु तदालम्बनप्रत्ययः सर्वथा नास्ति। नैव सर्वथा नास्तीति। तथा चेत् किम्।

PARAMĀRTHA'S CHINESE VERSION

स्त्वानां मुग्धचित्तविकल्पात् षड्विषयविकल्पः प्रवर्तते । अयं विकल्पो यथा बहिर्वर्तते तथा अवभासते । चतृषु प्रत्ययेषु अयं नाम विज्ञानालम्बनप्रत्ययः । अस्य विज्ञानरूपत्वात् अस्माद्विज्ञानस्य जननात् । कस्मात् । इदं विज्ञानं, अन्तर्विषयरूपं भवति[8] अन्तर्विषयाज्जायते इति धर्मद्वयसंपन्नम् । तस्मादन्तर्विषयो गोचर आख्यायते ।

७. पृच्छयते । यथाविषयं विज्ञानं संभवति इतीदमेव युक्तम् । अन्तर्विषयोऽयं विज्ञानैकदेश एककाल उत्पन्नः कथमालम्बनप्रत्ययो भवति[8] । उच्यते । आलम्बनप्रत्ययः सिध्यति । इति । आलम्बनप्रत्ययोऽयं संभवति अद्विधाभावात् । प्रत्यय इति । कदाचित् एककाल उत्पन्नोऽपि अन्यजातस्य धर्मान्तरस्य साधनम् । उत्पत्तिविनाशयो[9] नियतानुबन्धित्वात्[10] । पृच्छयते । क्रमेण

HSUAN CHUANG'S CHINESE VERSION

अन्तः रूपं बहिर्वदवभासमानं
विज्ञानालम्बनप्रत्ययः ।
तदाकारो विज्ञानवर्ती
विज्ञानजनकश्च इत्यभ्युपगमात् ॥

बाह्यविषयो यद्यप्यसन् । तथाप्यस्ति अन्तः रूपं बहिर्विषयाकारमवभासमानमालम्बनप्रत्ययः । चक्षुरादिविज्ञानं तदाकारबद्धं प्रवर्तते तत उत्पद्यते च इति धर्मद्वययुक्तमित्यभ्युपगमात् ।

७. अयमन्तर्विषयाकारः विज्ञानादविभक्तः । विज्ञानकारणप्रत्ययः कथं भवति ।

सहवृत्तिनैयत्यात्
युगपदपि कारणप्रत्ययः ।
पौर्वापर्येण वा प्रत्ययः
तच्छक्त्यर्पणात् ॥

विषयाकारो विज्ञानेन सहवृत्तिनैयत्यात् यगुपज्जातोऽपि विज्ञानकारणप्रत्ययः । नैयायिका आहुः । यद्ययं तेन असहवर्ती भवति ।

PARAMĀRTHA'S CHINESE VERSION

जातयोः कथमालम्ब्यालम्बनरूपम् । उच्यते । हेतुः पूर्वं चेत् पश्चात् फलम् । फलं हि हेत्वनन्तरभावि[11] । न तु हेतुः फलानन्तर[11] भावी । हेतोस्सफलत्वे अवश्यं सत्ता । हेतोर्निष्फलत्वे अवश्यमसत्ता । फलं हेत्वनन्तरभावि[11] सद्वा असद्वा । इदमाख्यायते हेतुफलरूपम् ।

अथ वा शक्त्यर्पणात् क्रमेण आलम्ब्यालम्बन [रूपं] सिध्यति । विषयाकारं विज्ञानं क्रमेण उत्पद्य उत्पादयति । कार्यानुरूपशक्त्युत्पादनेन विज्ञानधारामुत्पादयति ।

पृच्छ्यते । यद्यन्तर्विषयो विज्ञाना लम्बनप्रत्यय उत्पत्तिकारणम् । कथं सूत्रं व्याख्यातव्यम् । सूत्रमाह[12] । चक्षूरूपञ्च प्रतीत्य चक्षुर्विज्ञानमुत्पद्यते । इति विस्तरः । उच्यते । कार्यसहकारिशक्तिस्वरूपमिन्द्रियमुच्यते ।

HSUAN CHUANG'S CHINESE VERSION

युगपज्जातयोरपि [न] कार्यकारणभावो लभ्यते ।

अथ वा पूर्वं विज्ञानाकारः पश्चाद्विज्ञानप्रत्ययो भवन् मूलविज्ञाने स्वानुरूपकार्योत्पादकशक्त्यर्पणादुत्पादयति । इति युक्त्यविरोधात् ।

यदि पञ्चविज्ञानानि केवलमन्तः रूपं प्रतीत्य जायन्ते । कथं पुनरुच्यते चक्षुरादिः प्रत्यय इति ।

PARAMĀRTHA'S CHINESE VERSION

आह । इन्द्रियं किंस्वरूपम् । उच्यते । शक्तिविशेषस्वरूपम् । तत्स्वरूपं केन कारणेनानुमीयते । स्वकार्यात्तच्छक्तिविशेषरूपं विज्ञायते । न चतुर्महाभूतरूपम् ।

८. सा शक्तिर्विज्ञानस्य अविरुद्धा । सा शक्तिर्विज्ञाने वर्तते विज्ञानविभक्ता । अनिर्देश्यं वा तत्स्वरूपम् । यथा मया साधित मिन्द्रियं भवता साधित मिन्द्रियञ्च शक्त्यात्मकं समम् । तयोः को भेदः[13] । एवं शक्तिर्विषयाकारावभासश्च अन्योन्यहेतुकौ । तथा शक्ति विषयाकारावभासश्चोत्पद्य अनादिकालात्तथा आगच्छतः । इन्द्रियाख्यशक्तिमाश्रित्य अर्थाख्यमन्तर्विषयरूपञ्च प्रतीत्य संक्षुभितं विज्ञानमनिर्देश्यरूपम् । अयं धर्म अन्योन्यहेतुकः अनादिकालश्च प्रवर्तते । कस्मात् । कदाचित् शक्तिपरिपाकात् विज्ञानं विषयाकारं

HSUAN CHUANG'S CHINESE VERSION

८. विज्ञाने शक्तिरूपाणि
इन्द्रियाणि युज्यन्ते ।
शक्तिर्विषयश्चाना-
दिकालमन्योन्यहेतुकौ ॥

विज्ञानारम्भानुमानेन ज्ञायते इन्द्रियमस्तीति । तत् केवलं शक्तिः न तु बाह्यकृतमिति । अतो मूले विज्ञाने पञ्चशक्तिरूपाणि चक्षुरादीन्द्रियाणि आख्यायन्ते । [इतीदं] न युक्तिविरुद्धम् । शक्तिविज्ञानारम्भन्यायाभेदात् विज्ञानवर्तिनी अन्यवर्तिनी वा । अनिर्देश्यापि [वा] । बाह्यधर्मत्वे युक्त्यभावात् सा विज्ञानवर्तिनी नान्यवर्तिनी इति नियमेनाभ्युपगन्तव्यम् । तच्छक्तीन्द्रियं पूर्वविषयरूपञ्च अनादिकालादन्योन्यहेतुके ।

PARAMĀRTHA'S CHINESE VERSION

प्रवर्तते । कदाचित् विषयाकारविज्ञानाच्छक्तिः सिध्यति । विज्ञानमुभयभिन्नं वा उभयाभिन्नं वा अनिर्वाच्यं वा । एव मन्तर्विषयो धर्मद्वयविशिष्टत्वात् विज्ञानगोचरो भाव्यः ॥

अनाकारचित्तविषयशास्त्रम्

HSUAN CHUANG'S CHINESE VERSION

तथाहि । सा शक्तिः परिपाकप्राप्ता विज्ञाने पञ्चान्तर्विषयरूपाणि अवभासयति । इमानि अन्तर्विषयरूपाणि पुनः पाकान्तरेण विज्ञाने पञ्चेन्द्रियशक्तीरर्पयन्ति । इन्द्रियविषय [ख्य]रूपद्वयं विज्ञानाद् भिन्नमभिन्नं वेति[3a] यथेष्टमुच्यताम् । एवं विज्ञानानामन्तर्विषयाकार एवालम्बनप्रत्यय इत्युपपत्त्या निपुणं साधितम् ॥

आलम्बनप्रत्ययपरीक्षा शास्त्रम्

[4] Lit. यदि.

[5] Lit. यथा तदाकार०.

[6] The chinese text has a negative particle 'wu, just before these two words. It is to be omitted to make the sense more correct.

[7] No case sign in Chinese

[8] Lit. क्रियते.

[9] Lit. अनुत्पत्ति.

[10] Or—अनुरुद्धत्वात्.

[11] Lit. हेत्वनुसारि.

[12] Cf. Madhyamakavṛtti, ed. L. V. Poussin, p. 6, l. 3 with note thereon.

[13] न कोऽपि भेदः इति शेषः ।

[1] Lit. ०नानि उद्दिश्य.

[2] Lit. आलम्बनभावभाग्विज्ञान०.

[3] =ou=bowl.

[3a] To put more literally this phrase: ०रूपद्वयं. विज्ञानेन एक मन्यद्वा, अथवा नैकं ना० यद्वा०.

आलम्बनपरीक्षाव्याख्या*

आचार्यधर्मपालकृता

दुर्मेधसां प्रज्ञां प्रदीपयितुं दोषावरणं तिरस्कर्तुञ्च यो[1] जगाद[2] । [तं] प्रणम्य अयमर्थः परीक्ष्यते ॥

चक्षुरादिविज्ञानानां [. . .] कल्पयन्ति । इति ।

हेयस्य हानमुपादेयस्य वोपादानं परीक्षाफलम् । अतो हेयार्थस्य [त]द्विपरीतस्य च हेतुः प्रदर्श्यते । तत्र स्वयूथ्या वदन्ति । यत् रूपं चक्षुश्चाश्रित्य पञ्चविधविज्ञानानि [भवन्ति] इति परे कल्पयन्ति । [तत्] संगृह्णीम इति । परे तानि [3]एकोन्मुखानि वस्तुप्रत्ययानि इति प्रतिपद्यन्ते । अतो मनोविज्ञानं न युक्तम् । एकोन्मुखत्वाभावात् रथादि[वत्] संवृतिसत्प्रत्ययत्वाभ्युपगमात् । यद्यपि मनोविज्ञानं गोचरं वस्तु प्रतीत्य साकारम्[4] । [तथापि] विज्ञानाकारविहीनमतद्विषयमपि गृह्णाति । चक्षुरादिविज्ञानस्य अविनाभूतः [5]प्रसिद्धो विषयः आकारः[6] सिद्धः । तस्मात् नास्य

* This commentary has been rendered into Sanskrit from the Chinese version of I-Ching.

[1] Lit. यदि.

[2] Lit. गदितुं शक्तः

[3] =नियतैकबाह्यपदार्थगोचराणि.

[4] Lit. सावयवम् .

[5] Or अविनाभूतो विषयः प्रसिद्धय (or सिद्धिं लब्ध्वा), etc.

[6] Lit. प्रदेशः=fang.

[7]मर्यादा प्राप्यते । किञ्च अभ्यासज्ञान[8]बोध्यरूपतत्त्वस्य तर्कागोचरत्वात् दृश्यवत् प्रतिष्ठितत्वाच्च इहेदं [तत्त्वं] श्रवणमननभावनाजन्यज्ञानमात्रविषयः । तथा मनोविज्ञानालम्बनार्थोऽत्यन्तमभावः सिध्यति । अस्य स्वसन्ततावशक्तप्रत्ययत्वात् । गतानागतप्रत्यययोः पुनरवस्तुत्वात् असंस्कृतवत् । तदर्थमादिवचनं पञ्चविज्ञानकायसंग्राहकम् ।

तर्हि इन्द्रियविज्ञानगृहीतं सर्वं मनो विजानाति । इति चेत् । तदपि कथम् । नैतदिन्द्रियविज्ञानसमकालम् । अनन्तरं वा । रूपाद्यालम्बनस्य निरुद्धत्वात् । न वा वर्तमान [आलम्बन] प्रत्ययः । इन्द्रियविज्ञानगृहीतत्वात् । तन्मनोविज्ञानं स्वतो बाह्यार्थग्रहणस्वभाव[श्चेत्] । तदा बधिरान्धादीनामभावः स्यात् । अनुमानविरोधि च इन्द्रियान्तरम् । अधिकरूपनिराकरणस्य इष्टत्वात् । तथा मनोविज्ञाने न पुनराग्रहः[9] । चक्षुरादिविज्ञानानि [10]रूपमाश्रित्य [11]आकारवन्ति । अनावरणमक्रियास्वभावमात्रम् । अतोऽभावः स्वयमभ्युपगम्यते । तथैव [12]करणं मनः । तदालम्बनं [13]प्रत्यक्षभावि । ग्राह्यस्वभावत्वेन अत्यन्तविषमगतित्वात् । तदालम्बनतानिराकरणं सम्यक् मन्यामहे । तेन च तदाश्रयतानिराकरणम् । समकालीनशक्तिरूपेन्द्रियं तत्कल्पयिष्यति[13] । अथापि आह ।

बाह्यार्थ इति ।

[7] Or व्यवस्था.

[8] Lit. अभ्यासकार्यज्ञान.

[9] tsun-huai, to preserve and cherish.

[10] Lit. रूपाश्रयप्रत्ययानि.

[11] Lit. प्रदेशवन्ति.

[12] pen=root, मूल, etc.

[13] The translation (तदालम्बनं . . . कल्पयिष्यति) is tentative.

अग्ने वाजस्य गोमत ईशानः सहसो यहो ।
अस्मे देहि जातवेदो महि श्रवः ॥

गौतमस्यार्षम् । हे अग्ने वाजस्य अन्नस्य । कीदृशस्यान्नस्य । उच्यते । गोमतः गोभिः सहितस्य । त्वं ईशानः ईश्वरः इत्यर्थः । हे सहसः यहो बलस्य पुत्र । यत एवमतो ब्रवीमि । अस्मे अस्मभ्यम् । देहि धेहि । हे जातवेदः जातप्रज्ञान उत्पन्नधन वा । किं पुनर्ददामि । उच्यते । महि महत् । श्रवः अन्नं कीर्तिं वा ॥

गौतमः । हे अग्ने वाजस्य अन्नस्य । गोमतः गोसहितस्य । ईशानः त्वम् । हे सहसो यहो बलस्य पुत्र । यहुः पुत्रः । बलान्मथ्यमानो विजायते (ऐ. ब्रा. ८. २८) इति हि ऐतरेयकम् । अस्मे अस्मभ्यम् । देहि प्रयच्छ । हे जातवेदः । महि महत् । श्रवः अन्नम् ॥ (३)

अग्ने यजिष्ठो अध्वरे देवान् देवयते यज ।
होता मन्द्रो विराजस्यति स्रिधः ॥

विश्वामित्रस्यार्षम् । हे अग्ने । यजिष्ठः इत्येतद्धोता मन्द्रो विराजति इत्यनेन सम्बन्धयितव्यः । अध्वरे यज्ञे । देवान् इन्द्रादीन् । देवयते । देवान् यष्टुमिच्छति यः स देवयतिः । तस्मै देवयते । तादर्थ्यलक्षणैषा चतुर्थी । देवान् यष्टुमिच्छतः ममार्थाय । यज । एवमयमर्धर्चः आमन्त्रण-योगान्मध्यमपुरुषयोगाच्च प्रत्यक्षकृतो मन्त्रः । न च यजिष्ठः होता मन्द्र इत्येवमादीनि आमन्त्रितानि । अतो यत्तच्छब्दावध्याहृत्यैकवाक्यतां नेयानि। यस्त्वं यजिष्ठः अतिशयेन यष्टा । यश्च होता आह्वाता । यश्च त्वं मन्द्रः स्तुत्यः । यश्च त्वं विराजसि विविधं दीप्यसे । कथं पुनः राजसि । उच्यते ।

अति सृधः अतीत्य शोषयितॄन् रक्षःपिशाचादीन् । स देवान् यष्टुमिच्छतो ममार्थाय देवान् यज ॥

विश्वामित्रः । हे अग्ने यजिष्ठः यष्टृतमः त्वम् । अध्वरे अस्मिन् । देवान् यज देवयते देवानिच्छते यजमानाय । होता आह्वाता देवानाम् । मन्द्रः । मदेः स्तुतिकर्मणः । स्तुत्यः त्वम् । सृधः हिंसकान् शत्रून् । अति अतीत्य विराजसि ॥ (४)

जज्ञानः सप्त मातृभिर्मेधामाशासत श्रिये ।
अयं ध्रुवो रयीणां चिकेतदा ॥

त्रितस्यार्षम् । जज्ञानः । प्रथमैकवचनमिदं षष्ठ्येकवचनस्य स्थाने द्रष्टव्यम् । जज्ञानस्य । यजमानस्येत्यर्थः । सप्त मातृभिः । तृतीयाबहुवचनमिदं प्रथमाबहुवचनस्य स्थाने द्रष्टव्यम् । सप्तसङ्ख्याकाः मातरः निर्मातारः आदित्याद्याः । अथवा सप्त मातरः सप्त छन्दांसि । अथवा सप्त होत्राः । अथवा सप्त सोमसंस्थाः । ताभिः सप्त मातृभिः । मेधां प्रज्ञाम् । आशासत प्रार्थितवन्त इत्यर्थः । किमर्थम् । उच्यते । श्रियै तस्यैवाग्नेः श्रियोऽर्थम् । न केवलं मेधां प्रार्थितवन्तः । किं तर्हि । अयमग्निः । ध्रुवः शाश्वतः । नित्य इत्यर्थः । रयीणां धनानां च । दाता भवत्विति वाक्यशेषः । किमेवमज्ञात्वैव दाता भवतु । उच्यते । आचिकेतत् आभिमुख्येन चिकेतत् । जानात्वित्यर्थः । यस्य यावद्दातव्यम् । अथवा यानि द्रव्याणि जानाति तेषां सर्वेषां दाता भवत्वित्येतत्प्रार्थयते ॥

त्रितः । जज्ञानः जनितः अभिष्टुतः । जनेर्लिटः कानचि रूपं जज्ञान इति । सप्त सप्तभिः सर्पणशीलाभिः । मातृभिः अद्भिः । वसतीवरीभिः संसृष्टाः अभिषूयन्ते सोमाः । मेधां प्रज्ञां यज्ञादिविषयाम् । आशासत आशास्ति विधत्ते ।

यजमानानां श्रिये श्र्यर्थम् । अयं ध्रुवो निश्चलः सोमः । रयीणां धनानाम् । धनानीत्यर्थः । आचिकेतत् । अभिज्ञापयतु प्रकाशयतु । प्राणा शिशुर्महीनाम् (सा. वे. ६. ८. ९) इति पावमानात् सूक्तात् एषा उद्धृता ॥　　(५)

उत स्या नो दिवा मतिरदितिरूत्या गमत् ।
सा शंताता मयस्करदप स्रिधः ॥

इरिम्बिठिर्नाम ऋषिः । तस्येदमार्षम् । उत अपि अग्नेः प्रसादेन स्य स्यामः । नः अस्माकम् । षष्ठीनिर्देशाज्जज्ञे इति वाक्यशेषः । दिवा अहनि । मतिर्ज्ञात्री । अदितिर्देवमाता । कीदृशी देवमाता । उच्यते । ऊती पालयित्री । आगमत् आगच्छत् । एत्य च सा शंताता । शं सुखम् । तत् या करोतीति शिवशमरिष्टस्य करे (पा. ४. ४. १४३) इत्येवं तातिप्रत्ययः । शंताता सुखस्य कर्तृ इत्यर्थः । मयस्करत् सुखं करोतु । कथं पुनः सुखं करोतु । उच्यते । अप स्रिधः अप शोषयितॄन् रक्षःपिशाचादीन् । घ्नन्तीति वाक्यशेषः ॥

इरिम्बिठिः । उतेत्ययं दिवेत्यस्योपरि संबन्धनीयः स्यात् । स्यच्छब्दोऽपि तच्छब्देन समानार्थः । तस्य प्रथमैकवचने रूपं स्येति । प्रसिद्धा सा देवानां माता । नः अस्मान् । दिवा उत दिवापि । नक्तमपीति अपिशब्दात् ज्ञायते । अदितिर्नो दिवा पशुमदितिर्नक्तमद्वयाः (ऋ. वे. ८. १८. ६) इति पूर्वस्यामृचि विद्यते । मतिः मननीया स्तुत्या । अदितिः देवी । ऊती ऊत्या रक्षया सह । आगमत् आगच्छतु । सा अदितिः शंताता शंतातौ शंकरे यज्ञे । शिवशमरिष्टस्य करे (पा. ४. ४. १४३) इति शंशब्दात् तातिप्रत्ययः । मयः सुखम् । करत् करोतु । अपबाधतां स्रिधः हिंसकान् शत्रून् ॥　　(६)

ईडिष्वा हि प्रतीव्यं यजस्व जातवेदसम् ।
चरिष्णुधूममगृभीतशोचिषम् ॥

विश्वमनसः आर्षम् । हे मदीय अन्तरात्मन् । अग्निं ईडिष्व । स्तुहीत्यर्थः । हीति पादपूरणः । कीदृशमग्निम् । उच्यते । प्रतीव्यं महाभूतत्वात्सर्वगतम् । न केवलं स्तुह्येव । किं तर्हि । यजस्व यज च । कीदृशमग्निम् । उच्यते । जातवेदसमुत्पन्नज्ञानं उत्पन्नधनं वा । चरिष्णुधूमम् । चरणशीलः चरिष्णुर्धूमो यस्य स चरिष्णुधूमः । तं चरिष्णुधूमम् । अगृभीतशोचिषम् । हृग्रहोर्भश्छन्दसि हस्य (वा. ८. २. ३२) इति हकारस्य भकारः । अगृहीता अनिरुद्धा अप्रतिरुद्धा दीप्तिर्यस्य सोऽगृहीतशोचिः । तं अगृहीतशोचिषम् । अगृहीतदीप्तिमित्यर्थः ॥

द्वयोर्विश्वमना वैयश्वः । यजस्व जातवेदसमग्निमिति ऋषिरात्मानमेव प्रेषयते । चरिष्णुधूमं चरणशीलं धूमम् । अगृभीतशोचिषं अगृहीतार्चिषं कैश्चिदपि ॥ (७)

न तस्य मायया चन रिपुरीशीत मर्त्यः ।
यो अग्नये ददाश हव्यदातये ॥

विश्वमनस आर्षम् । न तस्य यजमानस्य । मायया प्रज्ञया च । नशब्दः पादपूरणः । रिपुः शत्रुः ईशीत । लडर्थे लिङ्प्रत्ययः । ईशीत इशते । मर्त्यः मनुष्यः । यः किं करोति यजमानः । उच्यते । यः अग्नये ददाश ददाति । किम् । सामर्थ्याद्धवींषि । कथं पुनर्ददाति । उच्यते । हव्यदातये । चतुर्थ्येकवचनमिदं तृतीयाबहुवचनस्य स्थाने द्रष्टव्यम् । हव्यदातिभिः हविर्दानैः । एतदुक्तं भवति । हविषां यानि दानानि याज्यानुवाक्यवन्ति तैर्यो ददाति । यः अग्नये यागं करोतीत्यर्थः ॥

तस्य यजमानस्य । न ईशीत मर्त्यः नरः । न नियामको भवेत् । मायया वञ्चनेन । चनेति चार्थे । रिपुः शत्रुः मर्त्यः । यो जनः अग्नये च ददाश ।

दाशतिर्दानकर्मा प्रीणनकर्मा च । प्रीतिमुत्पादयति स्तोत्रैः । हव्यदातये हव्य-दानार्थम् ॥ (८)

अप त्यं वृजिनं रिपुं स्तेनमग्ने दुराध्यम् ।
दविष्ठमस्य सत्पते कृधी सुगम् ॥

ऋजिश्वन आर्षम् । अपेत्युपसर्गश्रवणात् त्यमिति च कर्मश्रुतेः क्रियापदमध्याह्रियते । अपनय । त्यम् । त्यशब्दस्तच्छब्दपर्यायः । तच्छब्दश्रुतेश्च योग्यार्थसम्बन्धो यच्छब्दोऽध्याहर्तव्यः । यदस्मासु व्यवस्थितं तत् वृजिनं पापम् । रिपुं शत्रुं च । स्तेनं चोरं च । दुराध्यम् । कुत्सितं आभिमुख्येन ध्यानं यस्य स दुराध्यः । तं दुराध्यं कुत्सितध्यानम् । पापसङ्कल्पमित्यर्थः । किं च दविष्ठं अतिशयेन दूरवन्तम् । अत्यन्तं दूरस्थमित्यर्थः । अस्य च रिपोः स्तेनस्य च । सत्पते सतां पालयितः । कृधि कुरु । किं पुनर्दूरस्थं करोमि । उच्यते । सुगम् । सुगशब्दः सुखशब्दपर्यायः । अथवा सुगमिति सुगतिरुच्यते । सुगतिं स्वर्गप्राप्तिम् । यथा सुखं स्वर्गं वा न प्राप्नोति तथा कुर्वित्यर्थः ॥

ऋजिश्वा भारद्वाजः । अप इत्ययं अस्येत्युपरितनेन संबध्यते । अपास्य अपक्षिप । त्यं तम् । हे अग्ने वृजिनं कुटिलम् । रिपुं बाधकम् । स्तेनम् । स्त्यानमस्मिन्न इति स्त्येनः । तम् । दुराध्यं दुष्टा आधिराराधनं यस्य तम् । दविष्ठं दूरतमम् । अपास्य इति संबन्धः । हे सत्पते सतामार्याणां पालयितः । कृधि कुरु । सुगं सुखेन गम्यं पन्थानम् ॥ (९)

श्रुष्ट्यग्ने नवस्य मे स्तोमस्य वीर विश्पते ।
नि मायिनस्तपसा रक्षसो दह ॥

विश्वमनसः आर्षम् । श्रुष्टीति क्षिप्रनाम । क्षिप्रम् । हे अग्ने नवस्य अचिरकृतस्य । मे मम स्वभूतस्य । स्तोमस्य । बलेनेति वाक्यशेषः । वीर विक्रान्त । विश्पते । विशो मनुष्याः । तेषामधिपते । नि । नीत्ययं दहेत्यनेन सम्बन्धयितव्यः । मायिनः मायावन्तः । तपसा रक्षसः राक्षसान् । निदह नियमेन दह । विनाशयेत्यर्थः ॥

विश्वमना एव । श्रुष्टी प्रीत्या । हे अग्ने नवस्य अन्यैरकृतपूर्वस्य । मे मदीयस्य । स्तोमस्य स्तोत्रस्य । श्रुष्ट्या वृद्धः सन् इति शेषः । हे वीर हे विश्पते विशां पते । विश्वस्य पते (नि ९. २८) इति यास्कः । निदह मायिनः वञ्चनावतः । रक्षसः राक्षसान् । तपसा तापकेन तेजसा ॥ (१०)

द्वितीये प्रथमा दशत्या

प्र मंहिष्ठाय गायत ऋताव्ने बृहते शुक्रशोचिषे ।
उपस्तुतासो अग्नये ॥

सौभरेरार्षम् । प्रेत्ययमुपसर्गो गायत इत्याख्यातेन सम्बन्धयितव्यः । मंहिष्ठाय अतिशयेन दातुरर्थाय । प्रगायत प्रकर्षेण गायत । उच्चारयत स्तुतीः । ऋताव्ने । ऋतो यज्ञः उदकं वा । तद्यस्यास्ति स ऋतावान् उदकवान् यज्ञवान् वा । तस्मै ऋताव्ने । उदकवतो यज्ञवतो वा अर्थाय । बृहते महते । प्रवृद्धायेत्यर्थः । किंच शुक्रशोचिषे । शोचिर्दीप्तिः । शुक्रः शोचिर्यस्य स शुक्रशोचिः । तस्मै शुक्रशोचिषे । सुदीप्तेरर्थायेत्यर्थः । उपस्तुतासः । उपगम्य ये स्तुवन्ति ते उपस्तुतासः स्तोतारः । तेषां सम्बोधनं हे उपस्तुतासः । कस्य पुनरर्थाय । उच्यते । अग्नये अग्नेरर्थायेत्यर्थः ॥

सौभरिः । प्रगायत मंहिष्ठाय दानूतमाय । ऋतावने यज्ञपतये । बृहते महते । शुक्रचोचिषे शुभ्रदीप्तये । अग्नये उपस्तुतासः उपस्तोतारः ॥ (१)

प्र सो अग्ने तवोतिभिः सुवीराभिस्तरति वाजकर्मभिः ।
यस्य त्वं सख्यमाविथ ॥

सौभरेरार्षम् । प्रेत्ययमुपसर्गः तरतीत्याख्यातेन सम्बन्धयितव्यः । स यजमानः । हे अग्ने । तव स्वभूताभिः । ऊतिभिः पालनैः । तृतीयानिर्देशात्पाल्यमान इति वाक्यशेषः । कीदृशाभिरूतिभिः पाल्यमानः । उच्यते । सुवीराभिः शोभनैर्वीरैः पुत्रैः पौत्रैश्च उपेताभिः । प्रतरति । तरतिर्वृद्ध्यर्थः । प्रकर्षेण वर्धते इत्यर्थः । वाजकर्मभिः । वाजमन्नम् । तस्य कर्म उत्पत्तिः । अन्नस्योत्पादयितृभिरित्यर्थः । यः कीदृशो यजमानः । उच्यते । यस्य त्वं सख्यं स्तुत्यस्तोतृलक्षणम । आविथ पालयसीत्यर्थः । एतदुक्तं भवति । यस्त्वां स्तौति स पालनैः पौत्रैः अन्नोत्पादैश्च वर्धते ॥

सौभरिर्द्वयोः । प्रतरति वर्धते । हे अग्ने तव ऊतिभिः रक्षोभिः । सुवीराभिः शोभनपुत्रपौत्रप्रदाभिः । वाजकर्मभिः । वाजमन्नं कर्म कार्यं यासां ताभिः । यस्य सख्यं सखित्वम् । आविथ ररक्षिथ रक्षसि । अवतिः गतिकर्मा वा । यस्य सख्यं त्वं आविथ प्राप्नोषि ॥ (२)

तं गूर्धया स्वर्णरं देवासो देवमरतिं दधन्विरे । देवत्रा हव्यमूहिषे ॥

सौभरेरार्षम् । हे मदीय अन्तरात्मन् । तं अग्निम् । गूर्धय । गूर्धयतीत्यर्चतिकर्मसु पठितत्वात् स्तुत्यर्थः । स्तुहीत्यर्थः । कमिव स्तौमि । उच्यते । स्वः । लुप्तोपममिदं द्रष्टव्यम् । स्वरिव । आदित्यमिवेत्यर्थः । नरं नराकारम् । तमिति तच्छब्दश्रुतेर्यच्छब्दोऽध्याहर्तव्यः । यं देवासः

देवाः । देवं दानादिगुणयुक्तम् । अरतिं अलमतिं पर्याप्तमतिम् । सर्वज्ञमित्यर्थः । अथवा देवान् यजमानांश्च प्रति गन्तारम् । दधन्विरे धारितवन्तः । स्थापितवन्त इत्यर्थः । क्व । सामर्थ्यात्पृथिवीलोके । यश्च देवत्रा । देवमनुष्यपुरुषपुरुमर्त्येभ्यः (पा. ५. ४. ५६) इत्येवमयं द्वितीयान्तात् त्राप्रत्ययः । देवान् प्रति । हव्यं ऊहिषे । वह प्रापण इत्येतस्यैतद्रूपं भवति । मध्यमपुरुषैकवचनं च प्रथमपुरुषैकवचनस्य स्थाने द्रष्टव्यम् । वहति ऊढवान्वा ॥

तं अग्निं गृधेय स्तुहि हे सौभरे । स्वर्णरं सर्वस्य नेतारम् । स्वःशब्दः सर्वशब्दपर्यायः । अपि वा स्वर्गस्य नेतारम् । यजमानानां इति वा । तमेव देवं अरतिं गन्तारम् । देवासः स्तोतारः । दधन्विरे धारयन्ति । अथ प्रत्यक्षस्तुतिः । हे अग्ने देवत्रा देवेषु । हव्यं ऊहिषे हव्यं वहसि त्वम् ॥ (३)

मा नो हृणीथा अतिथिर्वसुरग्निः पुरुप्रशस्त एषः ।
यः सुहोता स्वध्वरः ॥

सौभरेरार्षम् । मा इत्ययं प्रतिषेधः हृणीथा इत्येतेन सम्बन्धयितव्यः । हे अग्ने । नः अस्माकम् । मा हृणीथाः । हृणिः क्रुध्यतिकर्मसु पाठात् क्रोधार्थः । मा क्रोत्सीः । मध्यमपुरुषयोगात्प्रत्यक्षकृतो मन्त्रः । न च अतिथिरित्यादीनि आमन्त्रितानि । अतो यत्तच्छब्दावध्याहृत्यैकवाक्यतां नेयानि । यस्त्वमतिथिस्थानीयः । यश्च वसुः प्रशस्तः धनवान्वा । अग्निः । यश्च पुरुप्रशस्तः बहुभिः स्तोतृभिः स्तुत इत्यर्थः । यश्च एषः । एषृ गतावित्यस्यैतद्रूपम् । गन्ता । यश्च सुहोता शोभनः आह्वाता । यश्च स्वध्वरः शोभनयज्ञः । सः अस्माकं मा क्रोत्सीः ॥

सौभरिः । मा हृणीथाः । हृणीतिः क्रोधकर्मा । अन्तर्णीतण्यर्थोऽयम् । मा चुक्रुधः । अग्निं नः अस्माकं सर्वेषाम् । अतिथिं पूज्यम् । हे प्रयोग यथा

न क्रुध्येत् तथा परिचर इति । अथवा हृणीथा इति पुरुषव्यत्ययः । मास्मानग्निः हृणीथाः इति । अतिथिमिति विभक्तिव्यत्ययः । अतिथिः अग्निः इति । वसुः व्याप्तः । पुरुप्रशस्तः । बहुभिः स्तुतः एषः । यः सुहोता सुष्ठु ह्वाता देवानाम् । स्वध्वरः सुयज्ञश्च भवति । यः ईदृशः अग्निः तं मा हृणीथाः । सः मा हृणीतां इति वा ॥ (४)

भद्रो नो अग्निराहुतो भद्रा रातिः सुभगा भद्रो अध्वरः ।
भद्रा उत प्रशस्तयः ॥

सौभरेरार्षम् । भद्रः कल्याणः । नः अस्माकम् । अग्निः आहुतः आभिमुख्येन स्थित्वा हुतः मर्यादया वा हुतः । भवत्विति वाक्यशेषः । भद्रा रातिः यदप्येतत् हविर्दानं एतदपि भद्रं भवतु । हे सुभग शोभनधन अग्ने । भद्रो अध्वरः योऽप्ययं प्रक्रान्तो यज्ञः अयमपि भद्रो भवतु । उत अपि च भद्राः प्रशस्तयः स्तुतयो भवन्तु ॥

सौभरिरेव तिसृणाम् । भद्रो नः कल्याणकरो भवतु अस्माकम् । अग्निः आहुतः अभिहुतः हविर्भिः । अथ प्रत्यक्षस्तुतिः । भद्रा भवतु रातिः देवानां हविर्वा । सुभग सुधन अग्ने । भद्रो भवतु अध्वरो यज्ञः । उत अपि च भद्रा भवन्तु प्रशस्तयः स्तुतयः ॥ (५)

यजिष्ठं त्वा ववृमहे देवं देवत्रा होतारममर्त्यम् ।
अस्य यज्ञस्य सुक्रतुम् ॥

सौभरेरार्षम् । हे अग्ने यजिष्ठं अतिशयेन यष्टारं देवानाम् । त्वा त्वाम् । ववृमहे प्रार्थयामः । देवं देवत्रा देवेषु । देवानां मध्ये इत्यर्थः । कीदृशं त्वां प्रार्थयामहे । उच्यते । होतारं आह्वातारं देवानाम् ।

अमर्त्यं मरणवर्जितम् । अस्य प्रक्रान्तस्य यज्ञस्य । परिसमाप्तिमिति वाक्यशेषः । कीदृशं त्वां परिसमाप्तिं प्रार्थयामहे । उच्यते । सुक्रतुं सुकर्माणं सुप्रज्ञं वा ॥

यजिष्ठं यष्टृतमम् । त्वा त्वाम् । ववृमहे वृणीमहे । होतारं होतृत्वेन । देवं दीप्तम् । देवत्रा देवेषु दानादिगुणकेषु । अमर्त्यं अमरणधर्माणम् । अस्य यज्ञस्य होतारं वृणीमहे इति संबन्धः । सुक्रतुं सुकर्माणम् ॥ (६)

तदग्ने द्युम्नमाभर यत्सासाहा सदने कंचिदत्रिणम् ।
मन्युं जनस्य दूढ्यम् ॥

सौभरेरार्षम् । तत् हे अग्ने । द्युम्नं यशः अन्नं वा । आभर आनय । देहीत्यर्थः । कीदृशं पुनः अन्नं आभरामि । उच्यते । यत् सासाहा । षह मर्षणे इत्यस्याभिभवनार्थीयस्येदं रूपम् । अभिभवति । सदने यज्ञगृहे । किंचित् अत्रिणं अत्तारं विनाशयितारं रक्षःपिशाचादिकम् । न केवलं रक्षःपिशाचादीन् यदभिभवति । किं तर्हि । मन्युं क्रोधं च । जनस्य । कीदृशस्य जनस्य । उच्यते । दूढ्यम् । द्वितीयैकवचनमिदं षष्ठ्येकवचनस्य स्थाने द्रष्टव्यम् । दूढ्यस्य दुर्धियः । पापबुद्धेरित्यर्थः ॥

तत् द्युम्नं तेजः । हे अग्ने आभर आहर अस्मभ्यम् । यत् द्युम्नं ससाह । सहेरभिभवार्थात् लिङर्थे लिट् । अभिभवेत् । सदने गृहे । किञ्चिदपि सर्वमपि । अत्रिणं अदनशीलं राक्षसम् । मन्युम् । मन्यते अभिमन्यते हन्तुमिति मन्युः । जनस्य प्राणिजातस्य मन्युम् । दूढ्यं दुर्धियं दुष्टाभिध्यानं वा ॥ (७)

यद्वा उ विश्पतिः शितः सुप्रीतो मनुषो विशे ।
विश्वेदग्निः प्रति रक्षांसि सेधति ॥

विश्वमनस आर्षम् । यत् । सप्तम्या अत्र लुक् द्रष्टव्यः । यदा । वा उ । द्वावपि पादपूरणौ । विशो मनुष्याः । तेषामधिपतिः स्वामी विश्पतिः । शितः । शो तनूकरणे इत्यस्यैतद्रूपम् । श्यतिश्च संस्कारार्थः । शितः संस्कृत इत्यर्थः । केन । सामर्थ्यात्स्तुतिभिर्हविर्भिश्च । सुप्रीतः सुष्ठु परितृप्त इत्यर्थः । मनुषः मनुष्यस्य मम विश्वमनसः । यदेति वचनात्तदेत्यध्याहर्तव्यम् । तदा विशे । विट् इति मनुष्यनाम । तस्मादियं तादर्थ्ये चतुर्थी । मम स्वभूतस्य मनुष्यस्य पुत्रस्यार्थाय । मम पुत्रादीन् पालयितुमित्यर्थः । विश्वा विश्वानि । इदिति पादपूरणः । अग्निः । प्रति-शब्दः पादपूरणः । रक्षांसि सेधति नाशयतीत्यर्थः ॥

विश्वमनाः । यत् यदा । वै उ इतीमौ पादपूरणौ । विश्पतिः विशां पतिः विश्वस्य पतिर्वा अग्निः । शितः तीक्ष्णीकृतस्सन्नाधानादिभिः । सुप्रीतो भवति । मनुषो मनुष्यस्य यजमानस्य । विशे परिजनाय । सुप्रीत इति सम्बन्धः । तदा विश्वा विश्वानि । रक्षांसि । प्रतिषेधति प्रतिषेधते । इत् एव । इति ॥

इत्थं चतुर्दशशतमृच आग्नेयपर्वणि ।
व्याख्यच्छ्रीभरतस्वामी श्रीरङ्गायतने वसन् ॥ (८)

द्वितीये द्वितीया दशत्या

आग्नेयपर्व समाप्तम्

तद्वो गाय सुते सचा पुरुहूताय सत्वने । शं यद्गवे न शाकिने ॥

इदानीमैन्द्रं उच्यते । भरद्वाजस्यार्षम् । तत् वः । द्वितीयाबहुवचनमिदं प्रथमैकवचनस्य स्थाने द्रष्टव्यम् । त्वम् । गाय । गायतीत्यर्चतिकर्मसु पाठात्

स्तुत्यर्थः । स्तुत्या चात्र उच्चारणं लक्ष्यते । अन्तरात्मन एवायं प्रैषः । हे मदीय अन्तरात्मन् । तत् त्वं स्तुतिरूपं उच्चारय । सुते अभिषुते सोमे । सचा सह अन्यैः ऋत्विग्भिः । कस्मै । उच्यते । पुरुहूताय बहुभिर्यजमानैः आहूतस्येन्द्रस्यार्थाय । कीदृशस्येन्द्रस्यार्थाय । सत्वने । षणु दाने इत्यस्यैतद्रूपम् । दात्रे । स्तोतृभ्यः शं यत् । शमिति सुखनाम । यदुच्चार्यमाणं इन्द्रस्य सुखं करोति तत् उच्चारयेत्यर्थः । कस्मै इव । उच्यते । गवे न । नशब्दः उपमार्थीयः । गवे इव । गोशब्देनात्र वृषभ उच्यते । वृषभाय इव । कीदृशाय । उच्यते । शाकिने । शकनं शाकः । शक्तिरित्यर्थः । तद्वान् शाकी । तस्मै शाकिने । शक्तिमते इत्यर्थः । यथा कश्चित्कृषीवलः शक्तिमतो वृषभस्य सुखकराः स्तुती उच्चारयति तद्वत्सुखकरमिन्द्रस्य स्तुतिरूपमुच्चारयेत्यर्थः ॥

ऐन्द्रे द्वितीये प्रमुखे शतं चाष्टादशाप्यृचः ।
अनुष्टुप्पान्तमित्येषा गायत्र्योऽन्याः समीरिताः ॥
अष्टादशशते त्वस्मिन् चतस्रो मरुतां स्तुतिः ।
इहेवोदुत्य इत्येते अथ गौर्धयतीत्यृचः ॥
वैश्वदेवी भवत्येषा देवानामिदवो महत् ।
सोमानां ब्राह्मणस्पत्या सदसस्सदसस्पतेः ॥
अद्या नो देव सावित्रो दोषो आगादिति तृचः ।
सोमापूष्णोः स्तुतिरियं सोमः पूषा च चेततुः ॥
एषो दूरादिहाश्विन्यौ वात आ वायुसंस्तवः ।
यं रक्षन्ति महि त्रीणां सुनीथो घा स इत्यृचः ॥
मित्रावरुणमुख्यानामादित्यानां तु संस्तवः ।
आ नो मित्रर्जुनीती नो मित्रावरुणयोः स्तुतिः ॥
इन्द्रा नु पूषणेत्यस्यामिन्द्रापूष्णोः सह स्तुतिः ।
सरस्वती पावका न इदं विष्णुर्हि वैष्णवी ।
ऐन्द्र्योऽन्याः सकला ऐन्द्रसमाख्या सृष्टिनीतितः ॥

भरद्वाजः । तत् स्तोत्रम् । वो यूयम् । गाथ गायत । सुते अभिषुते सति सोमे। सचा सह । गायत प्रस्तोत्रादयः । पुरुहूताय बहुभिराहूताय। सत्वने । सनोतेर्दानार्थत्वात् सत्वने दात्रे धनानाम् । शाकिने शक्तिमते इन्द्राय । शं सुखकरं भवति । यत् स्तोत्रं इन्द्राय । गवे न गवे इव घासः । तद्यूयं गायत ॥ (१)

यस्ते नूनं शतक्रतविन्द्र द्युम्नितमो मदः । तेन नूनं मदे मदेः ॥

श्रुतकक्षस्यार्षम् । यः ते नूनं निश्चितम् । शतक्रतो । शतमिति बहुनाम । क्रतुरिति कर्मनाम । शतं क्रतूनां यस्य स शतक्रतुः । तस्य सम्बोधनं हे शतक्रतो । बहुकर्मन् । इन्द्र । द्युम्नितमः अतिशयेन दीप्तिमान् । मदः मत्तः सन् स्तोतृभ्यः यः स्तुतो धनं ददाति । तेन मदेन । नूनं निश्चयेन । मदे । सप्तम्येकवचनमिदं तृतीयैकवचनस्य स्थाने द्रष्टव्यम् । मदेन । मदेः माद्यस्वेत्यर्थः ॥

श्रुतकक्षः । यस्ते त्वदीयः । मदः सोमः । नूनमिति पूरणः । हे शतक्रतो बहुकर्मन् । इन्द्र । द्युम्नितमो दीप्तितमः । तेन नूनं संप्रति । मदेः मदस्व । मदे । मदति स्तौतीति मदः स्तोता । स्तोतरि मयि ॥ (२)

गाव उपवदावटे मही यज्ञस्य रप्सुदा । उभा कर्णा हिरण्यया ॥

हर्यतस्यार्षम् । गोशब्देनात्र वाचः उच्यन्ते । हे गावः मदीया वाचः । उपवद । एकवचनमिदं बहुवचनस्य स्थाने द्रष्टव्यम् । उपगम्य वदत । किं पुनर्वदामः । उच्यते । अवटे । सप्तम्येकवचनमिदं द्वितीयैकवचनस्य स्थाने द्रष्टव्यम् । अवटम् । अवट इति अपठितमपि मेघनाम द्रष्टव्यम् । मेघम् । किं पुनर्वदामः । उच्यते । ममार्थायोदकं पीतमित्येवम् । न केवलं मेघम । मही मह्यौ द्यावापृथिव्यौ । कीदृशे । उच्यते ।

यज्ञस्य रप्सुदा । रप्स्विति रूपनाम । ये तद्दत्तः ते रप्सुदे । यज्ञस्य रूपदे इत्यर्थः । कीदृशं पुनर्ये उपवदामः । उच्यते । उभा कर्णा हिरण्यया उभौ कर्णौ हिरण्मयौ यस्य । अस्ति पुनः क्वचिदन्यत्रापि हिरण्यकर्णत्वं मेघस्य । अस्तीति ब्रूमः । हिरण्यकर्णं मणिग्रीवम् (ऋ. वे. १. १२२. १४) इत्यत्र ॥

हर्यतः प्रागाथः । इयं प्रवर्ग्यसम्बन्धिनी स्तुतिः । इन्द्राश्विना मधुनस्सारस्य घर्मं पात वसवो यजता वट् इति मन्त्रे इन्द्रस्यापि घर्मे भागित्वदर्शनात् हविस्तुतिरिन्द्रस्यैव भवति । गाव इति जसि रूपम् । जसि वा व्यत्ययेन शसः । गावः गाः घर्मदोग्ध्रीः । उपवद उपस्तुहि हे अध्वर्यो । किमर्थम् । अवटे । अवटः रूपः । महावीरोऽत्रावट उच्यते । महावीरनिमित्ते । तदर्थं दोग्धुम् । मही महती भवति । यज्ञस्य यजमानस्य । रप्सुदा स्तोत्रेण स्थितिः । रपेः शब्दकर्मणो रपिः स्तुतिः । तत्र सदनं रप्सुदा । अकारस्योकारो व्यत्ययात् । उभा उभे कर्णा कर्णौ । कृणतेः कर्णः । कर्ण एव कर्णौ रुक्मौ रजतसुवर्णौ । हिरण्यया हिरण्मयौ । तद्रजतं हिरण्मयमभवत् । तत् सुवर्णं हिरण्यमभवत् इति रजतसुवर्णयोः हिरण्यशब्दो दृष्टः । तौ चोभौ निहितौ उपर्यधश्च महावीरस्य ॥ (३)

अरमश्वाय गायत श्रुतकक्षारं गवे । अरमिन्द्रस्य धाम्ने ॥

श्रुतकक्षस्यार्षम् । अरं अलम् । पर्याप्तमित्यर्थः । अश्वस्यार्थाय । गायत । गायतीत्यर्चतिकर्मसु पाठात् स्तुत्यर्थः । हे श्रुतकक्षा श्रुतकक्षस्य मम पुत्राः । अरं अलम् । पर्याप्तमित्यर्थः । गायतेत्येतदनुषज्यते । गवे गोरर्थाय । अरं इन्द्रस्य धाम्ने । धामशब्दः स्थानवचनः । तस्मादियं तादर्थ्यचतुर्थी । इन्द्रस्य यत्स्थानं स्वर्गाख्यं तस्य चार्थायेत्यर्थः ॥

श्रुतकक्षो द्वयोः । अरं पर्याप्तम् । गायतेति वचनव्यत्ययः । गाय गीतिं कुरु । इन्द्रस्य । उत्तरार्धे स्थितमत्र सम्बध्यते । चतुर्थ्यर्थे षष्ठी । इन्द्रार्थं गाय ।

किमर्थमिन्द्रोद्देशेन गीतिः क्रियते । तत्राह । अश्वायेति जातावेकवचनम् । अश्वान् लब्धुम् । हे श्रुतकक्षेति आत्मानमेव सम्बोधयत्यृषिः । अरं इन्द्रस्य गायत गवे गोलाभार्थं अरं गायत । धाम्ने स्थानाय गृहलाभार्थम् ॥ (४)

तमिन्द्रं वाजयामसि महे वृत्राय हन्तवे । स वृषा वृषभो भुवत् ॥

श्रुतकक्षस्यार्षम् । य उक्तगुणः तं इन्द्रं वाजयामसि । वाजयतीत्यर्चतिकर्मसु पठितत्वात् स्तुत्यर्थः । वाजयामः पूजयामः । स्तुम इत्यर्थः । किमर्थं पुनः स्तुमः । उच्यते । महे वृत्राय हन्तवे महतो वृत्रस्य हननार्थमित्यर्थः । स इन्द्रः स्तुतः सन् । वृषा वर्षिता । भुवत् भवेत् । क इव । उच्यते । वृषभः । लुप्तोपममिदम् । वृषभ इव । यथा वृषभः रेतसः वर्षिता तद्वद्वर्षिता उदकस्य भवत्वित्यर्थः ॥

तमिन्द्रं वाजयामसि वाजिनं बलिनं कर्म स्तुतिभिः महे महते वृत्राय वृत्रं हन्तवे हन्तुम् । तुमर्थाच्च भाववचनात् (पा. २. ३. १५) इति चतुर्थी । स वृषा वर्षितेन्द्रः वृषभः वर्षिता कामानां भुवत् भवतु ॥ (५)

त्वमिन्द्र बलादधि सहसो जात ओजसः । त्वं सन् वृषन्वृषेदसि ॥

इन्द्रमातरो देवजामयः । तासां आर्षम् । त्वं हे इन्द्र । बलाज्जातः । बलस्य त्वयि दृश्यमानत्वात् । कारणानुविधायित्वस्य कार्याणामिष्यमाणत्वात् । कीदृशात् बलात् । उच्यते । सहसः । षह मर्षणे । अभिभवे छन्दसि इत्यस्यैतद्रूपम् । अभिभवितृतमादित्यर्थः । किमभिभवितुरेव केवलम् । उच्यते । ओजसः परकीयस्य च बलस्य ऋजुकरणस्वभावात् । किंच त्वं सन् प्रशस्त । हे वृषन् वर्षितः । वृषा वर्षिता । इदिति पादपूरणः । असि भवसि ॥

इन्द्रमातरो देवजामयोऽस्या ऋषयः। त्वं हे इन्द्र बलात् जातोऽसि। बिभर्तेः भरः बलम्। अधीति पञ्चम्यर्थानुवादकः। सहसो वेगाच्च जातोऽसि। ओजसस्तेजसश्च जातोऽसि। बलादिभिः गुणैः सर्वस्मादधिकत्वात् तदुपादान इवासीति स्तुतिः। त्वं सन् श्रेष्ठः हे वृषन् वृषेत्। इत् एव। वृषैव वर्षितैव कामानामसि ॥ (६)

यज्ञ इन्द्रमवर्धयद्यद्भूमिं व्यवर्तयत्। चक्राण ओपशं दिवि ॥

गोषूक्त्यश्वसूक्त्योरार्षम्। यज्ञः मदीयो यागः। इन्द्रमवर्धयत् वर्धितवान्। यः कीदृशः इन्द्रः। उच्यते। यत्। नपुंसकलिङ्गं पुंलिङ्गस्य स्थाने द्रष्टव्यम्। यः। भूमिं पृथिवीम्। व्यवर्तयत् विवर्तयति। विवर्तितवान्वा। सस्यसम्पत्तिद्वारेण अन्यरूपां करोतीत्यर्थः। किं पुनः कुर्वन् अन्यरूपां पृथिवीं करोति। उच्यते। चक्राणः कुर्वन्। ओपशं गर्जितलक्षणं शब्दम्। कुत्र। उच्यते। दिवि द्युलोके ॥

गोषूक्ताश्वसूक्तावृषी द्वृचस्य। यज्ञो यजमानः यज्ञ एव वा इन्द्रमवर्धयत् वर्धयति। यत् यदा भूमिं व्यवर्तयत् विवर्तयति प्रावृति वृष्ट्या। चक्राणः कुर्वन्। ओपशं मेघम्। दिवि अन्तरिक्षे। उपशेरतेऽस्मिन्नाप इति ओपशः ॥ (७)

यदिन्द्राहं यथा त्वमीशीय वस्व एक इत्। स्तोता मे गोसखा स्यात् ॥

गोषूक्त्यश्वसूक्त्योरार्षम्। यदि हे इन्द्र। यथा त्वं ईशिषे। एवमहं ईशीय। कस्य। उच्यते। वस्वः वसुनः। धनस्येत्यर्थः। एकः इत्। इच्छब्दः एवकारार्थः। एक एव। ततः किं स्यात्। उच्यते। स्तोता मे मम। गोसखा। गावः सखिभूता यस्य स गोसखा। मित्रलक्षणं चात्र सख्यं परिगृह्यते। बह्वचो गावो यस्य स्वभूताः। एतदुक्तं भवति। योऽपि

अत्यन्तेश्वरः सोऽपि मे स्तोता भवेत्। अथवा तस्मै स्तोत्रे गावो ददतीत्यर्थः। किंतु अल्पपुण्यत्वाच्च ममैतत्सञ्जातम्॥

यत् यदि अहं हे इन्द्र यथा त्वं ईशिषे वसुनः। तथा अहं वस्वः वसुनः ईशीय ईशः स्याम्। एक इत् एक एव। त्वमेक एव हीशिषे। तथा अहमेक एव यदीशीय तथा सति स्तोता मे मां स्तुवन् यजमानः गोसखा स्यात्। गावः सखायो यस्य सः गोसखा। गोभिः युक्तः स्यात्। इति प्रदाने विलम्बमानं इन्द्रं प्रति उच्यते॥ (८)

पन्यं पन्यमित्सोतार आ धावत मद्याय। सोमं वीराय शूराय॥

मेधातिथेरार्षम्। पन्यं पन्यम्। पनतिः स्तुत्यर्थः। तस्यायमभ्यासः। अभ्यासे च भूयांसमर्थं मन्यन्ते। पन्यं पन्यं अतिशयेन स्तुत्यमित्यर्थः। इदिति पादपूरणः। सोतारः मदीया ऋत्विजः सोमस्य अभिषोतारः। आधावत। सर्तेर्गत्यर्थस्य अन्तर्णीतण्यर्थस्य चेदं रूपम्। आसारयत। आभिमुख्येन गमयत। नयत इत्यर्थः। किं पुनर्नयत। उच्यते। सोमम्। वीराय शूराय विक्रान्ताय शूरायेत्यर्थः॥

मेधातिथिः आङ्गिरसः प्रियमेधश्च काण्वः द्वौ अस्यां: परस्याश्च ऋषी। पन्यं पन्यं अतिशयेन स्तुत्यम्। इत् एवं सोमं हे सोतारः अभिषोतारः अध्वर्यवः। आधावत आपुनीत। धावु गतिशुद्धयोः। मद्याय स्तुत्याय वीराय वीरयित्रे शत्रूणां शूराय च इन्द्राय। शूरः शृणोतेः हिंसाकर्मणः श्यतेर्वा गतिकर्मणः। शूराणां शविष्ठो नोऽभिष्टुतं इति मन्त्रवर्णात्॥ (९)

इदं वसो सुतमन्धः पिबा हे सुपूर्णमुदरम्। अनाभयिन् ररिमा ते॥

मेधातिथेरार्षम्। इदं हे वसो प्रशस्त धनवन् वा। सुतमभिषुतम्। अन्धः सोमलक्षणमन्नं एतत्स्थितम्। पिब। कियत्पुनः पिबामि। उच्यते।

यावत् सुपूर्णं उदरम् । यावदाध्यात इत्यर्थः । अनाभयिन् । आभिमुख्येन भयं यस्य नास्ति स अनाभयी । तस्य सम्बोधनं हे अनाभयिन् । भय-वर्जितेत्यर्थः । स्यादेतत् । अदत्तं कथं पिबामीति अत उच्यते । ररिम । रमि चादान इति अस्यैतद्रूपम् । दद्मो वयम् । ते तुभ्यम् ॥

इदं सुतं अभिषुतम् । अन्धः अन्नं सोमं पिब । हे वसो प्रशस्य । सुपूर्णं कुरु उदरं सोमेन । अनाभयिन् । भयमस्यातीति आभयी । अनाभयिन् भयरहित । ररिमा दद्महि । ते तुभ्यं सोमम् ॥ (१०)

द्वितीये तृतीया दशत्या

उद्धेदभि श्रुतामघं वृषभं नर्यापसम् । अस्तारमेषि सूर्य ॥

सुकक्षस्यार्षम् । उदित्ययमुपसर्ग एषीत्यनेन सम्बन्धयितव्यः । घ इदिति द्वावपि पादपूरणौ । श्रुतामघम् । श्रुतं विख्यातम् । प्रभूतमित्यर्थः । मघं धनम् । श्रुतं मघं यस्य स श्रुतामघः । तं श्रुतामघम् । छान्दसं दीर्घत्वम् । विख्यातधनमित्यर्थः । वृषभं वर्षितारम् । नर्यापसम् । नृभ्यो हितं नर्यम् । अप इति कर्मनाम । नर्यं अपो यस्य स नर्यापसः । तं नर्यापसम् । नृभ्यो हितकारिणमित्यर्थः । अस्तारं क्षेप्तारं शत्रूणाम् । ईदृश-मिन्द्रं प्रतीत्य उदेषि । हे सूर्य ॥

श्रुतकक्षः द्वयोः । अस्मिन् द्वृचे सूर्यरूपेण इन्द्रस्य स्तुतिः क्रियते । असौ आदित्य इन्द्र इति च हारिद्रवकम् । उदेषि उद्यतो भवसि । घेदितीमौ

पादपूरणौ। श्रुतामघं विश्रुतदानम्। वृषभं वर्षितारं कामानाम्। नर्यापसं नरहितकर्माणम्। अस्तारं क्षेप्तारं हवींषि वह्नौ जनमभिलषितसाधनाय हे सूर्य प्रेरक इन्द्र॥ (१)

यदद्य कच्च वृत्रहन्नुदगा अभि सूर्य। सर्वं तदिन्द्र ते वशे॥

सुकक्षस्यार्षम्। यत् अद्य अस्मिन्नहनि। अद्यग्रहणं चात्र प्रदर्शनार्थम्। सर्वकालमित्यर्थः। यच्च किंचित् हे वृत्रहन्। उत् अगाः। मध्यमपुरुषैकवचनमिदं प्रथमपुरुषैकवचनस्य स्थाने द्रष्टव्यम्। अगात्। उद्गच्छति। ज्ञायत इत्यर्थः। अभिः पादपूरणः। सूर्य सुष्ठु ईरयिता भवेत्यर्थः। केषाम्। सामर्थ्याच्छत्रूणाम्। सर्वं तत्प्राणिजातम्। हे इन्द्र। ते तव। वशे। वर्तत इति वाक्यशेषः। एतदुक्तं भवति। यावत् किंचित्प्राणिजातं तस्य सर्वस्य त्वं ईशिषे इत्यर्थः॥

अत्र शौनकः।

यदद्य कच्चेत्युदिते रवौ स्तुत्वा पुरन्दरम्।
गृह्णन्नपोहते शत्रुं वश्यं वा कुरुते जगत्॥

इति। यदद्य कच्च। यत्किञ्चित् वस्तु स्थावरं जङ्गमं वा अद्य अस्मिन्नपि दिने अभि उदगाः उदितोऽसि। हे वृत्रहन् पापानां हन्तः सूर्य सर्वं तत् ते तव वशे अभिवर्तते हे इन्द्र॥ (२)

य आनयत्परावतः सुनीती तुर्वशं यदुम्। इन्द्रः स नो युवा सखा॥

भरद्वाजस्यार्षम्। यः इन्द्रः आ अनयत् आभिमुख्येन आनीतवान्। आत्मनः सकाशे कृतवानित्यर्थः। परावतः दूरात्। कथं पुनः आनीतवान्। उच्यते। सुनीती। सुपां सुलुक् (पा. ७. १. ३९) इत्यनेन पूर्वसवर्णः

इत्येवं सुनीती । एतदुक्तं भवति । शोभनया नीत्या नयेन आनीयमानो न केनचित् प्रतिविध्येत इत्यर्थः । कं पुनः आनीतवान् । उच्यते । तुर्वशं नाम राजपुत्रम् । यदुं च । किमर्थम् । पालनार्थम् । कुत एतत् । त्वमाविथ नर्यं तुर्वशं यदुम् (ऋ. वे. १. ५४. ६) उत त्या तुर्वशायदू (ऋ. वे. ४. ३०. १७) इत्यमादिषु अनयोः पालनसम्बन्धस्य दर्शनात् । दूरादात्मनः सकाशमानीय पालितवानित्यर्थः । इन्द्रः सः नः अस्माकम् । युवा तरुणः । सखा सखिभूतः । देवमनुष्ययोश्च स्तुत्यस्तोतृलक्षणं सख्यम् । स्तुत्य इत्यर्थः ॥

भरद्वाजः । आनयत् आनीतवान् परावतो दूरात् सुनीती शोभनेन नयेन तुर्वशं यदुं च राजानौ शत्रुभिः दूरेऽपास्तौ इन्द्रः । स युवा नः अस्माकं सखा भवतु ॥ (३)

मा न इन्द्राभ्या दिशः सूरो अक्तुष्वायमत् । त्वा युजा वनेम तत् ॥

श्रुतकक्षस्यार्षम् । मा नः । मा इत्ययं प्रतिषेधः आयमदित्याख्यातेन सम्बन्धयितव्यः । नः अस्माकम् । हे इन्द्र अभ्यादिशः । आभिमुख्येन युद्धार्थं ये आदिश्यन्ते ते अभ्यादिशः । आज्ञाकरा इत्यर्थः । सूरः । प्रथमैकवचनमिदं षष्ठ्येकवचनस्य स्थाने द्रष्टव्यम् । सूरस्य सुष्ठु ईरयितुः शत्रोः स्वभूताः । अक्तुषु रात्रिषु । रात्रिग्रहणं चात्र प्रदर्शनार्थम् । सर्वकालमित्यर्थः । मा आयमत् मा आभिमुख्येन निर्यान्तु । सर्वदा युद्धे नश्यन्तामित्यर्थः । किंच त्वा त्वया । युजा । युज्यते इति युक् सहायः । त्वया सहायेनेत्यर्थः । वनेम । वनतिर्यद्यप्यन्यत्र सम्भजनार्थस्तथापीह हिंसार्थो द्रष्टव्यः । हिंस्यामः । तत् । नपुंसकमिदं पुंलिङ्गस्य स्थाने द्रष्टव्यम् । एकवचनं च बहुवचनस्य स्थाने द्रष्टव्यम् । तान् ॥

श्रुतकक्षः । मा आयमत नाभिगच्छेत् अयमित्यर्थः । हे इन्द्र नोऽस्मान् अभिआदिशः आदेष्टा । प्रवृत्तिरोधकः आदेशः । यो नः पूषन्नघो वृको दुश्शेव आदिदेशति । अप स्म तं पथो जहि (ऋ. वे. १. ४२. २) इति मन्त्र-दर्शनात् । सूरः प्रेरकः शत्रुः । अक्तुषु गमनेषु प्रवृत्तिषु धनाद्यर्थासु त्वा त्वया युजा सहायेन वनेम लभेमहि । तत् वयं यदर्थं प्रवर्तेमहि तत् ॥ (४)

एन्द्र सानसिं रयिं सजित्वानं सदासहम् । वर्षिष्ठमूतये भर ॥

मधुच्छन्दस आर्षम् । आ इत्ययमुपसर्गो भरेत्याख्यातेन सम्बन्ध-यितव्यः । हे इन्द्र । सानसिम् । वन षण सम्भक्तौ इत्यस्येदं रूपम् । सम्भजनीयम् । रयिं धनम् । सजित्वानं सहभूतानां शत्रूणां जेतृ । सदा सर्वदा च सहं अभिभवितृ । वर्षिष्ठं अतिशयेन प्रवृद्धम् । ऊतये तर्पणाय । आभर देहीत्यर्थः ॥

अस्याः परस्याश्च मधुश्छन्दाः । आभर आहर । अस्मभ्यं हे इन्द्र सानसिम् । सनोतेः इदं रूपम् । संभजनीयम् । रयिं धनम् । सजित्वानम् । सजित्वानो जयशीलाः पुरुषाः । तैः सहितम् । सदासहं सर्वदा अभिभवितारं आपदाम् । वर्षिष्ठं प्रवृद्धतमम् । ऊतये तर्पणार्थम् ॥ (५)

इन्द्रं वयं महाधन इन्द्रमर्भे हवामहे । युजं वृत्रेषु वज्रिणम् ॥

मधुच्छन्दस आर्षम् । इन्द्रं वयं महाधने महति सङ्ग्रामे । इन्द्र-मेव । अर्भे अल्पे सङ्ग्रामे । हवामहे । युजम् । युज्यत इति युक् सहायः । तम् । सहायमित्यर्थः । वृत्रेषु सङ्ग्रामव्यतिरेकेणान्येषु शत्रुषु हन्तव्येषु । आह्वयाम इत्यनुषज्यते । कीदृशमिन्द्रं आह्वयामः । उच्यते । वज्रिणं वज्रवन्तं इत्यर्थः ॥

इन्द्रं वयं हवामहे आह्वयामहे। महाधने महान्ति धनानि जेतव्यानि यस्मिन् सङ्ग्रामे इन्द्रमेव हवामहे। अर्भे अल्पे अल्पधने च सङ्ग्रामे। युजं सहायम्। वृत्रेषु उपद्रवेषु सत्सु। वज्रिणम्॥ (६)

अपिबत्कद्रुवः सुतमिन्द्रः सहस्रबाह्वे। तत्रादेदिष्ट पौंस्यम्॥

त्रिशोकस्यार्षम्। अपिबत् पीतवान्। इन्द्रः। किं पीतवान्। उच्यते। कद्रुवः सुतम्। कद्रूर्नाम काश्यपस्य भार्या। तस्याः स्वभूतं सुतं अभिषुतं सोमम्। क्व पुनः पीतवान्। उच्यते। सहस्रबाह्वे। सहस्रमिति बहुनाम। बाहुशब्देनापि अवयवेन समुदायस्य सम्बन्धात्कर्ता उच्येत। सहस्रं बाहवः कर्तारो यत्र तत् सहस्रबाहु सत्रम्। तस्मिन् पीतवानित्यर्थः। किंच तत्र सत्रे। अदेदिष्ट अत्यर्थं दृश्यते। वर्ण्यते इत्यर्थः। केन। सामर्थ्यान्मन्त्रैः। पौंस्यं पुंसः इन्द्रस्य योग्यं बलं च॥

त्रिशोकः। इन्द्रः सुतं अभिषुतं सोमं कद्रुवः कद्र्वाख्यस्य यजमानस्य। सहस्रबाह्वे। षष्ठ्यर्थे चतुर्थी। यः सहस्रं वहति प्रापयति ददातीति सहस्रबाहुः। तस्य कद्रुवः। सहस्रं बाहवो यस्य सन्तीत्यपरे। तत्र कद्रौ अदेदिष्ट। दिशतेर्वा ददातेर्वा रूपम्। अदेदिष्टेति अदिशदिति वा अददादिति वा। पौंस्यं वीर्यम्। दीप्यतेः दीप्तिकर्मणो रूपमेतदित्यपरे। अदीपयदिति वा। तत्रादेदिष्ट पौंस्यम् (ऋ. वे. ८. ४५. २६) इति बह्वृचाः॥ (७)

वयमिन्द्र त्वायवोऽभि प्र नोनुमो वृषन्। विद्धी त्वस्य नो वसो॥

वसिष्ठस्यार्षम्। वयं हे इन्द्र। त्वायवः त्वत्कामाः। त्वां यष्टुमिच्छव इत्यर्थः। अभि प्र नोनुमः। अभि प्र इति द्वावपि पादपूरणौ। अत्यर्थं स्तुमः। हे वृषन् वर्षितः। यत एवमतो ब्रवीमि। विद्धि विजानीहि।

ज्ञात्वा च यागं संपादयेत्यर्थः । तु इति पादपूरणः । कस्य पुनर्जानामि । अस्य सुतस्य । नः अस्माकं स्वभूतस्य । हे वसो प्रशस्त धनवन् वा ॥

वसिष्ठः । वयं हे इन्द्र त्वायवः त्वत्कामाः । अभिप्रनोनुमः आभिमुख्येन प्रकर्षेण भृशं स्तुमः । त्वामिति शेषः । हे वृषन् विद्धि अवधारयतु क्षिप्रं अस्य इदं स्तोत्रमित्यर्थः । नः अस्मदीयस्य हे वसो प्रशस्य । जानात्यर्थानां धातूनां प्रयोगे कर्मणि षष्ठी प्रायशो दृश्यते ॥ (८)

आ घा ये अग्निमिन्धते स्तृणन्ति बर्हिरानुषक् । येषामिन्द्रो युवा सखा ॥

त्रिशोकस्यार्षम् । आ इत्येष मर्यादायाम् । घ इति पादपूरणः । मर्यादया ये अग्निं इन्धते सन्दीपयन्ति । ये च स्तृणन्ति बर्हिः आनुषक् आनुपूर्व्येण । येषां च इन्द्रः युवा सर्वदा तरुणः । सखा स्तुत्यस्तोतृलक्षणेन सम्बन्धेन सखिभूतः । स्तुतस्तुत्य इत्यर्थः । यच्छब्दश्रुतेश्च तच्छब्दो योग्यार्थसम्बन्धोऽध्याहर्तव्यः । ते । पुण्यवन्त इति वाक्यशेषः ॥

द्वयोः त्रिशोकः । आ अभि इन्धते दीपयन्ति । समिद्भिः अग्निम् । घेति पादपूरणः । तस्य दीर्घश्च सांहितिकः । ये स्तृणन्ति च बर्हिः यज्ञे आनुषक् अनुषक्तं त्रिधातु पञ्चधातु वा बर्हिस्तीर्यते । परस्परानुषक्ताश्च धातवो भवन्ति । येषां सखा भवति युवा इन्द्रः तेषामिध्मो बृहत् भवति । स्तुतशस्त्रं च तेषां समृध्यते । यूपादयश्च तेषां समृद्धानि भवन्ति । इत्युत्तरयर्चा समाप्तिः वाक्यस्य । बृहन्निदिध्म एषां भूरि शस्तं पृथुः स्वरुः (ऋ. वे. ८. ४५. २) ॥ (९)

भिन्धि विश्वा अप द्विषः परिबाधो जही मृधः । वसु स्पार्हं तदाभर ॥

त्रिशोकस्यार्षम् । भिन्धि विदारय । मारयेत्यर्थः । विश्वाः सर्वाः । अप । उपसर्गश्रुतेः क्रियापदमध्याह्रियते । अपेत्य । अस्मत्तः अपनीय

इत्यर्थः । द्वेष्टीति द्विट् । तान् द्विषः । शत्रूनित्यर्थः । परिबाधः । परीति सर्वतो भावे । बाधा पीडा । सर्वतो यो बाधां करोति सः । बाधयति बाधयते । क्विप् । बाधः । तान् सर्वतः पीडाकरानित्यर्थः । भिन्धीत्येतदनुषज्यते । जहि मृधः मारय मृधः । सङ्ग्रामनाम । मृधं करोति मृधयति मृधयते । क्विप् । मृधः । तान् मृधः । सङ्ग्रामकारिण इत्यर्थः । दत्वा च । तदाभरेति परस्तात्तच्छब्दश्रुतेः योग्यार्थसम्बन्धो यच्छब्दोऽध्याहर्तव्यः । यद्देयं वसु धनम् । स्पार्हम् स्पृहणीयम् । सारवदित्यर्थः । तत् अस्मभ्यं आभर आहर । देहीत्यर्थः ॥

अपेत्युपसर्ग उपरि श्रूयमाणो भिन्धीत्यनेन सम्बध्यते । छन्दसि परेऽपि (पा. १. ४. ८१) व्यवहिताश्च (पा. १. ४. ८२) इति स्मरणात् । अपभिन्धि विश्वाः द्विषः द्वेष्ट्रीः प्रजाः सेना वा । परिजहि परितो बाधस्व । बाधः बाधकान् । बाधतेः क्विप् । मृधः हिंसकांश्च परिजहि । वसु धनं स्पार्हं स्पृहणीयं यत् शत्रुभिः गृहीतं तदाभर आहर अस्मभ्यम् ॥ (१०)

द्वितीये चतुर्थ्यां दशत्या

इहेव शृण्व एषां कशा हस्तेषु यद्वदान् । नि यामं चित्रमृञ्जते ॥

कण्वस्यार्षम् । इह पृथिव्याम् । इवशब्द एवार्थे । इहैव पृथिव्यां स्थितैः । शृण्वे श्रूयते शब्दः । एषां मरुताम् । कशाः हस्तेषु व्यवस्थिताः अश्वानां सारथयः । यत् । सप्तम्या अत्र लुक् । यदा । वदान् वदन्ति शब्दं कुर्वन्ति । यद्वदानिति परस्तात् यच्छब्दश्रुतेः पूर्वत्र तच्छब्दमध्याहृत्यैकवाक्यता योज्या । एषां कशा हस्तेषु व्यवस्तिता यदा शब्दं कुर्वन्ति

तदा इहैव श्रूयते शब्दः । न केवलं तदैव । किं तर्हि । यदा च । नि इत्ययमुपसर्गः ऋञ्जते इत्याख्यातेन सम्बन्धयितव्यः । यान्ति येन स यामो रथः । तं यामं रथम् । कीदृशम् । चित्रं विचित्रं पूज्यं वा । नि ऋञ्जते नियमेन गमयन्ति । तदा च इहैव शब्दः श्रूयत इति ॥

कण्वः । इह अस्मिन् लोके शृण्वे श्रूयते । यक्स्थाने श्नुः । लोपस्त आत्मनेपदेषु (पा. ७. १. ४१) इति तकारलोपः । एषां मरुतां शब्द इति शेषः । इवेति संप्रत्यर्थे । इवशब्द उपमानार्थः संप्रत्यर्थोऽवधारणार्थः पादपूरणार्थश्च भवति । अत्र उपमार्थव्यतिरिक्तानां त्रयाणामन्यतमो ग्राह्यः । कशाः अश्वघात्यः हस्तेषु स्थिताः । यत् यदा वदान् शब्दायेरन् तदा गर्जितशब्दः शृण्वे । नि यामन् नितरां गच्छेयुः । ऋञ्जते अलङ्कुर्वन्ति मरुत इति शेषः । चित्रं विचित्रं रथं स्वकीयं स्वकीयैरायुधालङ्करणैः । अंसेषु व ऋष्टयः पत्सु खादयो वक्षस्सु रुक्मा मरुतो रथे शुभः । अग्निभ्राजसो विद्युतो गभस्त्योः शिप्राः शीर्षसु वितता हिरण्ययी (ऋ. वे. ५. ५४. ११) इति हि भवति ॥　　　　　　　　　　　　(१)

इमा उ त्वा विचक्षते सखाय इन्द्र सोमिनः । पुष्टावन्तो यथा पशुम् ॥

त्रिशोकस्यार्षम् । इमे मदीया ऋत्विजः । उ इति पादपूरणः । त्वा त्वाम् । विचक्षते विविधं पश्यन्ति । सखायः स्तुत्यस्तोतृलक्षणेन सख्येन सखिभूताः । स्तुवन्त इत्यर्थः । हे इन्द्र । सोमिनः सोमवन्तः । कथं पुनः पश्यन्ति । उच्यते । पुष्टावन्तो यथा पशुम् । पोषणं पुष्टम् । तद्वन्तः पुष्टावन्तः । पोषणवन्त इत्यर्थः । एतदुक्तं भवति । यथा घासहारिणो घासेन गृहीतेन पशोस्तर्पणार्थं परमया प्रीत्या युक्तास्तमेव पशुं पश्यन्ति तद्वन्मदीया ऋत्विजः सोमवन्तस्तेनैव सोमेन गृहीतेन तर्पणार्थं त्वां पश्यन्तीत्यर्थः ॥

त्रिशोकः । इमे सखायः स्तोतारः विचक्षते । त्वां प्रतिपालयन्ति । उ इति पूरणः । हे इन्द्र सोमिनः सोमवन्तः । पुष्टावन्तः पोषकघासंसंयुक्ताः जनाः यथा पशुं विचक्षते घासं प्रदातुं तद्वत् त्वां सोमं प्रदातुं विचक्षते ॥ (२)

समस्य मन्यवे विशो विश्वा नमन्त कृष्टयः । समुद्रायेव सिन्धवः ॥

वत्सस्यार्षम् । समित्ययमुपसर्गः नमत इत्याख्यातेन सम्बन्धयितव्यः । अस्येन्द्रस्य स्वभूताय । मन्यवे क्रोधाय । विशः । यद्यपि विश इति मनुष्यनाम तथापि कृष्टय इत्यनेन पौनरुक्त्यप्रसङ्गात्क्रियानिमित्तं द्रष्टव्यम् । विष्लृ व्याप्तावित्यस्येदं रूपम् । स्तुतिभिर्हविर्भिश्च व्याप्तारः । विश्वाः सर्वाः । सन्नमन्त प्रह्वीभवन्तीत्यर्थः । के पुनः प्रह्वीभवन्ति । उच्यते । कृष्टयः यजमानमनुष्या इत्यर्थः । कथं पुनः सन्नमन्त । उच्यते । समुद्रायेव सिन्धवः । यथा समुद्राय सिन्धवः नद्यः प्रह्वीभवन्ति तद्वदित्यर्थः ॥

वत्सः । सन्नमन्त प्रह्वीभवन्ति । अस्य इन्द्रस्य मन्यवे क्रोधाय । विशः निविष्टाः । विश्वाः कृष्टयः प्रजाः । समुद्रायेव सिन्धवः नद्यः ॥ (३)

देवानामिद्वो महत्तदा वृणीमहे वयम् । वृष्णामस्मभ्यमूतये ॥

कुसीदिन आर्षम् । देवानां स्वभूतम् । इदिति पादपूरणः । तदावृणीमह इति परस्तात्तच्छब्दश्रुतेः यच्छब्दोऽध्याहर्तव्यः । यत् अवः पालनं तर्पणं वा महत् तत् आवृणीमहे आभिमुख्येन प्रार्थयामः वयम् । कीदृशानां देवानाम् । उच्यते । वृष्णां वर्षितॄणाम् । किमर्थं पुनः प्रार्थयामः । उच्यते । नः अस्मभ्यम् । ऊतये पालनार्थमित्यर्थः ॥

कुसीदी काण्वः । देवानामित् देवानामेव अवो रक्षणं महत् विद्यते । वृष्णां वर्षितॄणाम् । तत् रक्षणं आवृणीमहे प्रार्थयामो वयं अस्मभ्यं उतये रक्षणार्थम् ॥ (४)

सोमानां स्वरणं कृणुहि ब्रह्मणस्पते । कक्षीवन्तं य औशिजः ॥

मेधातिथेरार्षम् । सोमानाम् । अभिषोतारमिति वाक्यशेषः । स्वरणम् । स्वृ शब्दोपतापयोरित्येतस्यैतद्रूपम् । शब्दयितारं स्तुतीनामुच्चारयितारम् । स्तोतारं यष्टारं चेत्यर्थः । मां कृणुहि कुरु । हे ब्रह्मणस्पते । कमिव । उच्यते । कक्षीवन्तम् । लुप्तोपममिदं द्रष्टव्यम् । कक्षीवन्तमिव । यः कतमः कक्षीवान् । उच्यते । य औशिजः य उशिजः पुत्रः । तमिव ॥

मेधातिथिः । सुनोति अभिषुणोति सोममिति सोमानां तद्वतां स्वरणम् । स्वृ शब्दोपतापयोः इति । शब्दवन्तं कीर्तिमन्तं कृणुहि कुरु हे ब्रह्मणस्पते । कक्षीवन्तमिति लुप्तोपमा । कक्षीवन्तमिव । यः कक्षीवानौशिजः उशिजः पुत्रः । उशिजा नाम कक्षीवतो जनीति । दीर्घतमा हि तस्य पिता ॥ (५)

बोधन्मना इदस्तु नो वृत्रहा भूर्यासुतिः । शृणोतु शक्र आशिषम् ॥

श्रुतकक्षस्यार्षम् । बोधन्मनाः । बुध्यति मनो यस्य स बोधन्मनाः । इदिति पादपूरणः । अस्तु भवतु । नः अस्माकम् । वृत्रहा वृत्रस्य हन्ता इन्द्रः । भूर्यासुतिः । भूरीति बहुनामधेयम् । अत्र आसुतिशब्दो रसवचनः । ता सम्राजा घृतासुती (ऋ. वे. १. १३६. १) इति यथा । भूरि आसुतिर्यस्य स भूर्यासुतिः । बहुरस इत्यर्थः । शृणोतु शक्र आशिषं प्रार्थनाम् । एतदुक्तं भवति । यद्यदहं प्रार्थयामि तच्छृणोतु शक्रः । श्रुत्वा च बुध्यतु । बुद्ध्वा च सम्पादयतु ॥

श्रुतकक्षः । बोधन्मनाः बुध्यमानचित्तः स्तोत्रावधारणपरचित्तः । इत् एव । बोधन्मना एव अस्तु । नः अस्माकं इन्द्रः भूर्यासुतिः बह्वन्नसोमपान इत्यर्थः ।

अथवा बोधन्मना इति विशेषणम् । भूर्यासुतिः बह्वन्नप्रदः अस्माकं इति । वृत्रहा शक्रः इन्द्रः शृणोतु नः आशिषं आशासनं अस्माकम् ॥ (६)

अद्य नो देव सवितः प्रजावत्सावीः सौभगम् । परा दुःष्वप्न्यं सुव ॥

श्यावाश्वस्यार्षम् । अद्य नः अस्मभ्यम् । देव सवितः । सविता आदित्यः । तस्य सम्बोधनं हे सवितः । प्रजावत् प्रजासहितम् । सावीः अभ्यनुजानीहि । देहीत्यर्थः । सौभगम् । भगमिति धननाम । शोभनं भगं सुभगम् । सुभगमेव सौभगम् । स्वार्थिकस्तद्धितः । शोभनं धनमित्यर्थः । किञ्च परा दुःष्वप्न्यं सुव । परा इत्ययमुपसर्गः सुवेत्याख्यातेन सम्बन्धयितव्यः । सुवेति षू प्रेरणे इत्यस्येदं रूपम् । दुःष्वप्न्यम् । अनिष्टस्य कस्यचित्सूचकः स्वप्नः दुःस्वप्नः । तस्मिन्भवं दुःष्वप्न्यं मरणादि । तत्परासुव प्रेरय । अपनयेत्यर्थः ॥

श्यावाश्वः । अद्य अस्मिन्नपि दिने नः अस्मभ्यं हे देव सवितः प्रजावत् प्रजाभिः सहितं सौभगं सुभगत्वं सुधनत्वं सावीः प्रसुव प्रेरय । परासुव पराणुदः दुःष्वप्न्यं दुःस्वप्नम् ॥ (७)

क स्य वृषभो युवा तुविग्रीवो अनानतः । ब्रह्मा कस्तं सपर्यति ॥

प्रगाथस्यार्षम् । क स्य सः । तच्छब्दश्रुतेर्यच्छब्दो योग्यार्थसम्बन्धोऽध्याह्रियते । य उक्तगुण इन्द्रः क सः वृषभः वर्षिता अपाम् । युवा तरुणः । तुविग्रीवः पुरुग्रीवः । बहुग्रीव इत्यर्थः । कथमिन्द्रो बहुग्रीवः । उच्यते । परमात्मस्वरूपत्वात् ।

सर्वतः पाणिपादान्तः सर्वतोऽक्षिशिरोमुखः ।
सर्वतः श्रुतिमँल्लोके सर्वमावृत्य तिष्ठति ॥

इत्येवं तुविग्रीवः। अनानतः शत्रुं प्रति अप्रह्वीभूत इत्यर्थः। किमर्थं पुनः पृच्छ्यते। उच्यते। ब्रह्मा कः प्रजापतिः भूतानां निर्माता। अध्वर्युरपि यज्ञस्य निर्माता। अतो निर्मातृत्वसामान्यात्कःशब्देनात्राध्वर्युरुच्यते। ब्रह्मा च अध्वर्युश्च। तं सपर्यति परिचरतीत्यर्थः। पूजयति वा। यतः एवमतः पृच्छ्यते। अथवा एतस्मात्कारणादनानतः यतः ब्रह्मा प्रजापतिः तं परिचरति। क स इति॥

प्रगाथः काण्वः। क्व इत्यत्र कम्पो न दीर्घः। क्व कस्मिन् यजमाने च भवति। स्य सः। वृषभः वर्षिता। युवा तुविग्रीवः प्रवृद्धकन्धरः। अनानतः अप्रणतः कस्मैचिदिन्द्रः। ब्रह्मा परिबृढः श्रुत्यादिभिः। कः स्तोता। तं सपर्यति परिचरति स्तुतिभिः॥ (८)

उपह्वरे गिरीणां संगमे च नदीनाम्। धिया विप्रो अजायत॥

वत्सस्यार्षम्। उपह्वरे गह्वरे प्रदेशे। गिरीणां मेघानां सम्बन्धिनि। बहुमेघप्रदेशे इत्यर्थः। सङ्गमे च नदीनां शब्दकारिणीनामपाम्। बहूदके प्रदेशे इत्यर्थः। धिया प्रज्ञया। विप्रः मेधावी। अजायत जायते। एतदुक्तं भवति। यत्र प्रदेशे बहवो मेघा यत्र च बहूदकं तत्र तेषां हवनार्थं तस्य चोदकस्य पानार्थं इन्द्र इति॥

वत्सः। उपह्वरे समीपे गिरीणां मेघानां शैलानाम्। संगमे च नदीनां अजायत प्रादुर्भवति इन्द्रः धिया कर्मणा युक्तः विप्रः प्राज्ञः॥ (९)

प्र सम्राजं चर्षणीनामिन्द्रं स्तोता नव्यं गीर्भिः। नरं नृषाहं मंहिष्ठम्॥

इरिम्बिठिर्नाम ऋषिः। तस्येदमार्षम्। प्रेत्ययमुपसर्गः स्तोतेत्याख्यातेन सम्बन्धयितव्यः। सम्राजं सम्यगीशानम्। चर्षणीनां

मनुष्याणाम् । इन्द्रं प्रस्तोता प्रकर्षेण स्तुवत हे मदीया ऋत्विजः । कीदृशं पुनः इन्द्रं स्तुमः । उच्यते । नव्यं नवतरम् । तरुणमित्यर्थः । अथवा नु स्तुताविल्यस्येदं रूपम् । यदि प्रत्यये कर्मणि कारके रूपम् । एतदुक्तं भवति । स्तोतव्यमिन्द्रं प्रकर्षेण स्तुत । केन पुनः स्तुमः । उच्यते । गीर्भिः स्तुतिलक्षणाभिर्वाग्भिरित्यर्थः । कीदृशं पुनरिन्द्रं स्तुमः । उच्यते । नरं नराकारम् । नृषाहम् । नरो मनुष्याः । तान् यः सहते अभिभवति स नृषाट् । तं नृषाहम् । शत्रुमनुष्याणामभिभवितारमित्यर्थः । मंहिष्ठं अतिशयेन स्तोतृभ्यः यष्टृभ्यश्च दातृतमम् ॥

इरिम्बिठिः । प्रस्तोत प्रकर्षेण स्तुत हे यजमानाः । तप्तनप्तनथनाश्च (पा. ७. १. ४५) इति तस्य तपादेशः । सम्राजं ईश्वरम् । चर्षणीनां प्रज्ञानाम् । इन्द्रं नव्यं स्तुत्यम् । गीर्भिः स्तुतिभिः । प्रस्तोतेति समन्वयः । कम् । नरं नेतारम् । नृषाहं नृणामभिभवितारम् । मंहिष्ठं दातृतमम् ॥ (१०)

द्वितीये पञ्चम्या दशत्या

अपादु शिप्र्यन्धसः सुदक्षस्य प्रहोषिणः । इन्दोरिन्द्रो यवाशिरः ॥

श्रुतकक्ष्यस्यार्षम् । अपात् पीतवान् । उः पादपूरणः । इन्द्रः । कीदृशः । उच्यते । शिप्री । शिप्रे हनू नासिके वा । तद्वान् शिप्री । कस्य पुनः पीतवान् । उच्यते । अन्धसः अन्नस्य । षष्ठीनिर्देशात् सोपलक्षणम् । एकदेशम् । कीदृशस्य अन्धसः । उच्यते । सुदक्षस्य सुष्ठु उत्साहितस्येत्यर्थः । प्रहोषिणः । जुहोतेर्दानार्थस्येदं रूपम् । सुष्ठु मया

दत्तस्येत्यर्थः । किंलक्षणस्य पुनरन्धसः पीतवान् । उच्यते । इन्दोः सोमस्य । यवाशिरः । यवशब्देनात्र यवविकाराः सक्तवः उच्यन्ते । तेषां मिश्रणं यस्य स यवाशिरः । प्रथमा च षष्ठ्यर्थे द्रष्टव्या । यवमिश्रितस्येत्यर्थः । मन्थी च नाम ग्रहः । स सक्तुभिर्दृश्यते । मन्थिनं सक्तुभिः इति वचनम् । तमेवेक्षित्वैतदुच्यते यवाशिर इति ॥

श्रुतकक्षः । अपात् पिबतु शिप्री सुहनुः इन्द्रः । उ इति पूरणः । अन्धसः अन्नस्य । सुदक्षस्य सुबलस्य । प्रहोषिणः स्तुतिमतः । स्तुतौ ह्यार्भवपवमानेन । इन्दोः दीप्तस्य । यवाशिरः यवविकाराः सक्तवः आशिश्रयणं यस्य तस्य । तदन्धः सोममित्यर्थः ॥ (१)

इमा उ त्वा पुरूवसोऽभि प्र नोनवुर्गिरः । गावो वत्सं न धेनवः ॥

मेधातिथेरार्षम् । इमाः । उ इति पादपूरणः । त्वा त्वाम् । पुरूवसो । पुर्विति बहुनाम । वसु इत्यपि धननाम । पुरु वसु यस्य सः पुरुवसुः । तस्य सम्बोधनं हे पुरूवसो । वोरुपधाया दीर्घः (पा. ८. २. ७६) इति । पुरुवसो बहुधन । अभिप्रनोनवुः । आभिमुख्येन स्थित्वा अत्यर्थं पुनःपुनर्वा स्तुतवत्यः । गिरः । अस्मदीया वाचः । कथं पुनः स्तुतवत्यः । उच्यते । गावो वत्सं न । नशब्द उपरिष्टादुपचारत्वादुपमार्थीयः । वत्समिव । यथा गावः वत्समभिनन्दन्ति तद्वदित्यर्थः । कीदृश्यो गावः । उच्यते । धेनवः अचिरप्रसूता इत्यर्थः ॥

मेधातिथिः । इमाः गिरः । गृणन्ति स्तुवन्तीति गिरः प्रजाः । उः पूरणः । त्वा अभिप्रनोनवुः प्रणुवन्ति प्रकर्षेण स्तुवन्ति । हे पुरूवसो बहुधनेन्द्र । गावो धेनवो दोग्ध्र्य् इव वत्सम् । नः इवार्थे । हिंकुर्वन्ति हि वत्सं गावः ॥ (२)

अत्राह गोरमन्वत नाम त्वष्टुरपीच्यम् । इत्था चन्द्रमसो गृहे ॥

गौतमस्यार्षम् । अत्रेत्यनेन चन्द्रमसः गृहं प्रतिनिर्दिश्यते । चन्द्रमसो मण्डलं गृहम् । अत्र चन्द्रमसो गृहे । गोशब्देनापि । सुषुम्ना नाम आदित्यरश्मिः चन्द्रमसं प्रति गतः । अल्पत्वाच्चन्द्रमण्डलस्य रश्मिः प्रतिगतः ततः परावृत्य पृथिव्यां ज्योत्स्नारूपेण दीप्यते । सोऽत्र गोशब्देनोच्यते । तस्य चन्द्रमसं प्रति गता रश्मयः । अमन्वत । अनुमन्यन्ते । नाम नमनं प्रह्वीभावम् । त्वष्टुः आदित्यस्य । अपीच्यं अपगतं अपिहितमन्तर्हितं वा । क्व अनुमन्यन्ते । इत्था अमुत्र । चन्द्रमसो गृहे मण्डले ॥

गोतमः । दुर्ज्ञेयत्वात् अस्याः ऋचः यास्कनिरुक्तं तावत् लिख्यते । आदित्योऽपि गौः उच्यत इति प्रकृत्या । अथाप्यस्य एको रश्मिः चन्द्रमसं प्रति दीप्यते । तत् एतेन उपेक्षितव्यम् । आदित्यतोऽस्य दीप्तिः भवति इति । सुषुम्नः सूर्यरश्मिश्चन्द्रमा गन्धर्वः इति अत्र निगमो भवति । सोऽपि गौरुच्यते । अत्राह गोरमन्वत इति । तदुपरिष्टात् व्याख्यास्याम इति । तथान्यत्र गौर्व्याख्यातः । अत्राह गोरमन्वत नाम त्वष्टुरपीच्यम् । इत्था चन्द्रमसो गृहे । अत्राह गोः सममंसतादित्यस्य रश्मिभिः स्वं नामापीच्यं अपगतं अपह्वतं अपचितं अन्तर्हितं वा अमुत्र चन्द्रमसो गृहे इति । अस्याश्च इन्द्र एव सूर्यात्मना स्तूयत इति ऐन्द्रसूक्तसङ्गतिः । अयमृचोऽर्थः । अत्रान्तरिक्षे । अहेति विनिग्रहार्थ एवशब्दपर्याय । गोः सुषुम्नाख्यस्य सूर्यरश्मेः । नाम नमनं अवस्थानम् । अमन्वत अमंस्त । अनुजानन्तीत्यर्थः । के । आदित्यरश्मयः । त्वष्टुरादित्यस्य अपीच्यं अन्तर्हितम् । इत्था अमुत्र । चन्द्रमसो गृहे मण्डले अन्तरिक्षे । त्वष्टुर्यो गौः सुषुम्नाख्यो रश्मिः तस्य मण्डलेऽन्तर्गता आदित्यस्य रश्मयः ॥ (३)

यदिन्द्रो अनयद्रितो महीरपो वृषन्तमः । तत्र पूषा भुवत्सचा ॥

भरद्वाजस्यार्षम् । यत् मेघस्थानम् । इन्द्रो रितः गतः । प्राप्तः सन्नित्यर्थः । अनयत् नयति । पृथिव्यां पातयतीत्यर्थः । महीरपः महान्ति

वृष्टिलक्षणान्युदकानि । कीदृश इन्द्रः । उच्यते । वृषन्तमः अतिशयेन वर्षिता । तत्र तत्स्थाने । पूषा भुवत् भवति । सचा सह । पूष्णा सहितो वर्षति । न केवलं वर्षतीत्यर्थः ॥

भरद्वाजः । यत् यदा इन्द्रः अनयत् गमयति । रितः गन्त्र्यः । रियतेर्गतिकर्मणः क्विपि रूपं रिदिति । महीः महतीः अपः । वृषन्तमः वर्षितृतमः । तत्र तदा पूषा देवः भुवत् भवति । सचा सहायः इन्द्रस्य ॥ (४)

गौर्धयति मरुतां श्रवस्युर्माता मघोनाम् । युक्ता वह्नी रथानाम् ॥

बिन्दोर्वा पूतदक्षस्य वा आर्षम् । गौःशब्देनात्र माध्यमिका वाक् उच्यते । सा धयति पानार्थमुदकं रक्षति । वर्षतीत्यर्थः । मरुतां माता । श्रवस्युः । श्रवःशब्देन कीर्तिरुच्यते । तामिच्छति श्रवस्यति श्रवस्यते । उप्रत्ययः । श्रवस्युः । कीर्तिकाम इत्यर्थः । कीदृशानां पुनर्मरुतां माता । उच्यते । मघोनाम् । मघं धनम् । तद्येषामस्ति ते मघवानः । तेषां मघोनाम् । धनवतामित्यर्थः । किं केवलैव गौर्वर्षति । नेत्युच्यते । युक्ता तैरेव पुत्रैः । मरुद्भिः सहितेत्यर्थः । वह्निः मातृत्वात्तेषामेव मरुतां वोढ्री । कीदृशानां पुनर्मरुतां वोढ्री । उच्यते । रथानां रथस्वभावकानामित्यर्थः ॥

बिन्दुः पूतदक्षः वा । गौः वाक् माध्यमिका । धयति पिबति सोमम् । मरुतां मघोनां धनवतां माता श्रवस्युः अन्नकामा । श्रवोऽन्नम् । युक्ता उद्युक्ता वह्निः वोढ्री विश्वस्य । रथानां रंहणानां गन्तॄणामिति मरुतां विशेषणम् ॥ (५)

उप नो हरिभिः सुतं याहि मदानां पते । उप नो हरिभिः सुतम् ॥

श्रुतकक्षस्यार्षम् । उपेत्ययमुपसर्गः आ इत्येतस्य स्थाने द्रष्टव्यः याहीत्याख्यातेन सम्बध्यते । आयाहीति । केन पुनरागच्छामीति । उच्यते ।

हरिभिः अश्वैरित्यर्थः । किं पुनः प्रति आगच्छामि । उच्यते । नः सुतमस्माकं स्वभूतमभिषुतं सोमं प्रति । मदानां पते । मदाः गर्वाः । तेषामधिपतिः । अथवा मादयन्तीति मदाः सोमाः । तेषामधिपतिभूताः । उप नो हरिभिः सुतं इत्यभ्यासः । अभ्यासेन च भूयानर्थः प्रतीयते । अस्माकं स्वभूतमभिषुतं सोमं प्रति शीघ्रमागच्छेत्यर्थः ॥

श्रुतकक्ष एव द्वयोः । उप याहि उपगच्छ । नः अस्माकम् । सुतं सोमम् । हरिभिः जवाश्वैः । हे मदानां पते सोमानां स्वामिन्निन्द्र । उप इति पुनर्वचनमादरार्थम् ॥ (६)

इष्टा होत्रा असृक्षतेन्द्रं वृधन्तो अध्वरे । अच्छावभृथमोजसा ॥

श्रुतकक्षस्यार्षम् । ऋषिरात्मीयान् ऋत्विजः आह । इष्टाः प्रियाः । होत्राः । हूयन्त इति होत्राः । आहुतय इत्यर्थः । ता असृक्षत विसृजत । दत्त इत्यर्थः । कथं पुनर्विसृजामः । उच्यते । इन्द्रं वृधन्तः वर्धयन्तः । अध्वरे यज्ञे । केन । सामर्थ्यात्स्तुतिभिः स्तुवन्तः इत्यर्थः । क्व पुनर्विसृजामः । उच्यते । अच्छा अवभृथं आप्तुमवभृथमित्यर्थः । प्रधानाहुतिषु कृतासु अवभृथसंज्ञकं कर्म करिष्यते । एवमवभृथमित्यर्थः । ओजसा स्वेन कर्मणा सामर्थ्येन वा ॥

इष्टा इति यजेः कर्तरि क्तः । इष्टवत्यः । इन्द्रं होत्राः वषट्कर्तारः । होत्राशब्दः स्त्रीलिङ्गः । सप्त होत्राः प्राचीर्वषट्कुर्वन्तीति । असृक्षत । सृष्टिरुद्योगः । उद्युक्ता भवन्ति । अवभृथं अच्छ अभि वृधन्तो वृद्धाः सोमपानेन । अध्वरे यज्ञे । ओजसा च युक्ताः । ये यज्ञं समाप्य अवभृथं अभिगच्छन्ति ते प्राधान्येन इन्द्रं यजन्तीत्यर्थः ॥ (७)

अहमिद्धि पितुः परिमेधामृतस्य जग्रह । अहं सूर्य इवाजनि ॥

वत्सस्यार्षम् । अहम् । इत् हि द्वावपि पादपूरणौ । पितुः कण्वस्य सकाशात् । परीत्ययं जग्रहे इत्याख्यातेन सम्बन्धयितव्यः । मेधां प्रज्ञाम् । कीदृशस्य पितुः सकाशात् । उच्यते । ऋतस्य सत्यस्य । परिजग्रह परिगृहीतवान् । तया च गृहीतया अहं सूर्य इव अजनि । यथा सूर्यः सर्वार्थानां द्रष्टा तद्वदहमपि सर्वार्थानां सन्द्रष्टा सञ्जात इत्यर्थः ॥

वत्स एव । अहं पितुः मम कण्वात् परि । परीति पञ्चम्यर्थानुवादकः । मेधां बुद्धिं ऋतस्य यज्ञस्य इन्द्रविषयस्य स्तोत्रस्य । तद्विषयामित्यर्थः । जग्रह गृहीतवान् अस्मि । हि इति हेतौ । यस्मात् गृहीतविद्यः अहं ततः अहं सूर्य इव अजनि अभूवं तेजसा इति इन्द्रस्तुतिः ॥ (८)

रेवतीर्णः सधमाद इन्द्रे सन्तु तुविवाजाः । क्षुमन्तो याभिर्मदेम ॥

शुनःशेपस्यार्षम् । रयिरिति धननाम । तद्यासां विद्यते ता रेवतीः । द्वितीयाबहुवचनमिदं प्रथमाबहुवचनस्य स्थाने द्रष्टव्यं सन्त्वित्याख्यातेन सम्बध्यते । धनवत्यो भवन्त्वित्यर्थः । काः । सामर्थ्यात्स्तुतयः । कस्य सम्बन्धिन्यः । उच्यते । सधमादे इन्द्रे । द्वेऽप्येते सप्तम्येकवचने षष्ठ्येकवचनस्य स्थाने द्रष्टव्ये । अस्माकं सहभूतानां महनीयस्य स्तुत्यस्य इन्द्रस्य सम्बन्धिन्यः । न केवलं धनवत्यो भवन्त्विति । किं तर्हि । तुविवाजाः । तुवि इति बहुनाम । वाज इति अन्ननाम । तुवि बहु वाजोऽन्नं यासां ता तुविवाजाः । प्रभूतान्नाः । एतदुक्तं भवति । धनस्य साधका भवन्त्वित्यर्थः । क्षुमन्तः । क्षु । क्षु शब्दे इत्यस्येदं रूपम् । शब्दवन्तः कीर्तिमन्तः । याभिर्मदेम मोदेमेत्येतदाशास्महे ॥

शुनश्शेपः । रेवतीः । रयिमत्यः । जसि पूर्वसवर्णदीर्घः वा छन्दसि (पा. ६. १. १०६) इति । रेवत्यः । गाव इत्यर्थः । पशवो वै रेवत्यः इति

श्रुत्यन्तरम् । नः अस्माकम् । सधमादे । सह माद्यति इति सधमादः । इन्द्रे अस्माभिः सङ्गमादौ सति इति एतत् । सन्तु भवन्तु । तुविवाजाः बहुलाः । याभिः रेवतीभिः वयं क्षुमन्तः कीर्तिमन्तः मदेम हृष्येम । क्षु शब्दे इत्यस्मात् क्षु ॥ (९)

सोमः पुषा च चेततुर्विश्वासां सुक्षितीनाम् । देवत्रा रथ्योर्हिता ॥

वामदेवस्यार्षम् । सोमः पूषा च चेततुः जानीतः विश्वासां सुक्षितीनाम् । एते द्वितीयार्थे षष्ठ्यौ । विश्वाः सुक्षितीः सर्वान्सुनिवासान् । कः । देवत्रा । देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलम् । (पा. ५. ४. ५६) इत्येवमत्र सप्तम्यास्त्रा । तेन देवेषु चेततुः । रथ्योः । रथशब्देनात्र यज्ञ उच्यते । रंहतेर्गतिकर्मणः । रथ्योः । रथस्य यज्ञस्य यौ वोढारौ तौ पत्नीयजमानावत्र रथ्यावुच्येते । तयोः । यज्ञस्य देवान् प्रति प्रापयित्रोः पत्नीयजमानयोः । हिता । द्विवचनस्यायमाकारः । हितौ ॥

वामदेवः । सोमः च पूषा च उभौ देवौ चेततुः जानीतः । विश्वासां सुक्षितीनां शोभनानां क्षितीनां प्रजानाम् । कर्मणि षष्ठी । सुकृतः प्रजा जानीत इत्यर्थः । देवत्रा देवेषु । रथ्योः । रथनेता रथिः । रथनायकयोः । हिता निहितौ प्रजापतिना ॥ (१०)

द्वितीये षष्ठ्या दशत्या

पान्तमा वो अन्धस इन्द्रमभि प्र गायत ।
विश्वासाहं शतक्रतुं मंहिष्ठं चर्षणीनाम् ॥

श्रुतकक्षस्यार्षम् । पान्तं पिबतम् । आकारः पादपूरणः । वः । द्वितीयाबहुवचनमिदं प्रथमाबहुवचनस्य स्थाने द्रष्टव्यम् । यूयं हे ऋत्विजः । किं पुनः पिबतम् । उच्यते । अन्धसः । अन्धः अन्नं सोमलक्षणम् । तस्मादियं षष्ठी । षष्ठीनिर्देशाच्च एकदेशमिति वाक्यशेषः । सोमलक्षणस्यान्नस्य एकदेशं पान्तम् । इन्द्रमभिं प्रगायत । गायतीत्यर्चतिकर्म । प्रशब्दः प्रकर्षे । अभिः आभिमुख्ये । आभिमुख्येन स्थित्वा प्रकर्षेण स्तुतेत्यर्थः । कीदृशं पुनरिन्द्रं स्तुमः । उच्यते । विश्वासाहं सर्वेषां शत्रूणामभिभवितारं विश्वसहं वा । शतक्रतुम् । शतमिति बहुनाम । क्रतुरित्यपि कर्मनाम प्रज्ञानाम वा । बहूनि कर्माणि प्रज्ञा वा यस्य स शतक्रतुः । बहुकर्माणं बहुप्रज्ञं वेत्यर्थः । मंहिष्ठम् । मंहतिर्दानकर्मा । तस्मात्कर्तरि तृच् । तृजन्तादिष्ठन् । अतिशयेन दातारमित्यर्थः । कस्मै पुनर्दातारम् । उच्यते । चर्षणीनाम् । चर्षणयो मनुष्याः । षष्ठीबहुवचनं चतुर्थीबहुवचनस्य स्थाने द्रष्टव्यम् । यजमानमनुष्येभ्य इत्यर्थः ॥

श्रुतकक्षः । एतदाद्याः प्रायशः रात्रिपर्यायाणां स्तोत्रीयाः । सुबन्तैरपि उपसर्गाणां असमस्तानां आख्यातैः इव सम्बन्धा दृश्यन्ते । अप विश्वा दुरिता बाधमानः (ऋ. वे. १. ३९. ३) आपान्तं आपिबन्तं आपास्यन्तं अन्धसः अन्नस्य । सोममित्यर्थः । इन्द्रं अभि प्रगायत । वो यूयं हे सपापाः । विश्वासाहं विश्वस्मै अभिभवितारम् । शतक्रतुम् । क्रतुः कर्म प्रज्ञा वा । मंहिष्ठं दातृतमम् चर्षणीनां जनानां यज्वनां स्तोतॄणां च ॥ (१)

प्र व इन्द्राय मादनं हर्यश्वाय गायत । सखायः सोमपाव्ने ॥

वसिष्ठस्यार्षम् । प्रेत्ययमुपसर्गः गायतेत्याख्यातेन सम्बन्धयितव्यः । प्रगायत प्रकर्षेण स्तुतेत्यर्थः । वः । द्वितीयाबहुवचनमिदं प्रथमाबहुवचनस्य

स्थाने द्रष्टव्यम् । यूयं हे ऋत्विजः । कं पुनः स्तुमः । इन्द्राय । चतुर्थ्येकवचनमिदं षष्ठ्येकवचनस्य स्थाने द्रष्टव्यम् । इन्द्रस्य । मादनं सोममित्यर्थः । कीदृशस्येन्द्रस्य । उच्यते । हर्यश्वाय । इदमपि चतुर्थ्येकवचनं षष्ठ्येकवचनस्य स्थाने द्रष्टव्यम् । हरितवर्णावश्वौ यस्य स हर्यश्वः । तस्य हर्यश्वस्य । सखायः ऋत्विजः । सोमपाव्ने । इयमपि चतुर्थी षष्ठ्यर्थे । सोमपातुरिन्द्रस्य मदकरं सोमं स्तुतेत्यर्थः ॥

वसिष्ठः । वः यूयं इन्द्राय इन्द्रार्थं मादनं मदकरं स्तोत्रं हर्यश्वाय इन्द्राय हे सखायः प्रस्तोत्रादयः सोमपाव्ने सोमानां पात्रे । यद्यपि अन्यासामपि देवतानां सोमपानं विद्यते तथापि अतिशयेन इन्द्रस्य अस्ति । त्रिष्वपि सवनेषु प्रस्थितयाज्यानां मुख्याः ऐन्द्र्यः । प्रातस्सवने होतुः शस्त्रयाज्यासु ऐन्द्रावारुणी ऐन्द्राबार्हस्पत्या ऐन्द्रावैष्णवी इति च विद्यते । उक्थ्येऽपि शस्त्रयाज्याः तद्देवत्या एव ऐन्द्रावारुणी ऐन्द्राबार्हस्पत्या ऐन्द्रावैष्णवी इति । षोडशिस्तोत्रशस्त्रे ऐन्द्रे । रात्रिपर्यायाः सर्वे ऐन्द्राः ॥ (२)

वयमु त्वा तदिदर्था इन्द्र त्वायन्तः सखायः । कण्वा उक्थेभिर्जरन्ते ॥

मेधातिथेरार्षम् । वयम् । उ इति पादपूरणः । त्वा त्वाम् । कीदृशा वयम् । उच्यते । तदिदर्थाः । इच्छब्दः पादपूरणः । यस्तवार्थो यागादिः स अर्थो येषां ते तदर्थाः । यागपरा इत्यर्थः । हे इन्द्र त्वायन्तः त्वां यष्टुमिच्छन्तः । सखायः सखिभूताः तव । कण्वाः कण्वस्य पुत्राः मेधातिथिप्रभृतयः । उक्थेभिः स्तोत्रैः । जरन्ते स्तुवन्तीत्यर्थः ॥

मेधातिथिः प्रियमेधश्च द्वावृषी । वयं त्वां स्तुमः इति शेषः । उः पूरणः । तदिदर्थाः स एवार्थः प्रयोजनं येषां ते तदिदर्थाः स्तुत्येकपरार्थाः । उक्तमेव आपरोक्ष्येण कीर्तयति आदरार्थम् । हे इन्द्र त्वायन्तः त्वत्कामाः

सखायः स्तोतारः कण्वाः कण्वपुत्राः उक्थेभिः स्तोत्रैः जरन्ते स्तुवन्ति त्वाम् ॥ (३)

इन्द्राय मद्वने सुतं परिष्टोभन्तु नो गिरः । अर्कमर्चन्तु कारवः ॥

श्रुतकक्षस्यार्षम् । इन्द्राय । तादर्थ्ये चतुर्थी । इन्द्रार्थम् । कीदृशाय इन्द्राय । उच्यते । मद्वने । इयमपि तादर्थ्ये चतुर्थी । मदवत इन्द्रस्यार्थाय । सुतं अभिषुतं सोमम् । परिष्टोभन्तु सर्वतः स्तुवन्तु । नः अस्माकं स्वभूताः । गिरः स्तुतिलक्षणा वाचः । अर्कं देवं सोमम् । अर्चन्तु पूजयन्त्वित्यर्थः । मदीयाः कारवः स्तोतारः । ऋत्विज इत्यर्थः ॥

श्रुतकक्षः । इन्द्राय मद्वने मदनशीलाय । तदर्थं सुतं सोमं परिष्टोभन्तु परि अभिस्तुवन्तु । नः अस्मदीया गिरः वाचः । अर्कं अर्चनीयं इन्द्रं त्वां अर्चन्तु कारवः स्तोतारः ॥ (४)

अयं त इन्द्र सोमो निपूतो अधि बर्हिषि । एहीमस्य द्रवा पिब ॥

इरिम्बिठिर्नाम ऋषिः । तस्येदमार्षम् । अयं सोमः । ते इति तादर्थ्ये एषा चतुर्थी । त्वदर्थमित्यर्थः । हे इन्द्र निपूतः नियमेन दशापवित्रशोधित इत्यर्थः । क्व पुनर्निपूतः । उच्यते । अधि बर्हिषि । बर्हिष उपरि । एतत् ज्ञात्वा आ आभिमुख्येन । इहि द्रव इति द्वावपि गत्यर्थौ । अभ्यासे च भूयांसमर्थं मन्यन्ते । शीघ्रमेहीत्यर्थः । ईमिति पादपूरणः । एत्य च अस्य सोमस्य । षष्ठीनिर्देशात्स्वाङ्गं पिब ॥

इरिम्बिठिः । अयं सोमः हे इन्द्र ते त्वदर्थं निपूतः नितरां शोधितः अधि बर्हिषि स्थितः । अतः एहि आगच्छ । ई एनम् । अस्य इमं पिब । अस्य द्रव त्वरितमागच्छ ॥ (५)

सुरूपकृत्नुमूतये सुदुघामिव गोदुहे । जुहूमसि द्यवि द्यवि ॥

मधुच्छन्दस आर्षम् । सुरूपकृत्नुं शोभनस्य वृत्रवधादेः कर्मणः कर्तारमिन्द्रम् । ऊतये आत्मनः पालनार्थं तस्यैव तर्पणार्थं वा । सुदुघामिव सुदोहनामिव । गोदुहे तस्या एव गोदोहनार्थम् । एतदुक्तं भवति । यथा कश्चिद्गोदोहकर्मा तस्या एव गोदोहनार्थमाह्वयति तद्वत् जुहूमसि आह्वयामः । द्यवि द्यवि अहन्यहनीत्यर्थः ॥

मधुच्छन्दाः । सरूपकृत्नुं सुरूपाणां कर्मणां कर्तारं इन्द्रं जुहूमसि । पुनः पुनराह्वयामः । द्यवि द्यवि दिने दिने । ऊतये रक्षणार्थं तर्पणाय वा । सुदुघामिव दोग्धुं सुशकामिव गां गोदुहे गोदोहनाय । गोशब्दोऽनुवादः । दोहनाय इत्यर्थः ॥ (६)

अभि त्वा वृषभा सुते सुतं सृजामि पीतये । तृम्पा व्यश्नुही मदम् ॥

त्रिशोकस्यार्षम् । अभीत्ययमुपसर्गः सृजामीत्याख्यातेन सम्बन्धयितव्यः । अभिसृजामि । आभिमुख्येन ददामीत्यर्थः । किं तत् । पुरोडाशादिलक्षणं हविः । त्वा । प्रथमैकवचनमिदं चतुर्थ्येकवचनस्य स्थाने द्रष्टव्यम् । ते । हे इन्द्र । वृषभः वर्षितः । कस्मिन् काले हविर्विसृजामि । सुते अभिषुते सोमे । न केवलं सुते सोमे हविरेव ददामि । किं तर्हि । सुतं सृजामि । अभिषुतं च सोमं ते ददामीत्यर्थः । पीतये पानार्थम् । दत्तं च सत् तृम्प भक्षय तर्पय आत्मानं वा । यद्भक्षयितव्यं तद्भक्षय । यत्पातव्यं तत्पिब । पीत्वा च व्यश्नुहि प्राश्नुहि । मदम् ॥

त्रिशोकः । अभि उद्दिश्य त्वा त्वां हे वृषभ वर्षितः कामानां इन्द्र सुते । भावे निष्ठा । अभिषवे सति । सुतं सोमं सृजामि पीतये तव । तृम्पा तृप्य तेन सोमेन व्यश्नुहि व्याप्नुहि मदं हर्षं तृप्त्यर्थम् ॥ (७)

य इन्द्र चमसेष्वा सोमश्चमूषु ते सुतः । पिबेदस्य त्वमीशिषे ॥

कुसीदिन आर्षम् । हे इन्द्र । चमसेष्वा सोमः । आकारः पादपूरणः । चमसेषु व्यवस्थितः सोम इत्यर्थः । चमूषु अभिषवणफलकेषु । ते त्वदर्थम । सुतः अभिषुतः सोमः । पिब । इत् इति पादपूरणः । अथवा चमु भक्षणे । भक्षणीयेषु ग्रहचमसादिषु । अथवा बहुवचनं बहुयज्ञापेक्षम् । बहुषु यज्ञेष्वधिषवणफलकेषु । अस्य सोमस्य । षष्ठीनिर्देशात् एकदेशमिति वाक्यशेषः । कस्मात्पुनरहं पिबामि । उच्यते । यस्मात्त्वं ईशिषे सर्वस्य ईश्वरः ॥

कुसीदी । यः सोमः चमसेषु आ आसिक्तः चमूषु अधिषवणफलकयोः । द्विवचने बहुवचनं व्यत्ययात् । चम्वोः सुतः पिब तं सोमम् । इदिति पूरणः । अस्य सोमस्य त्वं ईशिषे ईशः भवसि ॥ (८)

योगे योगे तवस्तरं वाजे वाजे हवामहे । सखाय इन्द्रमूतये ॥

शुनःशेपस्यार्षम् । योगः नियोगः व्यापारः कर्म वृत्रवधादि । तस्मिन् सर्वस्मिन् । तवः इति बलनाम । तवस्तरं अतिशयेन बलवत् । वाजे वाजे अन्ने अन्ने हविर्लक्षणे उपकल्पिते । हवामहे आह्वयाम इत्यर्थः । हे सखाय ऋत्विजः । इन्द्रं ऊतये तर्पणाय । अथवा योगः अलब्धस्यार्थस्य लाभः । अस्मिन् सर्वस्मिन् । लाभार्थमित्यर्थः । अतिशयेन बलवन्तम् । वाजे वाजे सर्वस्मिन् सङ्ग्रामे । हवामहे हे सखायः । इन्द्रमूतये तर्पणाय आत्मनः पालनार्थम् ॥

शुनश्शेपः । योगे योगे सर्वेषु योगेषु । अप्राप्तानां प्राप्तिर्योगः । तदर्थं तवस्तरं प्रवृद्धतरं इन्द्रम् । वाजे वाजे सर्वेषु युद्धेषु अन्येषु वा निमित्तेषु

हवामहे आह्वयामः स्तुमः इति वा । सखायः स्तोतृत्वेन सहायभूताः वयं इन्द्रम् । ऊतये रक्षणार्थम् ॥ (९)

आ त्वेता निषीदतेन्द्रमभि प्र गायत । सखायः स्तोमवाहसः ॥

मधुच्छन्दस आर्षम् । आ तु इति पादपूरणौ । आ इत क्षिप्रमागच्छत । एत्य च निषीदत । निषद्य च इन्द्रमभिप्रगायत आभिमुख्येन स्तुतेत्यर्थः । हे सखाय ऋत्विजः । स्तोमवाहसः स्तोमानां प्रापयितारः । स्तोतार इत्यर्थः ॥

मधुच्छन्दाः । आ इत्ययं उपसर्गः इतेत्यनेन सम्बन्धनीयः । तु क्षिप्रं आ इत आगच्छत । उपसर्गाभ्यां च आख्यातावृत्तिं सूचयति । हे प्रस्तोत्रादयः आगच्छतागच्छत इति प्रत्येकं स्तोतॄन् आह्वयति । निषीदत उपविशत स्तोतुम् । निषद्य इन्द्रं अभि प्रगायत । हे सखायः प्रस्तोत्रादयः । हे स्तोमवाहसः । स्तोमान् त्रिवृदादीन् स्तोत्राणि वा वहन्ति इति स्तोमवाहसः ॥ (१०)

द्वितीये सप्तम्या दशत्या

इदं ह्यन्वोजसा सुतं राधानां पते । पिबा त्वस्य गिर्वणः ॥

विश्वामित्रस्यार्षम् । इदम् । नपुंसकलिङ्गं व्यत्ययेन पुंलिङ्गं द्रष्टव्यम् । इमम् । हि अनु । द्वावपि पादपूरणौ । ओजसा बलेन । सुतं अभिषुतं सोमं ज्ञात्वा । हे राधानां पते धनानामधिपते । पिब । तु इति पादपूरणः । अस्य । षष्ठीनिर्देशात् एकदेशमिति वाक्यशेषः । हे गिर्वणः ।

गिरः स्तुतयः । ताभिर्यो वन्यते सम्भज्यते स गिर्वणाः । तस्य सम्बोधनं हे गिर्वणः । स्तुतिभिः सम्भजनीय ॥

विश्वामित्रः । इदं अन्नम् । हि इति पूरणः । अनु आनुपूर्व्येण ओजसा बलेन सुतं अभिषुतं अस्माभिः अन्नं सोमम् । त्वदर्थं इति शेषः । राधानां पते धनानां स्वामिन् पिब तु क्षिप्रं अस्य । इदं अन्नं इत्यर्थः । हे गिर्वणः गीर्भिः वननीय । गिरां वा भर्तः ॥ (१)

महाꣳ इन्द्रः पुरश्च नो महित्वमस्तु वज्रिणे । द्यौर्न प्रथिना शवः ॥

मधुच्छन्दस आर्षम् । महान् इन्द्रः पुरश्च परश्चेत्यर्थः सर्वस्मात् । नो इति पादपूरणः । महित्वं माहात्म्यं च । अस्तु भवतु । वज्रिणे । चतुर्थ्येकवचनमिदं षष्ठ्येकवचनस्य स्थाने द्रष्टव्यम् । वज्रिणः वज्रवतः । इन्द्रस्येत्यर्थः । अतिभक्तया एतदाशास्महे । किंच द्यौर्न । नशब्द उपरिष्टादुपचारत्वादुपमार्थीयः । द्यौरिव । प्रथिना पृथुत्वेन । शवः बलं सेनालक्षणम् । अस्त्वित्येतदनुषज्यते ॥

मधुच्छन्दाः । महान् भवति इन्द्रः पुरन्दरः । पुरश्च पुरस्तात् च नः अस्माकं आगच्छतु रक्षणार्थम् । महित्वं महत्वं अस्तु पुनश्च वज्रिणे इन्द्राय । इन्द्रस्येत्यर्थः । द्यौर्न अन्तरिक्षमिव भवतु । प्रथिना प्रथिम्ना पृथुत्वेन । शवः बलं इन्द्रस्य इति इन्द्रभक्त्या आशास्ते । वृद्धस्य चिद्वर्धतामस्य तनूः (ऋ. वे. ६. २४. ७) इति यथा ॥ (२)

आ तू न इन्द्र क्षुमन्तं चित्रं ग्राभं संगृभाय । महाहस्ती दक्षिणेन ॥

कुसीदिन आर्षम् । आ तू इति द्वावपि पादपूरणौ । नः अस्माकं स्वभूतं सोमम् । हे इन्द्र । क्षुमन्तम् । क्षु । क्षु शब्द इत्येतस्येदं रूपम् ।

कीर्तिमन्तम् । चित्रं विचित्रं पूज्यं वा । ग्राभं ग्राह्यं ग्रहणयोग्यम् । अभिसंस्कारैः संस्कृतमित्यर्थः । संगृभाय सम्यक् गृहाण । गृहीत्वा च पिबेत्यभिप्रायः । केन पुनः गृह्णामि । महाहस्ती । महांश्चासौ हस्तश्च महाहस्तः । तस्मादिदं तृतीयैकवचनम् । महता हस्तेनेत्यर्थः । कतमेन । उच्यते । दक्षिणेन ॥

कुसीदी । आ इत्युपसर्गदर्शनात् योग्यक्रियापदाध्याहारः । आहर नः अस्मभ्यं तु क्षिप्रं हे इन्द्र । ग्राभं इति वक्ष्यमाणं इहापि सम्बध्यते । क्षुमन्तं कीर्तिमन्तं कीर्तिसहितं ग्राभम् । तदर्थं चित्रं विचित्रं ग्राभं धनम् । गृह्यते संगृह्यते सर्वैः इति ग्राहः । तं संगृभाय संगृहाण । छन्दसि शायजपि (पा. ३. १. ८४) इति हलः श्नः शानजादेशः । महाहस्ती महान् हस्तो महाहस्तः । महाहस्तवान् त्वं दक्षिणेन हस्तेन ॥ (३)

अभि प्र गोपतिं गिरेन्द्रमर्च यथा विदे । सूनुं सत्यस्य सत्पतिम् ॥

प्रियमेधस्य आर्षम् । अभीत्ययमुपसर्गः अर्चेत्याख्यातेन सम्बन्धयितव्यः । प्रेति पादपूरणः । गोपतिम् । गोशब्देनात्र सोम उच्यते । तस्य पतिः स्वामी । तं गोपतिम् । सोमस्य स्वामिनमित्यर्थः । गिरा स्तुतिलक्षणया वाचा । इन्द्रमभ्यर्च । मध्यमपुरुषैकवचनमिदं उत्तमपुरुषैकवचनस्य स्थाने द्रष्टव्यम् । लोट् लडर्थे द्रष्टव्यः । अभ्यर्चामि । आभिमुख्येन स्तौमीत्यर्थः । कथं पुनः स्तौमि । उच्यते । यथा विदे जानामीत्यर्थः । कीदृशं पुनरिन्द्रं स्तौमि । उच्यते । सूनुं सत्यस्य सत्यस्य पुत्रमित्यर्थः । कथं पुनरिन्द्रः सत्यस्य पुत्रः । उच्यते । त्रैविद्यलक्षणं ब्रह्म सत्यम् । तेन यानि हवींषि हूयन्ते तैर्जन्यते यस्मात्तस्मात्सत्यस्य सूनुः । अथवा सत्यमन्नमुच्यते हविर्लक्षणम् । तेन संजायते आप्यायते वा । तस्मात्सत्यस्य सूनुः । सत्पतिं सतां यजमानानां पतिं पालयितारम् ॥

प्रियमेधः । अभिप्रार्च अभिप्रगाय हे स्तोतः गोपतिं गवां पतिं गवां सोमानां अपां तेजसां गवामेव वा पतिं इन्द्रं गिरा स्तुत्या यथा विदे ज्ञायते त्वया सूनुं सत्यस्य प्रजापतेः सत्पतिं श्रेष्ठानामधिपतिम् । इन्द्रो ज्येष्ठानामधिपतिः इति निगमः ॥ (४)

कया नश्चित्र आ भुवदूती सदावृधः सखा । कया शचिष्ठया वृता ॥

वामदेवस्यार्षम् । कया नः अस्माकम् । चित्रो विचित्रः पूज्यो वा इन्द्रः । आभुवत आभिमुख्येन भवति । ऊती । तृतीयैकवचनस्यायं सुपां सुलुक् (पा. ७. १. ३९) इति पूर्वसवर्णः । ऊत्या तर्पणेन प्रीणनेन वा । कीदृशस्य मम । उच्यते । सदावृधः । सदा यः स्तुतिभिर्हविर्भिश्च देवान्वर्धयति स सदावृत् । तस्य सदावृधः । सर्वदा वर्धयितुर्ममेत्यर्थः । अथवा सदावृधः नित्यवर्धितः इन्द्रः । कया ऊत्या पालनेन । सखा भवति । कया शचिष्ठया । शचीति कर्मनाम । अतिशयेन शची शचिष्ठा । तया शचिष्ठया । अतिशयवत्या यागक्रिययेत्यर्थः । वृता । वर्ततेऽसाविति वृत् । तया वृता । वर्तमानयेत्यर्थः ॥

वामदेवः । कया ऊती ऊत्या तर्पणेन नः अस्मान् आभुवत् अभिमुखो भवेत् । चित्रः चायनीयः पूज्यः सदावृधः सखा च इन्द्रः । कया च आवृता आवर्तमानेन कर्मणा शचिष्ठया । शचीति प्रज्ञाकर्मणोर्नाम । प्रज्ञावत्तमया । प्रज्ञासहितमनुष्ठीयमानया इत्यर्थः ॥ (५)

त्यमु वः सत्रासाहं विश्वासु गीर्ष्वायतम् । आ च्यावयस्यूतये ॥

श्रुतकक्षस्यार्षम् । श्रुतकक्षः पुत्रपौत्रानाह । त्यशब्दः तच्छब्दपर्यायः । तच्छब्दश्रुतेश्च योग्यार्थसम्बन्धो यच्छब्दोऽध्याहर्तव्यः । य उक्तगुण

इन्द्रः तम् । उ इति पादपूरणः । वः । षष्ठीबहुवचनमेतत् ऊतय इत्येतेन सम्बन्धयितव्यः । सत्रासाहम् । सत्राशब्दः सत्यवचनः सदाशब्दपर्यायो वा। सहिः अभिभवे मर्षणे च । अत्र सहिः अभिभवार्थः । सत्येन सर्वदा वा शत्रूणामभिभवितारम्। विश्वासु गीर्षु । सप्तमीबहुवचनमिदं तृतीयाबहुवचनस्य स्थाने द्रष्टव्यम् । विश्वाभिर्गीर्भिः । सर्वाभिः ऋग्यजुस्सामलक्षणाभिर्वाग्भिरित्यर्थः । आयतं निबद्धम्। स्तुतमित्यर्थः । आच्यावयसि । च्यवतिर्गत्यर्थः। मध्यमपुरुषैकवचनमिदं उत्तमपुरुषस्य स्थाने द्रष्टव्यम्। आभिमुख्येन च्यावयामि । गमयामीत्यर्थः । ऊतये युष्माकं पालनार्थमित्यर्थः ॥

श्रुतकक्षः। त्यं तं इन्द्रम्। उः पूरणः। सत्रासाहं विश्वस्याभिभवितारं सर्वदा अभिभवितारं इति वा। विश्वासु गीर्षु स्तुतिषु आयतं अभिगतम्। वः। त्वमित्यर्थः। हे स्तोतः आच्यावयसि गमय ऊतये रक्षणाय तर्पणाय च ॥ (६)

सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् । सनिं मेधामयासिषम् ॥

मेधातिथेरार्षम् । सदः यज्ञगृहम् । तस्य पतिं स्वामिनम् । अद्भुतं महान्तम् । प्रियं इन्द्रस्य । षष्ठ्येकवचनमिदं द्वितीयैकवचनस्य स्थाने द्रष्टव्यम् । इन्द्रम् । कीदृशम् । काम्यं कमनीयं यष्टॄणाम् । सनिं निधानम् । कस्य । सामर्थ्यात् धनस्य । मेधां प्रज्ञां च । अयासिषं याचे इन्द्रम् ॥

मेधातिथिः। सदसस्पतिर्नाम देवः। अग्निविशेषः इति केचित्। तं अद्भुतं महान्तम्। अत्पूर्वात् भवतेरद्भुतः। प्रियं सखायं इन्द्रस्य काम्यं कमनीयम्। सनिं संभवनीयां दात्रीं फलानां मेधां बुद्धिं अयासिषं अयाचिषं याचामि। लडर्थे लुङ्। सनिमिति मेधाविशेषणम्। सन्या मेधया इति बहुशः दर्शनात् ॥ (७)

ये ते पन्था अधो दिवो येभिर्व्यश्वमैरयः । उत श्रोषन्तु नो भुवः ॥

वामदेवस्यार्षम् । ये ते तव स्वभूताः । पन्थाः । एकवचनमिदं बहुवचनार्थे भवति । पन्थानः । क्व । अधो दिवः द्युलोकस्य अधस्तात् । अन्तरिक्षलोके इत्यर्थः । येभिः यैः पथिभिः । व्यश्वं वेगिताश्वम् । शीघ्रमित्यर्थः । ऐरयः पूर्वकालमपि आगतवानसि । ये ते पन्था इति पूर्वस्मिन्नर्धर्चे यच्छब्दस्य श्रुतत्वात् परस्मिन्नर्धर्चे तच्छब्दो योग्यार्थ-सम्बन्धोऽध्याहर्तव्यः । तैरेत्य उत अपिच । श्रोषन्तु । बहुवचनमिदमेक-वचनस्य स्थाने द्रष्टव्यम् । श्रोषतु शृणोतु भवान् । किम् । सामर्थ्यात्स्तुतीः । नः अस्माकं सम्बन्धिनीः । अस्मत्कर्तृका इत्यर्थः । क्व पुनः शृणोतु स्तुतीः । उच्यते । भुवः । भूशब्दः पृथिवीनाम्नां मध्ये पठ्यते । तस्मादियं अवयवलक्षणा षष्ठी । पृथिव्या अवयवे वेद्याख्ये प्रदेशे इत्यर्थः ॥

वामदेवः । ये ते त्वदीयाः पन्थाः पन्थानः सन्ति । अधः अधस्तात् दिवः द्युलोकात् तत्प्राप्तिहेतवः । येभिः यैः पथिभिः व्यश्वं ऋजुकं ऐरयः प्रापयः दिवम । उत अपिच श्रोषन्तु ते पन्थानः शृण्वन्तु नः अस्मदीयाः भुवः भावयित्रीः सतीः । द्युलोकप्रापकाः देवा यज्ञाद्यभिमानिनः वा अत्र विवक्षिताः ॥ (८)

भद्रं भद्रं न आभरेषमूर्जं शतक्रतो । यदिन्द्र मृडयासि नः ॥

श्रुतकक्षस्यार्षम् । भद्रंशब्दः शोभनवचनः । तस्यायमभ्यासः भद्रं भद्रमिति । अभ्यासे च भूयांसमर्थं मन्यन्ते यथा अहो दर्शनीया अहो दर्शनीया इति अतिशयेन दर्शनीया इति गम्यते एवमिहापि भद्रं भद्रं अतिशयेन शोभनमित्यर्थः । नः । चतुर्थीबहुवचनमिदम् । अस्मभ्यम् । आभर । हरेरिदं रूपं हकारस्य भकारापत्त्या । आभर आहर आनय ।

देहीत्यर्थः। किं पुनराहरामि। उच्यते। इषमूर्जम्। द्वे अप्येते अन्ननामनी। अतः पौनरुक्त्यप्रसङ्गात् ऊर्जशब्दोऽत्र रसवचनो द्रष्टव्यः। अन्नं च रसं चेत्यर्थः। हे शतक्रतो। शतमिति बहुनाम। क्रतुरित्यपि कर्मनाम प्रज्ञानाम वा। बहूनि कर्माणि यस्य बह्व्यो वा प्रज्ञाः यस्य स शतक्रतुः। तस्य सम्बोधनं हे शतक्रतो बहुकर्मन् बहुप्रज्ञ वा। कीदृशं च पुनः अन्नं च रसं च भरामि। उच्यते। यत्। तृतीयाया अत्र लुक्। येन अन्नेन रसेन च। मृडयसि सर्वदा सुखयसि। जीवयसीत्यर्थः। नः अस्मान्। परस्ताद्यच्छब्दश्रुतेः पूर्वार्धर्चे तच्छब्दमध्याहृत्य एकवाक्यता नेया। येन अन्नेन रसेन च हे इन्द्र मृडयसि नः तद्भद्रं भद्रं नं आभरेति॥

श्रुतकक्षः। भद्रं भद्रं सर्वं कल्याणं नः अस्मभ्यं आभर इषं पुष्टिं ऊर्जं रसं च आभर हे शतक्रतो। यत् यदि हे इन्द्र मृडयासि सुखय दयां कुर्याः नः अस्मभ्यम्॥ (९)

अस्ति सोमो अयं सुतः पिबन्त्यस्य मरुतः। उत स्वराजो अश्विना॥

पूतदक्षस्य बिन्दोः वा इदमार्षम्। अस्ति विद्यते इत्यर्थः। सोमः अयं सुतः अभिषुतः इत्यर्थः। पिबन्ति। लडयं लोडर्थे द्रष्टव्यः। पिबन्तु। अस्य। षष्ठीनिर्देशात् एकदेशमिति वाक्यशेषः। अथवा षष्ठ्येकवचनं द्वितीयैकवचनस्य स्थाने द्रष्टव्यम्। पिबन्तु एतम्। मरुतः। न केवलं मरुत एव। किं तर्हि। उत अपिचेत्यर्थः। स्वराजम्॥

बिन्दुः पूतदक्षः वा। इयं च गौर्धयतीति च प्रातस्सवने सोमातिरेके स्तोत्रीये विकल्पेन भवतः। अस्ति विद्यते सुतः अयं सोमः। पिबन्ति पिबन्तु

अस्य चमसमित्यर्थः। मरुतः स्वराजः स्वयं दीप्ताः। उत अपि च अश्विना अश्विनौ च पिबतम् ॥ (१०)

द्वितीयेऽष्टम्या दशत्या

ईङ्खयन्तीरपस्युव इन्द्रं जातमुपासते । वन्वानासः सुवीर्यम् ॥

इन्द्रमातरो देवजामयः। तासां आर्षम्। ईङ्खयन्तीः। द्वितीयाबहुवचनमिदं प्रथमाबहुवचनम्। ईङ्खयन्त्यः गच्छन्त्यः। अपस्युवः स्तुतयः। कं प्रति गच्छन्त्यः। प्रकृतत्वादिन्द्रं प्रति गच्छन्त्यः। इन्द्रं जातं जातमेव उपासते। उपगम्येन्द्रं तस्येव समीपे व्यवतिष्ठन्त इत्यर्थः। वन्वानासः। वनु याचने इत्यस्येदं रूपम्। याचमानाः। किं याचमानाः। उच्यते। तस्यैवेन्द्रस्य शोभनं वीर्यम् ॥

इन्द्रमातरः देवजामयः। ईङ्खयन्तीः प्रेरयन्त्यः इन्द्रं इतस्ततः चालयन्त्यः। अपस्युवः अपांसि कर्माणि इन्द्रस्य कामयमानाः इन्द्रमातरः इति आत्मन एव ऋषीणां वचनम्। इन्द्रं जातं उपासते प्रादुर्भूतमुपासते। वन्वानासः संभजमानाः। सुवीर्यं शोभनवीर्ययुक्तं इन्द्रम् ॥ (१)

नकि देवा इनीमसि नक्यायोपयामसि । मन्त्रश्रुत्यं चरामसि ॥

गोधाया आर्षम्। नकि देवा इनीमसि। नेति प्रतिषेधः। कीति निपातोऽनर्थकः। इनीमसि। मिनातेर्हिंसार्थस्य मकारलोपः। तेनैतदुक्तं भवति। हे देवाः न इनीमसि। प्राणिबन्धनकर्म। पश्वादियागं न कुर्म

इत्यर्थः । नक्यायोपयामसि । योपयतिर्विमोहनकर्मा । स इह निखननार्थे द्रष्टव्यः । यूपनिखननमपि न कुर्मः । वृक्षौषध्यादिहिंसामपि न कुर्मः। किं तर्हि । मन्त्रश्रुत्यं मन्त्रश्रवणीयं जपाख्यं चरामसि । जपं कुर्वन्तश्चरामः। प्राणिवधं न कुर्मः । जपमेव कुर्म इत्यर्थः । उक्तं च—

जप्येनैव तु संसिद्ध्येद्ब्राह्मणो नात्र संशयः ।
कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते ।

इति ॥

गोधा । नकि नकिः नकि इति त्रीणि नार्थे वर्तन्ते । नकि इनीमसि। इनातिर्मिनातिना समानार्था हिंसाकर्मा । न हिंस्मः युष्माकं परिचरणादीनि हे देवाः इति पूजायां बहुवचनम् । ऐन्द्रं हीदं सूक्तम् । हे देवेन्द्र नकि आयोपयामसि न मिश्रयामः । सुष्टुतीर्दुष्टुतीश्च न मिश्रयामः । सुकृतानि दुष्कृतानि च साधून्येव आचरामः । मन्त्रश्रुत्यं स्तोत्रश्रवणं चरामसि चरामः कुर्मः ॥ (२)

दोषो आगाद्बृहद्गाय द्युमद्गामन्नाथर्वण । स्तुहि देवं सवितारम् ॥

वामदेवस्यार्षम् । दोषा रात्रिः । उ इति पादपूरणः । आगात् मर्यादया आगच्छति प्रभातम् । यागकालो वर्तत इत्यर्थः । अतो ब्रवीमि । बृहत् गाय उच्चारयेत्यर्थः । किं पुनः उच्चारयामि । सामर्थ्यात्स्तुतिरूपम् । कीदृशं स्तुतिरूपम् । उच्यते । द्युमत् स्वरसौष्ठवयुक्तमित्यर्थः । गामन् । गामान् गाता उच्चारयिता स्तोता । तस्य सम्बोधनं हे गामन् । स्तोतरित्यर्थः । आथर्वण । थर्वतिर्गत्यर्थः । थर्वा गन्ता । न थर्वा अथर्वा । अगन्तेत्यर्थः । अथर्वा यजमानः प्राक् प्रयोगपरिसमाप्तेः वेदिदेशान्नान्यत्र गच्छति । अतोऽसौ अथर्वेत्युच्यते । तस्यायं स्वभूतः स्तोता । तेन स आथर्वणः । तस्य सम्बोधनं हे आथर्वण । मम वामदेवस्य स्वभूत इत्यर्थः । स्तुहि देवं सवितारं सर्वस्य प्रसवितारं बृहता साम्ना । सवितृदेवत्यं च बृहत् ॥

वामदेवः । दोषो आगादिति सन्धिश्छान्दसः । दोषः । दूषयति नाशयति तमांसीति वा दुनोति उपतपति रक्षांसि इति वा दोषः सविता । स आगात् आगतः । बृहत् महत् महाफलं स्तोत्रं गाय उच्चारय द्युमत् दीप्तिमत् स्तोत्रं हे गामन् । गायतीति गामान् स्तोता । हे स्तोतः आथर्वण अथर्वणः पुत्र इत्येवमात्मानमेव अभिमन्त्रयते । स्तुहि देवं सवितारं इति पुनरुक्तिरादरार्था ॥ (३)

एषो उषा अपूर्व्या व्युच्छति प्रिया दिवः । स्तुषे वामश्विना बृहत् ॥

प्रस्कण्वस्यार्षम् । एषा । उकारः पादपूरणः । उषा अपूर्व्या । यतः पूर्वं नास्ति सा अपूर्वा । अपूर्वा एव अपूर्व्या । स्वार्थिकस्तद्धितः । प्रथमेत्यर्थः । व्युच्छति । उच्छ विवासे । विवासयति । किम् । सामर्थ्यात्तमांसि । न चानुदिता तमांसि शक्नोति विवासयितुम् । अतो विवासनेनात्र उदितत्वं लक्ष्यते । उदितेत्यर्थः । प्रिया दिवः । साहचर्यात् प्रियत्वव्यपदेशः । प्रभातसमयो वर्तते । यत एवमतो ब्रवीमि । स्तुषे स्तौम्यहं वां युवां हे अश्विनौ । कथं पुनः स्तौमि । उच्यते । बृहत् महत् अस्त्वित्यर्थः ॥

प्रस्कण्वः । एषो उषाः । उ इत्यनर्थकम् । एषा उषाः अपूर्व्या । पूर्वकालभवाः यस्मान्न सन्तीति । सर्वासां हि देवतानां प्रथमा उषाः । एते वा देवाः प्रातर्यावाणो यदग्निरुषा अश्विनौ (ऐ. ब्रा. २. १५) इति ऐतरेयकम् । व्युच्छति विवासयति तमांसि प्रिया दिवः आदित्यस्य । अतः स्तुषे स्तौमि । वां युवां हे अश्विना अश्विनौ बृहत् बृहन्तौ महान्तौ वाम् । औटो लुक् ॥ (४)

इन्द्रो दधीचो अस्थभिर्वृत्राण्यप्रतिष्कुतः । जघान नवतीर्नव ॥

गोतमस्यार्षम् । अत्रेतिहासमाचक्षते । कालकञ्जा नाम असुराः । तैरसुरैर्बाध्यमाना देवा ब्रह्माणमुपगम्योक्तवन्तः । भगवन् कालकञ्जैरसुरैर्बा-

ध्यामहे । तेषां मारणोपायं विधस्वेति । तच्छ्रुत्वा स तानुवाच । दधीचिर्नाम ऋषिः । तमुपगम्य ब्रूत । स मारणोपायं विधास्यतीति । ते तच्छ्रुत्वा तथेत्यङ्गीकृत्य तं दधीचमुपगम्य उक्तवन्तः । भगवन्नस्मदीयान्यस्त्राणि शुक्रस्तेषां पुरोधा अपहरति । तानि रक्षस्व ततः । स ऋषिस्तानुवाच । मम मुखे प्रक्षिपध्वम् । तत इन्द्रादिभिर्देवैः समरुद्गणैस्तस्य मुखे प्रक्षिप्तानि । पुनः कालेन देवासुरसङ्ग्रामे पर्युपस्थिते एत्य देवा ऊचुः । भगवन् तान्यस्त्राणि प्रयच्छस्वास्माकम् । ततस्तेनोक्तम् । तानि मे जीर्णानि । न तानि पुनः प्राप्तुं शक्यानि । ततः प्रजापतिमुखा देवा ऊचुः । भगवन् प्राणत्यागं कुरुष्वेति । तच्छ्रुत्वा पुनः कृतश्च तेन प्राणत्यागः । तस्य दधीचः स्वभूतैरस्थिभिरिन्द्रो वृत्राणि जघान इति । इन्द्रः दधीचः अस्थभिः वृत्राणि । वृत्राणीति नपुंसकलिङ्गमिदं व्यत्ययेन पुंलिङ्गस्य स्थाने द्रष्टव्यम् । वृत्रान् शत्रूनित्यर्थः । अप्रतिष्कुतः अप्रतिस्खलितः तैः । असुरान् जघान हतवान् । कियन्तः पुनरसुरान् जघान । उच्यते । नवतिर्नव दशोत्तराणि अष्टौ शतानीत्यर्थः ॥

गौतमः । ऋषिराथर्वणो दध्यङ्ङिन्द्रेणास्थीनि याचितः । अस्थीनि प्रददौ तस्मै योगेन स्वां तनुं त्यजन् । तैरस्याकल्पयद्वज्रं त्वष्टा नेता सुरानहन् । इन्द्रो बहून् कालकञ्जान् । तदिह कीर्त्यते । इन्द्रः दधीचः ऋषेः अस्थभिः अस्थिभिः वृत्राणि शत्रून् असुरान् जघान घातितवान् । नवतीः नव । दशाधिकानि अष्टौ शतानि । अप्रतिष्कुतः । ष्कुञ् आप्रवणे । अप्रत्यागतः केनापि ॥ (९)

इन्द्रेहि मत्स्यन्धसो विश्वेभिः सोमपर्वभिः । महाꣳ अभिष्टिरोजसा ॥

मधुच्छन्दस आर्षम् । हे इन्द्र आ इहि आगच्छेत्यर्थः । एत्य च मत्सि हृष्यस्व । अन्धसः । षष्ठ्येकवचनमिदं तृतीयैकवचनस्य स्थाने द्रष्टव्यम् । अन्धसा अन्नेन पुरोडाशादिलक्षणेन । विश्वेभिः सर्वैः सोमपर्वभिः । पर्वाणि

अवयवाः । सोमस्य पर्वाणि सोमपर्वाणि । तैः सोमपर्वभिः । तदर्थमभिषुतैः सोमावयवैस्तृप्यस्वेत्यर्थः । कस्मात् । उच्यते । यस्मान्महान् त्वं अभिष्टिः आभिमुख्येन यष्टव्यश्च । अभ्येषणशीलो वा शत्रूणाम् । ओजसा बलवत्त्वादित्यर्थः ॥

मधुच्छन्दाः । हे इन्द्र आ इहि एहि आगच्छ । मत्सि माद्यस्व अन्धसः अन्नस्य सोमस्य रसेनेत्यर्थः । विश्वेभिः विश्वैः सोमपर्वभिः सोमांशुभिः अभिष्टुतस्य । महान् त्वं अभिष्टिः अभिष्टोता अभिगन्ता शत्रूणाम् । अभिपूर्वादिषेः गतिकर्मणोऽभिष्टिः । ओजसाभिष्टिः इति सम्बन्धः ॥ (६)

आ तू न इन्द्र वृत्रहन्नस्माकमर्द्धमा गहि । महान्महीभिरूतिभिः ॥

वामदेवस्यार्षम् । आ तु इति द्वावपि पादपूरणौ । नः अस्माकं हे इन्द्र वृत्रहन् । वृत्रहा वृत्रशत्रुः वृत्रस्य हन्ता । तस्य सम्बोधनं हे वृत्रहन् । अस्माकं शत्रोर्हन्तरित्यर्थः । अस्माकं स्वभूतं अर्धं वेद्याख्यं स्थानमागच्छ । कस्मात्पुनरेवमुच्यते । यस्मात्त्वं महान् तस्मादित्यर्थः । कथं पुनरागच्छामि । उच्यते । महीभिरूतिभिर्महद्भिः पालनैस्तर्पणैर्वा सह । अस्मान् यैः पालनैस्तर्पणैर्वा पास्यति तर्पयिष्यसि वा तैः सहेत्यर्थः ॥

वामदेवः । आगहि आगच्छ तु क्षिप्रं नः अस्मान् प्रति हे इन्द्र वृत्रहन् । उक्तमेव पुनराह आदरार्थम् । अस्माकमर्धं समीपं आगहि । महान् त्वं महीभिः महतीभिः ऊतिभिः रक्षाभिः सार्धम् ॥ (७)

ओजस्तदस्य तित्विष उभे यत्समवर्तयत् । इन्द्रश्चर्मेव रोदसी ॥

वत्सस्यार्षम् । ओजः बलं तत् अस्येन्द्रस्य स्वभूतं तित्विषे । त्विष दीप्तावित्यस्येदं रूपम् । दीप्यत इत्यर्थः । कतमत् । उच्यते । अपि यत् । तृतीयाया अत्र लुक् । येन बलेन समवर्तयत् संवेष्टयति इन्द्रः । कथं पुनः

संवेष्टयति । उच्यते । चर्मेव । यथा कश्चित् चर्म वेष्टयति तद्वदित्यर्थः । किं पुनः संवेष्टयति । उच्यते । उभे रोदसी द्यावापृथिव्यावित्यर्थः ॥

वत्सः । ओजो बलं अस्य इन्द्रस्य तित्विषे दीप्यते । यत् येन उभे रोदसी द्यावापृथिव्यौ समवर्तयत् संवर्तयेत । इन्द्रः समवर्तयत् इति पञ्चमलकारान्तम् । छन्दस्यपि दृश्यते (पा. ६. ४. ७३) इति अडागमः । चर्मेव यथा चर्म संवेष्टयति चर्मकारः तद्वत् ॥ (८)

अयमु ते समतसि कपोत इव गर्भधिम् । वचस्तच्चिन्न ओहसे ॥

शुनःशेपस्यार्षम् । अयम् । उ इति पादपूरणः । ते तव स्वभूतः अभिषुतः सोमः । कीदृशः । यं प्रति समतसि सम्यक् सततं वा गच्छसि । कथं पुनर्गच्छसि । उच्यते । कपोत इव गर्भधिम् । गर्भं धीयते यस्यां सा गर्भधिः कपोतिका । यथा कामार्तः कपोतः हृष्टमनाः कपोतिकां गच्छति तद्वत्त्वमपि तं समतसीत्यर्थः । एतज्ज्ञात्वा वचः तत् । उत्तरत्र तच्छब्दश्रवणात् पूर्वत्र योग्यार्थसम्बन्धो यच्छब्दोऽध्याहर्तव्यः । यद्यूपे नियुक्तं स्वं वचनं तत् । चिदिति पादपूरणः । नः । बहुवचनमिदं एकवचनस्य स्थाने द्रष्टव्यम् । तन्मम स्वभूतं वचः । ऊहसे । वहेरिदं रूपम् । वहस्व आत्मानं प्रति प्रापय । शृण्वित्यर्थः । ममायमभिप्रायः । सोम एवास्तु । मुञ्च मामिति ॥

शुनश्शेपः । अयं सोमः । उः पूरणः । ते तुभ्यं कल्पितः । यस्मात् अयं ते अतः समतसि । अत सातत्यगमने । सम्यक् आगच्छ । कपोत इव गर्भधिं गर्भस्य धात्रीं कपोतीम् । वचः स्तोत्रं तच्चित् तदेव नः अस्मदीयं ओहसे वहसे हृदयेन ॥ (९)

वात आ वातु भेषजं शंभु मयोभु नो हृदे । प्र न आयूंषि तारिषत् ॥

उलो वातायनः । तस्यार्षम् । वातः आवातु । कीदृशम् । उच्यते । भेषजम् । पथ्यमित्यर्थः । शंभु सुखस्य भावयितृ । इदानीं सुखकरमित्यर्थः । मयोभु । कालान्तरे च सुखस्य भावयितृ इत्यर्थः । अथवा मयो बलम् । तस्य भावयितृ । नो हृदे अस्माकं हृदयस्य । प्रेत्ययमुपसर्गः तारिषदित्याख्यातेन सम्बन्धयितव्यः प्रतारिषत् । प्रवर्धयत्वित्यर्थः । नः अस्माकं आयूंषि । जीवितानीत्यर्थः ॥

वातायन उलः । वातो वायुः आवातु आगमयतु । वातेः अन्तर्भावितण्यर्थः । भेषजं रोगनाशनम् । शंभु । शं शान्तिरुपद्रवाणाम् । तस्य भावयितृ । मयोभु । मयः सुखम् । तस्य भावयितृ । नः अस्माकं हृदे हृदयाय । शंभु मयोभु च इति सम्बन्धः । प्रतारिषत् वर्धयतु नः अस्माकं आयूंषि ॥ (१०)

द्वितीये नवम्या दशत्या

यं रक्षन्ति प्रचेतसो वरुणो मित्रो अर्यमा । नकिः स दभ्यते जनः ॥

कण्वस्यार्षम् । यं रक्षन्ति प्रचेतसः प्रवृद्धज्ञानाः । वरुणः मित्रः अर्यमा । न इत्ययं प्रतिषेधे वर्तते । किः इति पादपूरणः । दभ्यते । सः इति निर्देशे । दभ्नोतिर्वधकर्मा । न स दभ्यते न सः हिंस्यते केनचित् । जनः मनुष्यः ॥

कण्वः । यं जनं रक्षन्ति प्रचेतसः प्रकृष्टज्ञाना देवाः वरुणः मित्रः अर्यमा च स जनः नकिः दभ्यते न हिंस्यते केनापि ॥ (१)

गव्यो षु णो यथा पुराश्वयोत रथया । वरिवस्या मघोनाम् ॥

वत्सस्यार्षम् । गोषु इच्छा गव्या । तस्मात् तृतीयैकवचनम् । तस्य सुपां सुलुक् इति पूर्वसवर्णः । गव्या गव्यया गवीच्छयेत्यर्थः । उ सु इति द्वावपि पादपूरणौ । नः द्वितीयाबहुवचनमिदं प्रथमाबहुवचनस्य स्थाने द्रष्टव्यम् । वयं त्वां स्तुम इति वाक्यशेषः । कथं पुनः स्तुमः । उच्यते । यथा पुरा यथा पूर्वस्मिन् काले अस्तुवन् तद्वत् इत्यर्थः । अश्वया अश्वेच्छया स्तुमः । उत अपिच रथया रथेच्छया स्तुमः । वरिवस्या । वरिवस्यः परिचरणीयः । तस्मात्सम्बुद्धयेकवचनम् । तस्य स्थाने सुपां सुलुक् इति आकारः । वरिवस्या । परिचरणीय इत्यर्थः । कस्य पुनः परिचरणीयः । उच्यते । मघोनाम् । मघं धनं हविर्लक्षणम् । तद्येषामस्ति ते मघवानः हविष्मन्तो यजमानाः । तेषामित्यर्थः ॥

वत्सः । गव्यो । गव्या उ इति समुदायो गव्यो इति । गवादिशब्देभ्यः शसो यादेशः सुपां सुलुक् इत्यादिना । गव्या गाः । सु सुष्ठु नः अस्मभ्यं वरिवस्य प्रयच्छ । यथा पुरा दत्तवानसि । अश्वया अश्वान् । उत अपिच रथया रथान् । वरिवस्य महोनाम् । महो धनं हविर्लक्षणम् । तद्वताम् । महोनां इति चतुर्थ्यर्थे षष्ठी । हविष्मद्भ्यः अस्मद्भ्यम् ॥ (२)

इमास्त इन्द्र पृश्नयो घृतं दुहत आशिरम् । एनामृतस्य पिप्युषीः ॥

वत्सस्यार्षम् । इमाः ते तव सम्बन्धिन्यः । हे इन्द्र पृश्नयः स्तुतयः । घृतं दुहते घृतं दुह्यन्ते । घृतं क्षरन्ति घृतसहिताः क्रियन्ते इत्यर्थः । न केवलं घृतं दुह्यन्ते । किं तर्हि । आशिरं च । सोममिश्रं यत् दधि तत् आशिरम् । तत् दुह्यन्ते । तेन च सह क्रियन्त इत्यर्थः । एनाम् । द्वितीयैकवचनमिदं प्रथमाबहुवचनस्य स्थाने द्रष्टव्यम् । एनाः । ऋतस्य यज्ञस्य पिप्युषीः

ओप्यायी वृद्धावित्यस्येदं रूपम् । द्वितीयाबहुवचनं च प्रथमाबहुवचनस्य स्थाने द्रष्टव्यम् । पिप्युष्यः वर्धयित्र्यः इत्यर्थः ॥

वत्सः । इमाः पृश्नयो गावः ते तुभ्यं घृतं दुहते । आशिरश्च । सोममिश्रं दधि आशिरम् । तच्च । एनां भूमिम् । ऋतस्य ऋतेन उदकेन पिप्युषीः पूरयन्त्यः यज्ञसाधनद्वारेण वृष्टिं उत्पादयन्त्यः ॥ (३)

अया धिया च गव्यया पुरुणामन् पुरुष्टुतः । यत्सोमे सोम आभुवः ॥

श्रुतकक्षस्यार्षम् । अया अनया धिया । धीरिति प्रज्ञानाम । प्रज्ञया । त्वां स्तुम इति वाक्यशेषः । अथवा धीरिति कर्मनाम । अनेन यागाख्येन कर्मणा । त्वां यजाम इति वाक्यशेषः । किमर्थं पुनः स्तुमः । उच्यते । गव्यया गविच्छया । पुरुनामन् । पुर्विति बहुनाम । नमतिः प्रह्वीभावे । बहवः शत्रवः यं प्रति नमन्ति स पुरुनामा । तस्य सम्बोधनं हे पुरुनामन् । बहूनां शत्रूणां प्रह्वीकर्तरित्यर्थः । अथवा बहवो यजमानाः प्रह्वीभूताः । पुरुष्टुतः । बहुभिः स्तोतृभिः स्तुतः । कस्मात् पुनस्त्वां स्तुमः । उच्यते । यत् । पञ्चम्या अत्र लुक् । यस्मात्त्वं सोमे सोमे सर्वसोमयागेष्वित्यर्थः । आभुवः आभिमुख्येन भवसि । यस्मात्त्वं सर्वेषु सोमयागेषु ईश्वरो भवसि तस्मादित्यर्थः ॥

श्रुतकक्षः । अया अनया धिया स्तुत्या । त्वां स्तुम इति शेषः । च इति पूरणः । गव्यया गोकामनया । हे पुरुनामन् बहुरूप बहुनामेत्येव वा । पुरुष्टुत बहुभिः स्तुत । यत् यस्मात् त्वं सोमे सोमे सर्वेषु सोमेषु आभुवः अभिमुखः भवसि । तस्मात् तं त्वाम् ॥ (४)

पावका नः सरस्वती वाजेभिर्वाजिनीवती । यज्ञं वष्टु धियावसुः ॥

मधुच्छन्दस आर्षम् । पापस्यापनयनं पावनं कर्म । तस्य कर्त्री पावका। शोधयित्री इत्यर्थः । अथवा पवतिः क्षरणार्थः । उदकानां क्षरित्री । नः अस्माकं स्वभूता सरस्वती माध्यमिका वाक् । कीदृशी । उच्यते । वाजेभिर्मदीयैरन्नैः हविर्लक्षणैर्वा अन्नैः वाजिनीवती । अन्नवती इत्यर्थः । अथवा वाजेभिरित्यनेन यज्ञस्य विशेषणम् । हविर्लक्षणैरन्नैर्युक्तं यज्ञमित्यर्थः । वाजिनीवती । वाजः बलं वेगो वा । तद्यस्यां विद्यते सा वाजिनी सेना । तद्वती या सा वाजिनीवती । अथवा वाजः अन्नं हविर्लक्षणम् । तद्यस्यामस्ति सा वाजिनीवती । यज्ञं वष्टु कामयतु धियावसुः । धीरिति कर्मनाम प्रज्ञानाम वा । वस्वित्यपि धननाम । धीः वसुभूता यस्यां सा धियावसुः कर्मधना प्रज्ञाधना वा । अथवा वसुरित्येतत् वस आच्छादने इत्येतस्येदं रूपम् । प्रज्ञया आच्छादयित्री सर्वस्य जगतः ॥

मधुच्छन्दाः । पावका शोधयित्री सरस्वती वाक् नः अस्माकं यज्ञं वष्टु इति समन्वयः । वाजेभिः अन्नैः वाजिनीवती । वाजसमूहः वाजिनी । तद्वती । अन्नैः तद्वतीत्यर्थः । यज्ञं इमं वष्टिति वहतेः रूपम् । वाचा हि यज्ञ उह्यते । धियावसुः । धिया प्रज्ञया वासयति व्यापयति जनान् इति धियावसुः । यज्ञं वष्टिति यदाह यज्ञं वहतु इत्येव तदाह इत्यैतरेयकम् ॥ (९)

क इमन्नाहुषीष्वा इदं सोमस्य तर्पयात् । स नो वसून्या भरात् ॥

वामदेवस्यार्षम् । कः मां मुक्त्वा अन्यः इमं इन्द्रं नाहुषीषु । नहुष इति मनुष्यनाम । तेषु भवाः ज्योतिष्टोमाद्याः क्रिया नाहुष्यः । तासु नाहुषीषु । ज्योतिष्टोमादिषु क्रियास्वित्यर्थः । इन्द्रं सोमस्य आ आभिमुख्येन तर्पयात् । तर्पयतीत्यर्थः । अहमेव तर्पयामीत्यभिप्रायः । यत एवमतो ब्रवीमि । स इन्द्रः नः अस्मभ्यं वसूनि धनानि आभरात् आहरतु । ददात्वित्यर्थः ॥

वामदेवः । को जनः अस्माकं सम्बन्धी नाहुषीषु । नहुष इति मनुष्यनाम । मानुषीषु प्रजासु । तासां मध्ये क इमं इन्द्रं सोमस्य । सोमेनेत्यर्थः । आतर्पयात् आतर्पयेत् । किमर्थं इन्द्रस्य तर्पणं आशास्यते तत्राह । स इन्द्रः तर्पितस्सन् नः अस्मभ्यं वसूनि धनानि आभरात् आभरतु ॥ (६)

आ याहि सुषमा हि त इन्द्र सोमं पिबा इमम् । एदं बर्हिः सदो मम ॥

इरिम्बिठेरार्षम् । आयाहि आगच्छ । कस्मात् । उच्युते । सुषुमा हि । हिशब्दो हेतौ । यस्मात्सुषुमः अभिषुणुमः सोमं तस्मादित्यर्थः । ते त्वदर्थं हे इन्द्र । एत्य च पिब इमम् । क्व पुनरभिषुणुमः । उच्यते । इदं बर्हिः । द्वे अप्येते सप्तम्येकवचनान्ते द्रष्टव्ये । अस्मिन् बर्हिषि । क्व पुनर्यत् बर्हिः । उच्यते । सदः । इदमपि सप्तम्येकवचनान्तं द्रष्टव्यम् । सदसि । मम स्वभूते वेद्याख्ये स्थाने इत्यर्थः ॥

इरिम्बिठिः । आयाहि अस्मिन् यज्ञे सुषुमा अभिषुतवन्तः हि ते तुभ्यं वयं सोमं हे इन्द्र मम मदीयम् । पिबा इमं इति दीर्घः गुणाभावश्च छान्दसः । आसदः आसीद । इदं बर्हिः अस्मिन् बर्हिषि स्तीर्णे ॥ (७)

महि त्रीणामवरस्तु द्युक्षं मित्रस्यार्यम्णः । दुराधर्षं वरुणस्य ॥

सत्यधृतेरार्षम् । महि महत् । त्रीणां त्रयाणां स्वभूतमवः पालनं तर्पणं वा अस्तु भवतु । त्रयः मां पालयन्त्वित्यर्थः । कीदृशं पुनस्त्रयाणां सम्बन्धि पालनमस्तु । उच्यते । द्युक्षं दुराधर्षम् । द्वे अप्येते पालनस्य विशेषणे । द्युशब्दः दीप्तिवचनः । क्षि निवासगत्योः । तस्मिन् यत् क्षियति तत् द्युक्षम् । दीप्तमित्यर्थः । दुराधर्षं अन्येन कृच्छ्रेण धार्यते यत् तद्दुराधर्षम् । अन्येनाभिभवितुं न शक्यते इत्यर्थः । केषां पुनस्त्रयाणां पालनं एवंगुणविशिष्टमस्तु । उच्यते । मित्रस्य अर्यम्णः वरुणस्य च ॥

वारुणिः सत्यधृतिः । महि महत् त्रीणां त्रयाणां देवानां अवः रक्षणं अस्तु भवतु । अस्मभ्यं अवोऽस्तु इति बह्वृचाः । द्युक्षं दीप्तम् । प्रसिद्धं सर्वत्र इत्यर्थः । दुराधर्षं अन्यैः । केषां त्रयाणाम् । मित्रस्य अर्यम्णः वरुणस्य च ॥ (८)

त्वावतः पुरूवसो वयमिंद्र प्रणेतः । स्मसि स्थातर्हरीणाम् ॥

वषस्यार्षम् । त्वावतः । वतुप्रकरणे युष्मदस्मभ्यां छन्दसि सादृश्य-उपसङ्ख्यानम् (वा. ५. २. ३९) इत्यौपसङ्ख्यानिको वतुप्रत्ययः । त्वावत् त्वत्सदृशः । त्वत्सदृशस्य । हे पुरूवसो । पुर्विति बहुनाम । वस्विति धननाम । पुरु वसु यस्य सः पुरुवसुः । तस्य सम्बोधनं हे पुरुवसो । बहुधन इत्यर्थः । वयं हे इन्द्र प्रणेतः । प्रपूर्वस्य नयतेः इदं रूपं प्रणेता । तस्य सम्बोधनं प्रणेतः इति भवति । प्रकर्षेण नेतः प्रणेतः प्रकर्षेण नाशयितः शत्रूणाम् । स्मसि भवामः । के भवामः । सामर्थ्यात् स्तोतारः यष्टारश्च । हे स्थात अधिष्ठातः । हरीणामात्मीयानां अश्वानाम् । एतदुक्तं भवति । त्वत्सदृशस्यापि वयं स्तोतारः । किं पुनः तवैव भवामः ।

इति माधवाचार्यकृते छन्दसिकाभाष्ये द्वितीयः प्रपाठकः

वषः । त्वावतः युष्मदस्मद्भ्यां छन्दसि सादृश्ये इति वतुप् । त्वावतः स्वभूतः । स्मसि भवामः वयं हे पुरूवसो बहुधन इन्द्र प्रणेतः विश्वस्य । हरीणां तव वाहनानां स्थातः अधिष्ठातः । हर्योः स्थाता पृश्नेः प्रेता (तै. सं. १. ४. २८. १) इति हि निवित् ॥ (९)

द्वितीयस्य दशमी दशत्या

द्वितीयः प्रपाठकः

तृतीयः प्रपाठकः

उ त्वा मन्दन्तु सोमाः कृणुष्व राधो अद्रिवः । अव ब्रह्मद्विषो जहि ॥

प्रगाथस्यार्षम् । उदिति पादपूरणः । त्वा त्वां मन्दन्तु । मदी हर्षे मदतृप्तावित्यस्य वेदं रूपम् । मदिश्चान्तर्णीतण्यर्थो द्रष्टव्यः । मदयन्तु हर्षयन्तु तर्पयन्तु वेत्यर्थः । सोमाः अभिषवादिभिः संस्कारैः संस्कृताः । त्वमपि तैर्हृष्टः तर्पितो वा कृणुष्व राधः । करोतिः क्रियासामान्यवचनो दानार्थो द्रष्टव्यः । देहि धनमित्यर्थः । हे अद्रिवः । आदरणयोगात् अद्रिः वज्रः । तद्वान् अद्रिवान् । तस्य सम्बोधनं हे अद्रिवः । वज्रिन्नित्यर्थः । न केवलं धनमेव देहि । किं तर्हि । अव ब्रह्मद्विषो जहि । अवेत्ययमुपसर्गो जहीत्याख्यातेन सम्बन्धयितव्यः । जहीति च हन्तेर्गत्यर्थस्येदं रूपम् । अवजहि अधो गमय । नरकं नयेत्यर्थः । कान् । उच्यते । ब्रह्मद्विषः अस्मदीयान् ब्राह्मणान् ये द्विषन्ति ते ब्रह्मद्विषः । तान् । ब्राह्मणद्वेषकानित्यर्थः ॥

प्रगाथः । उत् अधिकं मन्दन्तु मोदयन्तु त्वां सोमाः मदीयाः । तैः कृतमोदः त्वं कृणुष्व देहि । राधः धनं अस्मभ्यं हे अद्रिवः अद्रिवन् । अद्रिः वज्रः । अवजहि अधरात् कृत्वा जहि । ब्रह्मद्विषः असुरान् राक्षसान् ॥ (१)

गिर्वणः पाहि नः सुतं मधोर्धाराभिरज्यसे । इन्द्र त्वादातमिद्यशः ॥

विश्वामित्रस्यार्षम् । गिरः स्तुतिलक्षणा वाचः । ताभियों वन्यते सम्भज्यते स गिर्वणाः । तस्य सम्बोधनं हे गिर्वणः । स्तुतिभिः सम्भजनीय । पाहि रक्ष नः अस्मान् । कस्मात् । उच्यते । सुतम् । द्वितीयैकवचनमिदं षष्ठ्येकवचनस्य स्थाने द्रष्टव्यम् । सुतस्य सोमस्य । मधोः मधुस्वादुयुक्तस्य । अवयवभूताभिः धाराभिः अज्यसे । प्रथमपुरुषैकवचनमिदं मध्यमपुरुषैकवचनस्य स्थाने द्रष्टव्यम् । अज्यते भक्ष्यते । यस्मात्त्वं पिबसीत्यर्थः । यस्माच्च हे इन्द्र त्वादातं त्वया दत्तम् । इदिति पादपूरणः । यशः अन्नं कीर्तिर्वा । तस्मादपि पाहीत्यर्थः ॥

विश्वामित्रः । हे गिर्वणः गीर्भिः वननीय गिरां वा संभक्तः इन्द्र । पाहि पिब नः अस्मदीयं सुतं अभिषुतं सोमं मधोः मादयितुः सोमस्य धाराभिः अज्यसे सिच्यसे त्वम् । त्वादातमित् त्वया दत्तमेव यशो नमस्कारमस्तु । नान्यदत्तं कामयामहे वयम् ॥ (२)

सदा व इन्द्रश्चर्कृषदा उपो नु स सपर्यन् । न देवो वृतः शूर इन्द्रः ॥

वामदेवस्यार्षम् । आत्मीयान् पुत्रपौत्रानाह । सदा सर्वदा वः युष्माकं इन्द्रः चर्कृषत् अत्यर्थं करोति पुनः पुनर्वा करोति । किम् । उच्यते । बलं पुष्टिं धनं हिरण्यं दीर्घं च जीवितम् । आ उप उ नु चत्वारोऽप्येते पादपूरणाः । सशब्दः यच्छब्दमन्तरेण निराकाङ्क्षी न किंचित्प्रतिपद्यते । अतो योग्यार्थसम्बन्धो यच्छब्दोऽध्याहर्तव्यः । यः अधस्तादुक्तगुण इन्द्रः सः । कथं पुनः बलपुष्ट्यादीन् करोति । उच्यते । सपर्यन् । सपर्यतिः परिचरणकर्मा । नशब्द उपरिष्टादुपचारत्वादुपमार्थीयः । परिचरन्निव । यथा कश्चित् कस्मैचित्परिचरन् प्रीतिमुत्पादयति तथेत्यर्थः । देवः दानादिगुणयुक्तः । वृतः अभ्यर्थितः । शूरः विक्रान्तः । इन्द्रः ईश्वरः इत्यर्थः ॥

वामदेवः । सदा सर्वदा वः युष्मभ्यं हे जनाः मदीयाः इन्द्रः आचर्कृषत् आकरोतु भृशं करोतु । करोतेः यङ्लुकि पञ्चमलकारान्तः चर्कृषदिति । आकरणं आनयनम् । उपो उप समीपे । नु क्षिप्रं स इन्द्रः सपर्यन् परिचर्यमाणः । परस्मैपदं व्यत्ययात् । न वृतः न वारितः केनचित् । देवः दाता शूरः इन्द्रः । नहि त्वा शूर देवा न मर्तासो दित्सन्तम् । भीमं न गां वारयन्ते (ऋ. वे. ८. ८१. ३) इति निगमः ॥ (३)

आ त्वा विशन्त्विन्दवः समुद्रमिव सिन्धवः । न त्वामिन्द्रातिरिच्यते ॥

श्रुतकक्षस्यार्षम् । आ इत्येष प्रेत्येतस्य स्थाने विशन्त्वित्याख्यातेन सम्बन्ध्यते । त्वा प्रविशन्तु । त्वया पीयतामित्यभिप्रायः । केन पुनः प्रविशन्तु । उच्यते । समुद्रमिव सिन्धवः । नद्यो यथा समुद्रं प्रविशन्ति तद्वदित्यर्थः । कस्मात् । उच्यते । यस्मात्त्वाम् । द्वितीयैकवचनमिदं पञ्चम्येकवचनस्य स्थाने द्रष्टव्यम् । यस्मात्त्वत्तः हे इन्द्र अन्यद्देवान्तरं नातिरिच्यते । सर्वेषां देवतानां यस्मात् त्वमुत्कृष्टतरस्तस्मादित्यर्थः ॥

श्रुतकक्षः । आविशन्तु त्वा इन्दवः सोमाः समुद्रमिव सिन्धवः । न त्वां कश्चित् अतिरिच्यते हे इन्द्र ॥ (४)

इन्द्रमिद्गाथिनो बृहदिन्द्रमर्केभिरर्किणः । इन्द्रं वाणीरनूषत ॥

मधुच्छन्दस आर्षम् । इन्द्रं इत् । इच्छब्दः अवधारणे । इन्द्रमेव गाथिनः । गाथानि सामानि । तद्वतो गाथिनः उद्गातारः । बृहत् । प्रथमैक-वचनमिदं तृतीयैकवचनस्य स्थाने द्रष्टव्यम् । बृहता बृहन्नाम्ना महता वा । इन्द्रं अनूषतेत्येतत् परस्ताच्छ्रुतम् । अभिष्टुवन्तीत्यर्थः । इन्द्रमेव अर्केभिः । अर्काः मन्त्राः । तैः अर्केभिः । मन्त्रैरित्यर्थः । अर्किणः मन्त्रवन्तः

स्तोतारः । अभिष्टुवन्तीत्यनुषज्यते । इन्द्रमेव वाणीः । द्वितीयाबहुवचनमिदं तृतीयाबहुवचनस्य स्थाने द्रष्टव्यम् । वाणीभिः यज्ञलक्षणाभिर्वाग्भिः अभिष्टुवन्ति अध्वर्यवः ॥

मधुच्छन्दाः । इन्द्रमित् इन्द्रमेव गाथिनः । गाथा गीतिः । तद्वन्तः उद्गातारः अनूषत । णु स्तवने । स्तुवन्ति । बृहत् बृहन्तमिति वा बृहता साम्ना इति वा । इन्द्रं अर्केभिः शस्त्रैः अर्किणः शस्त्रिणः होतारः अनूषत । किं बहुना इन्द्रमेव वाणीः वाण्यः सर्वाः अनूषत ॥ (५)

इन्द्र इषे ददातु न ऋभुक्षणमृभुं रयिम् । वाजी ददातु वाजिनम् ॥

श्रुतकक्षस्यार्षम् । इन्द्रः ईश्वरः इषे । चतुर्थ्येकवचनमिदं द्वितीयैकवचनस्य स्थाने द्रष्टव्यम् । इषमन्नं ददातु नः अस्मभ्यं । न केवलमन्नमेव । किं तर्हि । ऋभुक्षणं महान्तं ऋभुं मेधाविनं रयिं पुत्रलक्षणं च धनं ददत्वित्यर्थः । किं च वाजी वेगवानिन्द्रः ददातु वाजिनमश्वम् ॥

श्रुतकक्षः । इयं ऐन्द्री । आर्भवीत्येके । सुधन्वनः त्रयः पुत्राः ऋभुः विभ्वा वाजी इति । ते त्रयोऽपि क्वचिदृभव इत्युच्यन्ते । क्वचित् वाजा इति । तेषामाद्यन्तयोर्नाम दृश्यन्ते बहुवत् स्तुतिः (बृ. दे. ३. ८९) इति बह्वृचानां बृहद्देवताख्ये ग्रन्थे विद्यते । आर्भवीति पक्षे तावत् योज्यते । इन्द्र इषे अन्नाय अन्नसिध्यर्थं ददातु । नः अस्मभ्यं ऋभुक्षणं महान्तं ऋभुं सौधन्वनं रयिं रयिमन्तं वाजी वाजिनं सौधन्वनं ददातु । अस्मदभिमुखं करोतु । ऐन्द्रपक्षेऽपि इन्द्र इषे इति वचनव्यत्ययः । इषं नः अस्मभ्यं ददातु ऋभुक्षणं ऋभुक्षयं उरुनिवासं ऋभुं महान्तं रयिं धनं वाजिनं अन्नयुक्तं रयिं वाजी इन्द्रः ॥ (६)

इन्द्रो अङ्ग महद्भयमभीषदप चुच्यवत् । स हि स्थिरो विचर्षणिः ॥

गृत्समदस्यार्षम् । गृत्समदः बहूनुत्पातान् दृष्ट्वा इन्द्रमनया ऋचा स्तौति । इन्द्रः अङ्ग क्षिप्रं महत् भयं अभि सत् आभिमुख्येन सीदत् । पर्युपस्थितम् । वातादय उत्पाताः भयसूचकाः । तान् अपचुच्यवत् अपच्यावयति । अपगमयतीत्यर्थः । कस्मात्पुनः अपनयति । उच्यते । यस्मात स हि स्थिरः अविचलो नित्यः । विचर्षणिः लोकपालत्वात्सर्वत्र मनुष्याणां शुभस्य अशुभस्य च कर्मणो द्रष्टा ॥

गृत्समदः । इन्द्रः अङ्ग क्षिप्रं महत् भयं भयकारणं अभिषदभितः सम्भवदिति वा अभिभवदिति वा । अपचुच्यवत् अपच्यावयतु । स हि इन्द्र स्थिरो विचर्षणिः विद्रष्टा च भवति भक्तक्लेशानाम् ॥ (७)

इमा उ त्वा सुते सुते नक्षन्ते गिर्वणो गिरः । गावो वत्सं न धेनवः ॥

शंयोरार्षम् । इमाः उ इति पादपूरणः । त्वा त्वां सुते सुतेऽभिषुते सोमे । यागकाले इत्यर्थः । नक्षन्ते । व्याप्नुवन्ति । हे गिर्वणः गीर्भिर्वननीय स्तुतिभिः संभजनीय । काः पुनर्व्याप्नुवन्ति । उच्यते । गिरः स्तुतिलक्षणा वाचः । कथं पुनर्व्याप्नुवन्ति । उच्यते । गावो वत्सं न । नशब्द उपरिष्टादुपाचारत्वादुपमार्थीयः । वत्सं गाव इव । कीदृश्यो गावः । उच्यते । धेनवः । अचिरप्रसूताः । यथा अचिरप्रसूता गावः स्नेहार्द्रेण मनसा वत्सं व्याप्नुवन्ति तद्वत्त्वां हे इन्द्र अस्मदीयाः स्तुतयः व्याप्नुवन्तीत्यर्थः ॥

शंयुः भारद्वाजः । इमाः गिरः त्वा त्वां नक्षन्ते व्याप्नुवन्ति सुते सुते सोमेषु सोमेषु सुतेषु हे गिर्वणः गाव इव धेनवः वत्सम् ॥ (८)

इन्द्रा नु पूषणा वयं सख्याय स्वस्तये । हुवेम वाजसातये ॥

भरद्वाजस्यार्षम् । इन्द्रापूषणा नु क्षिप्रं वयम् । बहुवचनमिदं एकवचनस्य स्थाने द्रष्टव्यम् । अहम् । सख्याय स्तुत्यस्तोतृलक्षणाय सखिभावाय । स्तोतुमित्यर्थः । स्वस्तये अविनाशाय । आत्मनः पालनाय चेत्यर्थः । हुवेम । इदमपि बहुवचनमेकवचनस्य स्थाने द्रष्टव्यम् । आह्वयामि । वाजसातये । वाजः अन्नम् । तस्य च सातये सम्भजनाय । तस्य लाभार्थेमित्यर्थः ॥

भरद्वाजः । इन्द्रापूषणा इति परस्परापेक्षया द्वित्वम् । इन्द्रं च पूषणं च । नु अद्धा । वयं हुवेम । सख्याय स्वस्तये सखिभावाय च अविनाशाय । वाजसातये अन्नलाभाय च ॥ ९ ॥

नकि इन्द्र त्वदुत्तरं न ज्यायो अस्ति वृत्रहन् । नक्येवं यथा त्वम् ॥

वामदेवस्यार्षम् । नकि । न कश्चिदित्यर्थः । हे इन्द्र त्वत् । पञ्चम्या अत्र लुक् द्रष्टव्यः । त्वत्तः । अन्यो देवः उत्तरं उत्तरः उत्कृष्टतरः । न ज्यायान् न प्रशस्ततरः वृद्धतरो वा अस्ति हे वृत्रहन् । नकि न कश्चित् एवं सर्वोपकारप्रवृत्तः यथा त्वम् ॥

वामदेवः । नकि न भवति किंचित् । त्वत् त्वत्तः । उत्तरं उत्कृष्टं हे इन्द्र । नास्ति ज्यायः प्रशस्ततरः च त्वत्तः हे वृत्रहन् । यथा यथाविधस्त्वं भवसि । एवं एवंविधः नकि नास्ति ॥ १० ॥

तृतीये प्रथमा दशत्या

तरणिं वो जनानां त्रदं वाजस्य गोमतः। समानमु प्रशंसिषम् ॥

त्रिशोकस्यार्षम्। तरणिं क्षिप्रम्। वः। द्वितीयाबहुवचनमिदमेकवचनस्य स्थाने द्रष्टव्यम्। त्वाम्। जनानां असुरजनानाम्। त्रदं तर्दयितारम्। हिंसितारमित्यर्थः। वाजस्य गोमतः अन्नस्य गोसहितस्यार्थाय। समानं सदृशम्। योग्यमित्यर्थः। उ इति पादपूरणः। प्रशंसिषं प्रकर्षेण स्तौमीत्यर्थः ॥

त्रिशोकः। तरणिं तारकं आपद्भ्यः। जनानां स्तोतॄणाम्। वः। त्वमित्यर्थः। त्रदं तर्दनं प्रकाशयितारं दातारं वा। वाजस्य गोमतः। वाजस्य अन्नस्य गोमतः गोसहितस्य। समानं साधारणं सर्वेषाम्। उः पूरणः। प्रशंसिषं प्रशंसामि ॥ १ ॥

असृग्रमिन्द्र ते गिरः प्रति त्वामुदहासत। सजोषा वृषभं पतिम् ॥

मधुच्छन्दस आर्षम्। असृग्रं विसृष्टवानहम्। हे इन्द्र ते तव गिरः स्तुतीः। विसृष्टाश्च ताः गच्छन्तु त्वां प्रति। उदहासत। ओहाङ् गतावित्यस्येदं रूपम्। ऊर्ध्वं गच्छन्तु इत्यर्थः। कीदृशं त्वां प्रति गच्छन्तु। उच्यते। वृषभं वर्षितारं पतिं स्वामिनम्। गताः च ताः सजोषाः। जुषी प्रीतिसेवनयोरित्यस्येदं रूपम्। सेवितवानसि ॥

मधुच्छन्दाः। असृग्रं असृज्यन्त सृज्यन्ते उच्यन्ते। हे इन्द्र ते त्वदर्थम्। गिरः स्तुतयः। ताश्च सृष्टाः त्वां प्रति उदहासत उद्गच्छन्तु। लोडर्थे व्यत्ययेन लङ्। ओहाङ् गतौ। सजोषाः सजोषसः हे सेव्यमानाः। वृषभं वर्षितारं पतिं विबुध्य त्वां प्रति ॥ २ ॥

सुनीथो घा स मर्त्यो यं मरुतो यमर्यमा। मित्रस्पान्त्यद्रुहः ॥

वत्सस्यार्षम् । सुनीथः सुप्रशस्तः । घ इति पादपूरणः । स मर्त्यः मनुष्यः यं मरुतः यं अर्यमा यं मित्रः च । त्रयोऽप्येते यं पान्ति रक्षन्ति अद्रुहः अद्रोग्धारः सः सुनीथ इति ॥

वत्सः। सुनीथः सुमार्गः स भवति मर्त्यः यं मरुतः पान्ति रक्षन्ति। यं अर्यमा मित्रश्च पात इति विपरिणामेन सम्बन्धः। अद्रुहः अद्रोग्धारः स्तोतॄणाम्। मरुतां वा विशेषणम्। इतरयोश्च विपरिणामेन ॥ ३ ॥

यद्वीडाविन्द्र यत्स्थिरे यत्पर्शाने पराभृतम् । वसु स्पार्हं तदाभर ॥

त्रिशोकस्यार्षम् । यत् वीडौ दृढे । यत्स्थिरे पर्वतादौ । पर्शाने कूपादौ पराभृतं सम्भृतम् । संस्थापितमित्यर्थः । वसु धनं स्पार्हं स्पृहणीयम् । तत् अस्मभ्यं आभर । आनयेत्यर्थः ॥

त्रिशोकः। यत् वसु धनं वीडौ दृढे पुरुषे। यच्च स्थिरे यच्च पर्शाने निश्चले पराभृतं संभृतम्। स्पार्हं स्पृहणीयं तदाभर आहर ॥ ४ ॥

श्रुतं वो वृत्रहन्तमं प्र शर्द्धं चर्षणीनाम् । आशिषे राधसे महे ॥

सुकक्षस्यार्षम् । श्रुतं विख्यातम् । वः । बहुवचनमिदं द्वितीयैकवचनस्य स्थाने द्रष्टव्यम् । त्वाम् । वृत्रहन्तमं अतिशयेन शत्रूणां हन्तारम् । प्रेति पादपूरणः । शर्धं उत्साहिनं बलवत्तरम् । चर्षणीनां मनुष्याणां मध्ये । आशिषे अधिगच्छामि । प्रार्थये इत्यर्थः । राधसे महे । द्वे अप्येते चतुर्थ्येकवचने द्वितीयैकवचनस्य स्थाने द्रष्टव्ये । राधः महत् । महद्धनं इत्यर्थः ॥

सुकक्षः। श्रुतं विश्रुतम्। वः त्वाम्। वृत्रहन्तमं अतिशयेन वृत्रहणम्। शर्धं वर्धयितारं चर्षणीनाम्। प्र प्रकर्षेण। आशिषे इति श्वयतेरर्थकर्मणः शवतेः श्रयतेः वा लटि रूपम्। अभिगच्छामि। राधसे धनार्थम्। महे महते। तत् लब्धुम्॥ ५॥

अरं त इन्द्र श्रवसे गमेम शूर त्वावतः। अरं शक्र परेमणि॥

वामदेवस्यार्षम्। अरं अलम्। प्रभूतमित्यर्थः। ते तव हे इन्द्र श्रवसे। चतुर्थ्येकवचनमिदं द्वितीयैकवचनस्य स्थाने द्रष्टव्यम्। श्रवः अन्नं सोमलक्षणम्। गमेम गमयेम। दधामि इत्येतदाशास्महे। हे शूर त्वावतः। मतुप्प्रकरणे युष्मदस्मभ्यां छन्दसि सादृश्य उपसङ्ख्यानात् वत्प्रत्ययः। त्वावतः त्वत्सदृशस्येत्यर्थः। अतिभक्ततया ब्रूमः। त्वत्सदृशस्यापि श्रवः गमेमः। किं पुनः सूत्वेत्यभिप्रायः। अरं अलम्। अभ्यासेन भूयानर्थः प्रतीयते। सुष्ठु प्रभूतं दधामीत्यर्थः। हे शक्र। क्व पुनः दधाम्। उच्यते। परेमणि। परं उत्कृष्टं स्वर्गाख्यं स्थानम्। तत्र गम्यते येन सः परेमा यज्ञः ज्योतिष्टोमादिः। तत्रेत्यर्थः॥

वामदेवः। अरं पर्याप्तं गमेम उपगच्छामः। त्वां ते त्वदीयाय। श्रवसे अन्नाय। हे इन्द्र हे शूर। त्वावतः त्वत्सदृशस्य। परेमणि। पॄ पालनपूरणयोः इत्यस्मात् परेमा। तस्मिन्निमित्ते। तद्रक्षणार्थं च। अरं गमेमहि॥ ६॥

धानावन्तं करम्भिणमपूपवन्तमुक्थिनम्। इन्द्र प्रातर्जुषस्व नः॥

विश्वामित्रस्यार्षम्। धानाः सन्ति यस्य स धानावान्। तं धानावन्तम्। करम्भिणम्। करम्भश्च दधिसक्तवः उच्यन्ते। सः अस्मिन्नस्तीति करम्भी। तं करम्भिणं सोमम्। अपूपवन्तम्। अपूपा

अस्मिन् सन्तीति अपूपवान्। तमपूपवन्तम्। उक्थिनम्। उक्थानि स्तोत्राणि। तानि यस्मिन् सन्ति स उक्थी। तमुक्थिनम्। स्तोत्रवन्तं इत्यर्थः। एवंगुणविशिष्टं सोमं हे इन्द्र प्रातः प्रातःसवने। जुषस्व सेवस्व। नः अस्माकं स्वभूतम्॥

विश्वामित्रः। इयं प्रातस्सवने सवनीयपुरोडाशानां पुरोनुवाक्या बह्वृचानाम्। प्रस्तोतुरपि साम अस्यां गीयमानं यत्र कचित् ब्राह्मणेन नूनं विनियुज्यते पुरोडाशयागे। धानावन्तम। धानाः भ्रष्टयवाः। तद्वन्तम्। ताभिः सहितम्। करम्भिणम्। धानाः पिष्टाः आज्येन संयुक्ताः करम्भः। तद्वन्तम्। अपूपवन्तम्। अपूपः पुरोडाशः। तद्वन्तम्। उक्थिनं स्तुतशस्त्रसहितं सोमम्। हे इन्द्र प्रातः प्रातस्सवने जुषस्व सेवस्व नः अस्मदीयम्॥ ७॥

अपां फेनेन नमुचेः शिर इन्द्रोदवर्तयः। विश्वा यदजयः स्पृधः॥

गोषूक्ती चाश्वसूक्ती च इमामृचं दृष्टवान्। अत्रेतिहासमाचक्षते। इन्द्रश्च वै नमुचिश्चासुरः समदधाताम्। न नो नक्तं न दिवाहनं नार्द्रेण न शुष्केणेति। तस्य व्युष्टायामनुदित आदित्येऽपां फेनेन शिरोऽछिनत्। एतद्वै न नक्तं न दिवा। यद्व्युष्टायामनुदित आदित्ये। एतन्न आर्द्रं न शुष्कं यदपां फेनः। तदेनं पापीयां वाचं वदन्नन्ववर्तत वीरहन् न द्रुहो द्रुह इति। तं नर्चा न साम्ना अपाहन्तुमशक्नोत्। तत् हारिवर्णस्यैव निधनेनापाहत। अप शुचं हते हारिवर्णस्य निधनेन श्रियं च हरश्चोपैति तुष्टुवानः। एतदनयोच्यते। अपामुदकानां फेनेन नमुचेः असुरस्य शिरः हे इन्द्र उदवर्तयः उदवर्तितवान्। छिन्नवानित्यर्थः। कदा। उच्यते। विश्वाः सर्वाः यत्। सप्तम्या अत्र लुक् द्रष्टव्यः। यदा अजयः जितवानसि। स्पृधः। स्पृध इति सङ्ग्रामनाम। तं

स्पृधयति इति क्विप् । स्पृधातोः स्पृधः । सङ्ग्रामकारिणीः । स्त्रीलिङ्गनिर्दे-शात्सेनाः ॥

गोषूक्त्यश्वसूक्तिनौ । अपां फेनेन अतिलघुना । नमुचेः असुरस्य । शिरः उदवर्तयः उद्वर्तितवान् असि । उद्वर्तनं विशरणम् । हे इन्द्र विश्वाः स्पृधः स्पर्धमानाः सेनाः । यत् यदा अजयः तदा शिर उदवर्तयः ॥ ८ ॥

इमे त इन्द्र सोमाः सुतासो ये च सोत्वाः । तेषां मत्स्व प्रभूवसो ॥

वामदेवस्यार्षम् । इमे ते तव इन्द्र सोमाः सुतासः सुताः । अभिषुता इत्यर्थः । कतमाः । उच्यते । ये सोत्वाः सोतव्याः । अभिषवार्हा इत्यर्थः । तेषां मत्स्व । मद तृप्तावित्यस्येदं रूपम् । तृप्यस्व । तर्पणेनात्र पानं लक्ष्यते । तान् पिबेत्यर्थः । प्रभूवसो । प्रभु बहु वसु धनं यस्य स प्रभुवसुरेव प्रभूवसुः । छान्दसं दीर्घत्वम् । तस्य सम्बोधनं हे प्रभूवसो । प्रभूतधन इत्यर्थः ॥

वामदेवः । हे इन्द्र इमे सोमाः ते त्वदर्थं सुतासः अभिषुतास्तिष्ठन्ति हे इन्द्र । ये च सोमाः सोत्वाः । सुनोतेः कृत्यार्थे तवैकेन्केन्यत्वनः (पा. ३. ४. १४) इति त्वन्प्रत्यये रूपं सोत्वा इति । सोतव्याः । तेषाम् । तैः इत्यर्थः । मत्स्व तृप्तो भव हे प्रभुवसो प्रभूतधन ॥ ९ ॥

तुभ्यं सुतासः सोमाः स्तीर्णं बर्हिर्विभावसो । स्तोतृभ्य इन्द्र मृडय ॥

सुकक्षस्यार्षम् । तुभ्यं त्वदर्थम् । हे इन्द्र सुतासः सुताः । अभि-षुता इत्यर्थः । सोमाः । न केवलं सोमाः अभिषुताः । स्तीर्णं च वेद्याख्ये प्रदेशे बर्हिः हे विभावसो । विविधं भाति दीप्यते वसुर्यस्य सः विभावसुः ।

तस्य सम्बोधनं हे विभावसो । दीप्तधन इत्यर्थः । एतत् ज्ञात्वा स्तोतृभ्यः । चतुर्थीबहुवचनमिदं द्वितीयाबहुवचनस्य स्थाने द्रष्टव्यम् । अस्मत्प्रभृतीन् स्तोतॄन् । हे इन्द्र मृडय सुखय । स्तोतृभ्यः धनं देहीत्यर्थः ॥

सुकक्षः । तुभ्यं त्वदर्थं सुतासः अभिषुताः सोमाः । स्तीर्णं च बर्हिः त्वदर्थं हे विभावसो दीप्तधन । दीप्तिभिः व्यापक इति वा । ततो बर्हिषि निषद्य सोमान् पीत्वा स्तोतृभ्यः अस्मभ्यं मृडय उपदयां कुरु हे इन्द्र ॥ १० ॥

तृतीये द्वितीया दशत्या

आ व इन्द्रं क्रिविं यथा वाजयन्तः शतक्रतुम् । मंहिष्ठं सिञ्च इन्दुभिः ॥

शुनःशेपस्यार्षम् । आ इत्ययमुपसर्गः सिञ्चे इत्याख्यातेन सम्बन्धयितव्यः । वः इति द्वितीयाबहुवचनमिदं द्वितीयैकवचनस्य स्थाने द्रष्टव्यम् । त्वां इन्द्रम् । क्रिविं यथा । क्रिविरिति कूपनाम । तत्सामीप्यात् आवाहकोऽपि क्रिविरुच्यते । यथाशब्द उपमावाची । आवाहकमिव । यथा कश्चित् आवाहकमुदकेन आसिञ्चति तद्वदित्यर्थः । वाजयन्तः पूजयन्त इत्यर्थः । अथवा वाजः अन्नम् । तदिच्छन्त इत्यर्थः । कीदृशं त्वाम् । उच्यते । शतक्रतुम् । शतमिति बहुनाम । क्रतुरित्यपि कर्मनाम यज्ञनाम वा । बहुकर्माणं बहुयज्ञं वेत्यर्थः । मंहिष्ठं अतिशयेन दातारम् । अथवा पूजनीयतमम् । आसिञ्चे । एकवचनमिदं बहुवचनस्य स्थाने द्रष्टव्यम् । आसिञ्चामः इत्येतदाशास्महे ॥

शुनश्शेपः। आसिञ्चे इन्दुभिः सोमैः वः त्वां इन्द्रम्। मंहिष्ठं दातृतमम्। शतक्रतुं शतकर्माणं शतप्रज्ञं वा। वाजयन्तः इति वचनव्यत्ययः। वाजं अन्नं इच्छन् अहम्। अथवा आसिञ्चे इत्यत्र वचनव्यत्ययः। आसिञ्चामः इति। क्रिविं कूपं यथा अद्भिः आसिञ्चति कृत्रिमं तद्वत् इन्दुभिः त्वां आसिञ्चामि ॥ १ ॥

अतश्चिदिन्द्र न उप याहि शतवाजया। इषा सहस्रवाजया ॥

श्रुतकक्षस्यार्षम्। अतः स्वर्गाख्यात् स्थानात्। चिदिति पादपूरणः। हे इन्द्र नः उपयाहि अस्मत्समीपमागच्छ। केन पुनरागच्छामि। उच्यते। शतवाजया। शतमिति बहुनाम। वाजः वेगः। बहुर्वेगो यस्याः सा शतवाजा। तया शतवाजया बहुवेगया। शीघ्रया गत्या उपयाहीत्यर्थः। इषा। इषेत्यन्ननाम। तया इषा अन्नेन च। अस्मदीयेन सहान्नेनेति वाक्यशेषः। कीदृश्या इषा। उच्यते। सहस्रवाजया। तया बहुभिरवयवैरुपेतया। नः अस्मकीयेनान्नेन गृहीतेनेत्यर्थः ॥

श्रुतकक्षः। अतः एतस्मात् द्युलोकात् उपयाहि उपगच्छ। चिदिति पूरणः। हे इन्द्र नः अस्मान्। शतवाजया सहस्रवाजया इति च बहुलयुक्तया इत्यर्थः। इषा अन्नेन सह ॥ २ ॥

आ बुन्दं वृत्रहा ददे जातः पृच्छाद्वि मातरम्। क उग्राः के ह शृण्विरे ॥

त्रिशोकस्यार्षम्। आ इत्ययमुपसर्गः। ददे इत्याख्यातेन सम्बन्धयितव्यः। बुन्दं इषुम्। वृत्रहा मेघस्य हन्ता इन्द्रः। आददे आदत्तवान्। जातः जातमात्र एव। आदाय च पृच्छात्। वि इत्ययं छन्दसि परेऽपि (पा. १. ४. ८१) इति परप्रयुक्तः सन् पूर्वो द्रष्टव्यः। विपृच्छात्।

विविधं पृष्टवानित्यर्थः। कं पृष्टवान्। उच्यते। मातरं जनयित्रीं अदितिम्। किं पृष्टवान्। उच्यते। के उग्राः अप्रसह्याः अस्मच्छत्रवः के वा स्फुटं ह शृण्विरे श्रूयन्ते विख्याता इति शीघ्रमाचक्ष्व यानहं हन्मीति ॥

त्रिशोकः। आददे आदत्तवान् इन्द्रः वृत्रहा जातः जातमात्र एव। बुन्दम्। वृन्देन समानार्थः। दृढम्। वज्रमित्यर्थः। जातमात्र एव विपृच्छात् पप्रच्छ। मातरं स्वाम्। कथं विपृच्छात्। के उग्राः उद्गीर्णाः ओजस्विन इति वा। के ह के च शृण्विरे श्रूयन्ते बलादिभिः ॥ ३ ॥

बृबदुक्थं हवामहे सृप्रकरस्नमूतये। साधु कृण्वन्तमवसे ॥

मेधातिथेरार्षम्। बृबत्। बृहच्छब्दः। हकारस्य वकारापत्त्या रूपम्। उक्थ्यशब्दः स्तोत्रवचनः। बृबत् उक्थं यस्य स बृबदुक्थः। तं बृबदुक्थम्। बृहत्स्तोत्रमित्यर्थः। वक्तव्यमस्मै उक्तमिति वा। इन्द्रं हवामहे आह्वयामः। सृप्रकरस्नम्। करस्नू बाहू। सृप्रौ गतौ प्रलम्बौ बाहू यस्य स सृप्रकरस्नुः। सृप्रकरस्नुरेव सृप्रकरस्नः। उकारस्याकारापत्त्या रूपम्। तं सृप्रकरस्नम्। प्रलम्बबाहुमित्यर्थः। किमर्थं पुनराह्वयामः। उच्यते। ऊतये तस्यैव तर्पणार्थम्। किं पुनः कुर्वाणं आह्वयामः। उच्यते। साधु कृण्वन्तं वृत्रवधादिकर्म कुर्वन्तम्। अवसे आत्मनः पालनार्थं च ॥

मेधातिथिः। बृबदुक्थं बृहद्भिः महद्भिः स्तोतव्यम्। हकारस्य बकारः। अथवा ब्रवीतेर्धातोः कर्मणि बृबत्। वक्तव्यं उच्चारणीयं स्तोत्रं अस्येति। बृबदुक्थो महदुक्थः। वक्तव्यमस्मै उक्तमिति वा इति यास्कः (नि. ६. ४)। अस्य च व्याख्या कृतैव भवति अस्माभिः। हवामहे आह्वयामः। सृप्रकरस्नम्। कर एव करस्नः। सृप्रः सृप्तः करः दानार्थम्। ऊतये तर्पणाय। साधु साधकं धनं कृण्वन्तं प्रयच्छन्तं अवसे रक्षणाय हवामहे ॥ ४ ॥

ऋजुनीती नो वरुणो मित्रो नयति विद्वान् । अर्यमा देवैः सजोषाः ॥

गौतमस्यार्षम् । नीतिर्मार्गः । ऋज्वी नीतिर्यस्य स ऋजुनीतिः । ऋजुमार्ग इत्यर्थः । नः अस्मान् । वरुणः मित्रश्च नयति । यत्रास्माभिः स्वकर्मवशात् गन्तव्यं शुभे अशुभे वा स्थाने तत्र नयतु । कीदृशः पुनर्वरुणः नयतु । उच्यते । विद्वान् जानन् स्वमधिकारम् । अर्यमा च नयतु । देवैरन्यैः सह सजोषाः सह प्रीणयमाणः । त्रयोऽप्येते अस्मान् नयन्त्वित्यर्थः ॥

गौतमः । ऋजुनीती ऋजुनीत्या सम्यक् मार्गेण । नयतीति पञ्चमलकारान्तम् । नयतु । नः अस्मान् । वरुणः मित्रश्च विद्वान् । ऋजुनीतिः नयति अर्यमा च देवैः सजोषाः सह प्रीणयमाणः ॥ ९ ॥

दूरादिहेव यत्सतोऽरुणप्सुरशिश्वितत् । वि भानुं विश्वथा तनत् ॥

ब्रह्मातिथेरार्षम् । उषाः देवता । दूरात् द्युलोकात् इहेव । इवशब्दः उपमार्थीयः । अस्त्युपमार्थस्य संप्रत्यर्थे प्रयोग इति पादपूरणः । इह पृथिव्याम् । यत् । नपुंसकलिङ्गमिदं व्यत्ययेन स्त्रीलिङ्गे द्रष्टव्यम् । या उषाः सतः प्रशस्ता यजमानान् प्रति । कीदृशी उषाः । उच्यते । अरुणप्सुः अरुणरूपाः । अशिश्वितत् । श्विततिर्गतिकर्मा । आगच्छतीत्यर्थः । पुरस्ताद्यच्छब्दश्रुतेर्योग्यार्थसम्बन्धस्तच्छब्दोऽध्याहर्तव्यः । एत्य च सा । वीति पादपूरणः । भानुं दीप्तिं विश्वथा सर्वप्रकारं मृदुमध्यतीव्रलक्षणं सर्वदा अतनत् तनितवती । उद्यतं कृतवतीत्यर्थः ॥

ब्रह्मातिथिः । दूरात् दूरे । सतः । तिरः सत इति प्राप्तस्य नामनी । दूरे अन्तरिक्षे प्राप्ता इहैव अत्र विद्यमानेव यत् या उषाः । अरुणप्सुः ।

प्सुः इति रूपनाम। अरुणरूपा। अशिश्वितत् श्वेतते दीप्यते। सा उषाः वितनत् वितनोति। भानुं दीप्तिम्। विश्वथा सर्वत्र। इति अश्विनोरागमनकाल इति वेदयति ॥ ६ ॥

आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतम्। मध्वा रजांसि सुक्रतू ॥

जमदग्नेर्विश्वामित्रस्य वा आर्षम्। आ इत्ययमुपसर्गः उक्षतमित्याख्यातेन सम्बन्धयितव्यः। अस्माकं स्वभूतां हे मित्रावरुणौ। घृतैरुदकैर्वृष्टिलक्षणैः। गव्यूतिम्। गावो यत्र चरन्ति सा गव्यूतिरुच्यते। तां गव्यूतिम्। आ उक्षतमाभिमुख्येन सिञ्चतमित्यर्थः। न केवलं गव्यूतिम्। किं तर्हि। मध्वा उदकेन रजांसि त्रीनपि लोकान् आभिमुख्येन सिञ्चतम्। सुक्रतू। क्रतुरिति कर्मनाम प्रज्ञानाम वा। सुशब्दः शोभनवचनः। सुकर्माणौ सुप्रज्ञौ वा ॥

विश्वामित्रः जमदग्निः वा। आ समन्तात् सर्वतः। उक्षतं सिञ्चतम्। नः अस्मदीयाम्। गव्यूतिं गोसञ्चारदेशम्। घृतैः उदकैः हे मित्रावरुणा मित्रावरुणौ। किं विशेषेण। मध्वा उदकेन रजांसि लोकान् सर्वान् उक्षतं हे सुक्रतू सुकर्माणौ ॥ ७ ॥

उदु त्ये सूनवो गिरः काष्ठा यज्ञेष्वत्नत। वाश्रा अभिज्ञु यातवे ॥

हिरण्यस्तूपस्यार्षम्। मारुती ऋक्। उत् इति उपसर्गः अत्नतेत्यनेन आख्यातेन सम्बन्धयितव्यः। उकारः पादपूरणः। त्ये ते। सूनवः। सूनुरित्यपत्यनाम। अपत्यभूता मरुतः। कस्य। पृश्नेः रुद्रस्य वा। काः। गिरः गर्जितलक्षणा वाचः। काष्ठाश्च वृष्टिलक्षणा आपः। यज्ञेषु। सप्तमीबहुवचनमिदं तृतीयाबहुवचनस्य स्थाने द्रष्टव्यम्। यज्ञैः। मेघं प्रतिगम्य

उदन्नत ऊर्ध्वं विस्तारयन्ति । ऊर्ध्वं क्षिपन्तीत्यर्थः । कीदृशो मरुतः विक्षिपन्ति । उच्यते । वाश्राः । वाशनस्वभावकाः । कथं पुनः विक्षिपन्ति । उच्यते । अभिज्ञु । अभिनिपात्य जानुनी । महतादरेणेत्यर्थः । किमर्थं पुनर्विक्षपन्ति । उच्यते । यातवे पृथिवीं प्रति गमनायेत्यर्थः ॥

हिरण्यस्तूपः । उत् ऊर्ध्वं अधिकं अत्नत आतन्वत काष्ठाः अपः । उ इति पूरणः । त्ये ते सूनवः प्रेरका विश्वस्य । षू प्रेरणे । गिरः इति गृणातेः धातोः कर्मणि गिरतेः वा कर्तरि रूपम् । स्तूयमानाः इति वा गिरन्त उदकानि इति वा गिरः । अथवा सूनवः रुद्रस्य इति । यथा रुद्रस्य सूनवः (ऋ. वे. ८. २०. १७) इति हि निगमः । यज्ञेषु यजमानेषु यज्ञेष्वेव वा । काष्ठा अत्नन इति । वाश्राः शब्दायमानाः इति काष्ठाविशेषणम् । अभिज्ञु अभिज्मां पृथिवीमभि । यातवे यातुं गमनार्थम् । अस्मान् । अकर्तृकेष्वपि छन्दसि तुमर्थीयाः दृश्यन्ते ॥ ८ ॥

इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदम् । समूढमस्य पांसुले ॥

मेधातिथेरार्षम् । वैष्णवी ऋक् । इदं त्रैलोक्यं बलिबन्धनकाले विष्णुर्विचक्रमे विविधं चक्रमे क्रान्तवान् । विक्रममाणः स्वस्थानभेदेन त्रिधा त्रिप्रकारं निदधे निहितवान् । कतमेषु त्रिषु स्थानेषु । पृथिव्यामन्तरिक्षे दिवीति शाकपूणिः । समारोहणे विष्णुपदे गयशिरसीत्यौर्णवाभः । तच्च पदत्रयमपि समूढमस्य । वहेरिदं रूपम् । सम्यक् स्थापितं सुप्रतिष्ठापितम् । कथं सुप्रतिष्ठापितम् । उच्यते । पांसुरे । लुप्तोपममेतत् द्रष्टव्यम् । पांसुरे इव देशे । अथ पांसुलत्वयोगात् पांसुलशब्देन पृथिव्युच्यते । तेषां त्रयाणां पृथिव्यां यत्पदं तत्समूढम् । अथवा विष्णुरादित्यः । स इदं सर्वं अहरहर्विक्रमन् त्रिधा निदधे पदं उदयगिरौ मध्ये च नभसः अस्तगिरौ च । अथवा त्रिधा निदधे पदं पृथिव्यामग्न्यात्मना अन्तरिक्षे वैद्युता-

त्मना दिवि आदित्यात्मना । तच्च पदत्रयमस्य समूढं पांसुरे इव देशे । अथवा समूढमिति मुहेर्मोहनार्थस्य रूपम् । संमूढं संछन्नम् । यदस्य वैद्युतात्मना पदं तत् संमूढं संछन्नम् ॥

मेधातिथिः । इदं जगत् विचक्रमे विक्रान्तवान् विष्णुः । व्यचेर्व्याप्ति-कर्मणो विशेर्वा प्रवेशकर्मणः व्यश्नोतेः व्याप्तिकर्मणोः वा विष्णुः । कथं विचक्रमे । त्रेधा त्रिधा पृथिव्यां अन्तरिक्षे दिवि इति । निदधे निहितवान् पदं स्वम । तदानीं समूढं अन्तर्गतं इत्यर्थः । अस्य पांसुले प्रदेशे । इदं त्रैलोक्यं इति शेषः । लोकेभ्योऽपि महत् आसीत् त्रिविक्रमेण महतः पदम् ॥ ९ ॥

इति तृतीये तृतीया दशत्या

अतीहि मन्युषाविणं सुषुवांसमुपेरय । अस्य रातौ सुतं पिब ॥

मेधातिथेरार्षम् । इन्द्रो देवता । अति इहि अतीत्य आगच्छेत्यर्थः । मन्युषाविणं दीप्तस्य सोमस्य अभिषोतारं मेधातिथिं मां प्रति । कथं पुनरागच्छामि । उच्यते । यथा सुषुवांसं अभिषुतवन्तं अङ्गिरःप्रभृतिं अन्यमृषिं । उप ईरय उपगतवानसि तद्वदागच्छ । एत्य च अस्य । षष्ठीनिर्देशात् एकदेशमिति वाक्यशेषः । रातौ दाने सति । दत्तं सदित्यर्थः । सुतम् । द्वितीयैकवचनमिदं षष्ठ्येकवचनस्य स्थाने द्रष्टव्यम् । सुतस्य एक-देशं पिब ॥

मेधातिथिः । अति इहि अतीत्य गच्छ । मन्युषाविणं मन्युना क्रोधेन अभिषवं कुर्वन्तम् । सुषुवांसं अभिषुवन्तम् । उपेरय त्वं समीपं

प्रेरय। अस्य यजमानस्य। मम इत्यर्थः। सुतं सोमं पिब रातौ दाने सति इन्द्राय इति त्यागे कृते सति ॥ १ ॥

कदु प्रचेतसे महे वचो देवाय शस्यते। तदिद्ध्यस्य वर्धनम् ॥

वामदेवस्यार्षम्। कत्। किमः उत्तरस्य पञ्चम्याः अत् आदेशः। कस्मात् कारणात्। उ इति पादपूरणः। प्रचेतसे महे देवाय। त्रीण्यप्येतानि तादर्थ्यचतुर्थ्यन्तानि। प्रवृद्धज्ञानस्य महतो देवस्यार्थायेत्यर्थः। वचः स्तुतिलक्षणं वचनम्। शस्यते उच्चार्यत इत्यर्थः। उच्यते तत्। इत् इति पादपूरणः। हीति यस्मादर्थे। यस्मात् अस्य वर्धनं वृद्धिकरं तस्मादित्यर्थः। स्तूयमाना हि देवता वीर्येण वर्धन्ते। अतस्तस्य वृद्ध्यर्थं स्तुतिलक्षणं वचनं उच्चार्यत इत्यर्थः ॥

वामदेवः। कत् कदा। उः पूरणः। प्रचेतसे प्रकृष्टज्ञानाय। महे महते। देवाय इन्द्राय। वचः स्तोत्रं शस्यते उच्चार्यते। तदित् तत् स्तोत्रं एव हि। अस्य देवस्य वर्धनं वृद्धिकरं भवति ॥ २ ॥

उक्थं च न शस्यमानं नागो रयिरा चिकेत। न गायत्रं गीयमानम् ॥

मेधातिथेः प्रियमेधस्य चार्षम्। उक्थं स्तोत्रम्। चेति पादपूरणः। नेत्ययं प्रतिषेधः आचिकेतेत्याख्यातेन सम्बन्धयितव्यः। शस्यमानं उच्चार्यमाणमित्यर्थः। नागोः। कुङ् गुङ् अव्यक्ते शब्दे। गुः अव्यक्तभाषी। न गुः अगुः व्यक्तभाषी। न अगुः न व्यक्तभाषी नागुः। तस्य नागोः। अव्यक्तभाषिण इत्यर्थः। रयिः। अन्तर्णीतमत्वर्थमिदं द्रष्टव्यम्। रयिमान् मघवानिन्द्रः। न आचिकेत न जानाति। न शृणोतीत्यर्थः। न गायत्रं गीयमानम्। न च गायत्रसंज्ञकं साम गीयमानं शृणोतीत्यर्थः ॥

मेधातिथिप्रियमेधौ। उक्थं शस्त्रं शस्यमानं न आचिकेत न बुद्ध्येत। चन इति अपि इत्यस्यार्थे। अगोः गोरहितस्य गोभिः हीनस्य अदक्षिणस्य यजमानस्य। रयिः धनवान् इन्द्रः। न च गायत्रं स्तोत्रं गीयमानं अगोः आचिकेत ॥ ३ ॥

इन्द्र उक्थेभिर्मन्दिष्ठो वाजानां च वाजपतिः। हरिवान्त्सुतानां सखा॥

वामदेवस्यार्षम्। इन्द्रः उक्थेभिः स्तोत्रैरित्यर्थः। कीदृश इन्द्रः। मंहिष्ठः अतिशयेन स्तुत्य इत्यर्थः। वाजानामन्नानाम्। दातेति वाक्यशेषः। चशब्दः पादपूरणः। वाजपतिः अन्नानां स्वामीत्यर्थः। हरिवान्। हरयः अश्वाः। तद्वान्। अश्ववानित्यर्थः। सुतानामभिषुतानां सोमानां सखा सखिभूतः। पातेत्यर्थः ॥

विश्वामित्रः। इन्द्रः उक्थेभिः स्तुतशस्त्रैः। मन्दिष्ठः अतिशयेन मदिता। वाजानां अन्नानां च। वाजपतिः इत्यत्र वाजशब्दोऽनुवादमात्रपरः। वाजानां पतिः इत्यर्थः। वसूयवो वसुपते वसूनाम्। (ऋ. वे. १०. ४७. १) विद्मा हि त्वा गोपतिं शूर गोनाम् (ऋ. वे. ३. ३६. ९) इतिवत्। हरिवान्। हरयः इन्द्रवाहनाः। तद्वान्। सुतानां सोमानां सखा नित्यावियुक्त इत्यर्थः। एवमेवं च भवति इन्द्रः ॥ ४ ॥

आयाह्युप नः सुतं वाजेभिर्मा हृणीयथाः। माहा इव युवजानिः॥

श्रुतकक्षस्यार्षम्। आयाह्युप। उपशब्दः छन्दसि परेऽपि (पा. १. ४. ८१) व्यवहिताश्च (पा. १. ४. ८२) इत्येवं परप्रयुक्तः सन् पूर्वो द्रष्टव्यः। उपायाहि। समीपे आगच्छेत्यर्थः। नः सुतं अस्माकमभिषुतं सोमं प्रति। कथं पुनरायाहि। उच्यते। वाजेभिः अन्नैरस्मदीयैर्गृहीतैः इत्यर्थः। एत्य च स्तोकेन अपराधेन मा हृणीयथाः मा क्रोधं गमः।

मा रोषीरित्यर्थः। कथं पुनः मा हृणीयथाः। उच्यते। महानिव युवजानिः। युवतिर्जाया यस्य स युवजानिः। तरुणभार्य इत्यर्थः। स यथा तरुण्या भार्यायाः अपराधेऽपि तस्या न रुष्यति तद्वन्मा रोषीरित्यर्थः॥

मेधातिथिप्रियमेधौ। उपायाहि नः अस्मदीयम्। सुतं सोमम्। वाजेभिः अन्नैः अस्मभ्यं देवैः सार्धम्। मा हृणीयथाः मा क्रुद्धोऽसि। महान् प्रवृद्धः इव युवजानिः। युवतिर्जाया यस्य स युवजानिः। स यथा जायामभिगच्छति न च तामभिक्रुध्यति तद्वत्॥ ५॥

कदा वसो स्तोत्रं हर्यत आव श्मशा रुधद्वाः। दीर्घं सुतं वाताप्याय॥

दुर्मित्रस्य सुमित्रस्य वार्षम्। कदा इत्येतत् रुधदित्यनेन सम्बन्धयितव्यः। वसो प्रशस्तधनवन्। यदिदं स्तोत्रं हर्यते कामयमानाय तुभ्यं कृतं अस्माभिः। आकारः पदपूरणः। अवेत्ययमुपसर्गः व्यवहितोऽपि रुधदित्याख्यातेन सम्बध्यते। कदा अवरुधत् कस्मिन् काले अवरोत्स्यति। श्मशा वाः। वाःशब्देन उदकमुच्यते। श्मशाशब्देनापि कुल्योच्यते। लुप्तोपमं चेदं द्रष्टव्यम्। श्मशेव कुल्येवोदकम्। एतदुक्तं भवति। यथा कुल्या उदकमवरुणद्धि तद्वत्कदा स्तोत्रं अवरोत्स्यति। श्रोष्यसीत्यर्थः। कीदृशं स्तोत्रम्। दीर्घम्। सुतं अभिषुतं सोमं प्रति। अथवा सुतमिति सप्तम्यर्थे द्वितीया। सुते अभिषुते सोमे। वाताप्याय। वाताप्या उदकम्। तस्य अर्थाय। उदकार्थमित्यर्थः॥

दुर्मित्रः सुमित्रो वा। कदा श्मशा वायुः। शु आशु अश्नुत इति श्मशा वायुः इति यास्कः। आ अभिमुखं अवारुधत् अवरुन्धीत। वाः उदकम्। तव स्तोत्रं हर्यते कामयमानाय यजमानाय। हे वसो प्रशस्य

इन्द्र। दीर्घं दीर्घकालम्। सुतं अभिषवणं सोमस्य। वाताप्याय उदकाय भवति इति। स्तोत्रैः यज्ञैश्च प्रीतः देवः वर्षति। वातं प्राणं आप्याययति इति वाताप्यं उदकम्। आपोमयः प्राणः इति श्रुतेः॥ ६॥

ब्राह्मणादिन्द्र राधसः पिबा सोममृतूँ२रनु। तवेदं सख्यमस्तृतम्॥

मेधातिथेरार्षम्। ब्राह्मणात् ब्रह्मणः स्वभूतात्। हे इन्द्र राधसः। राध इति धननाम। तच्चात्र सोमपात्रं परिगृह्यते। एतदुक्तं भवति। ब्रह्मणः प्राक् स्वभूतात् सोमपात्रात्पिब सोमम्। ऋतून् अनु ऋतूनां पश्चात्। कस्मात् पिबामि। उच्यते। यस्मात्तवेदं सख्यं यष्टृयष्टव्यलक्षणम्। अस्तृतं अहिंसितम्। यस्मात्त्वं सर्वदा यष्टव्यः तस्मात् पिबेत्यर्थः॥

मेधातिथिः। इयं ब्राह्मणाच्छंसिन ऋतुयाज्येति कौषीतकिनः। प्रस्तोतुश्च तदानीं क्वचिदपि विहितं संभाव्येत्। ब्राह्मणात् ब्राह्मणाच्छंसिनो यागात्। राधसः राधकान्। पिब सोमं ऋतून् अनु। तृतीयार्थे (पा. १.४.८५) इति अनुः कर्मप्रवचनीयः। तद्योगात् ऋतूनिति द्वितीया। ऋतुनेत्यर्थः। बहुवचनं व्यत्ययात्। ऋतुना नभस्संज्ञेन सह पिब सोमम्। तव इदं सख्यं अस्माभिः जातं अस्तृतं अहिंसितं भवति॥ ७॥

वयं घा ते अपि स्मसि स्तोतार इन्द्र गिर्वणः। त्वं नो जिन्व सोमपाः॥

मेधातिथेरार्षम्। वयम्। घ इति पादपूरणः। ते तव। अपीति पादपूरणः। स्मसि भवामः। कः। उच्यते। स्तोतारः वयं त्वां स्तुम इत्यर्थः। हे इन्द्र गिर्वणः। गिरः स्तुतिलक्षणा वाचः। ताभिर्यः वन्यते संभज्यते स गिर्वणाः। तस्य सम्बोधनं हे गिर्वणः। वाग्भिः संभजनीय इत्यर्थः। एतत् ज्ञात्वा त्वं नः अस्माकं जिन्व प्रीणय। एतेन तर्पयेत्यर्थः। हे सोमपाः सोमानां पातः॥

मेधातिथिः। वयं स्तोतारः। चेति पूरणः। ते तव स्वभूताः। अपि स्मसि अपि भवामः। किमस्मान् त्वदीयत्वेन नाङ्गीकरोषि इत्यर्थः। हे इन्द्र गिर्वणः गीर्भिः वननीय। त्वं वो जिन्व पूरय कामैः हे सोमपाः॥ ८॥

एन्द्र पृक्षु कासु चिन्नृम्णं तनूषु धेहि नः। सत्राजिदुग्र पौंस्यम्॥

वामदेवस्यार्षम्। आ इत्ययमुपसर्गो धेहीत्याख्यातेन सम्बन्धयितव्यः। हे इन्द्र पृक्षु। पृची सम्पर्के इत्यस्येदं रूपम्। सम्पृच्यन्ते यस्यां यागक्रियायां यजमाना देवैः सह सा पृक्। तासु पृक्षु। यागक्रियासु इत्यर्थः। कासुचित् नृम्णं धनम्। तनूषु शरीरेषु। आधेहि नः। आ इत्ययं निशब्दस्य स्थाने द्रष्टव्यः। निधेहि। स्थापयेत्यर्थः। कस्य पुनः तनूषु। उच्यते। नः अस्माकं स्वभूतासु तनूषु। किंच सत्राजित्। सत्राशब्दः यद्यपि सत्यनाम तथापीह सदाशब्दस्यार्थे द्रष्टव्यः। सदाजिदिति सत्राजित्। सदा शत्रूणां जेता इत्यर्थः। हे उग्र अप्रसह्य। पौंस्यं बलम्। द्वितीयानिर्देशान्निधेहीत्येतदनुषज्यते। बलं च तनूषु निधेहीत्यर्थः॥

वामदेवस्यार्षम्। हे इन्द्र पृक्षु सङ्ग्रामेषु कासुचित् यासु कासुचित्। सर्वासु इत्यर्थः। पौंस्यमिति व्यवहितमपि अत्र सम्बध्यते योग्यत्वात्। पौंस्यं आधेहि संग्रामेषु प्रवृत्तेषु। नृम्णं सुखं च आधेहि। नः तनूषु अङ्गेषु। हे सत्राजित् सर्वस्य जेतः। उग्र ओजस्विन्॥ ९॥

एवा ह्यसि वीरयुरेवा शूर उत स्थिरः। एवा ते राध्यं मनः॥

श्रुतकक्षस्यार्षम्। एवशब्दः पदपूरणः। हिशब्दो यस्मादर्थे। यस्मात्त्वं असि भवसि वीरयुः। वीरा यजमानपुरुषाः। तान् कामयते यः सः वीरयुः। वीरयतेः युप्रत्ययः। वीरयुः यजमानकाम इत्यर्थः। यस्मात्त्वं

शूरः । उत अपि च स्थिरः । यस्मादिति वचनात्तस्मादित्यध्याहार्यम् । तस्मात् ते तव यागादिभिः राध्यं आराधनीयं मनः । तस्मात्त्वं यष्टव्य इत्यर्थः ॥

श्रुतकक्षः । एवं पूर्वैः स्तुत इन्द्रः स्तोत्रैः कामान् प्रयच्छन् तेन तुष्टः ब्रवीति । एव एवम् । हि इति प्रसिद्धौ । त्वं वीरयुः स्तोत्रकामः असि । एवं च शूरः असि । उत अपिच । स्थिरः असि । एवं च ते तव मनः अन्नं राध्यं संग्रामधनयोग्यं भवति हे इन्द्र ॥ १० ॥

तृतीये चतुर्थी दशत्या

अभि त्वा शूर नोनुमोऽदुग्धा इव धेनवः ।
ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः ॥

वसिष्ठस्यार्षम् । इन्द्रो देवता । बृहती छन्दः । अभीत्ययमुपसर्गः नोनुम इत्याख्यातेन सम्बन्धयितव्यः । त्वा त्वां हे शूर विक्रान्त अभिनोनुमः । नु स्तुतावित्यस्येदं रूपम् । आभिमुख्येन अत्यर्थं पुनः पुनर्वा स्तुमः । कथं पुनः स्तुमः । उच्यते । अदुग्धा इव धेनवः । अचिरप्रसूता गावः धेनुशब्देनोच्यन्ते । ताः यथा आत्मीयं वत्सं स्नेहार्द्रेण मनसा हुंकारादिभिरभिनन्दन्ति तद्वत्स्तुम इत्यर्थः । कीदृशं स्तुमः । उच्यते । ईशानमीश्वरं अस्य जगतः । स्वर्दृशम् । स्वः आदित्यः । तमिव यः पश्यति सः स्वर्दृक् । आदित्यमिव सर्वस्य जगतः द्रष्टारमित्यर्थः । ईशानमीश्वरं तस्थुषः स्थावरस्य । स्थावरग्रहणं प्रदर्शनार्थम् । जङ्गमस्य चेत्यर्थः ॥

ऋचोऽशीतिरभित्वेति बृहत्यः सकला अपि ।
न हि वो मारुती तत्र प्रति त्वाद्येति संस्तुतिः ॥
आदित्यानामथेन्द्राग्नी अपादिन्द्राग्निसंस्तुतिः ।
आश्विन्युक्ता शचीभिर्नो द्वृयचं चेमा उ मामिति ॥
यदा कदा वरुणस्य त्वष्टा नो बहुदेवता ।
उषस्या प्र त्यु इत्येषा बण्महाँ सूर्यसंस्तवः ॥
इत्येकादश ताभ्योऽन्या ऐन्द्रय ऐकोनसप्ततिः ॥

वसिष्ठः । अभिनोनुमः भृशं अभिष्टुमः त्वा त्वां वयं हे शूर । अदुग्धा इव धेनवः सन्तः सोमपूर्णचमसत्वेन । ईशानं अस्य जगतः जङ्गमस्य । स्वर्दृशं सर्वदृशम् । ईशानं तस्थुषः स्थावरस्य च हे इन्द्र । तिष्ठतेर्लिटः क्वसुः । तस्थिवच्छब्दात् वसोस्संप्रसारणम् (पा. ६. ४. १३१) इति षष्ठ्यां संप्रसारणे तस्थुष इति रूपम् ॥ १ ॥

त्वामिद्धि हवामहे सातौ वाजस्य कारवः ।
त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठास्वर्वतः ॥

शंयोरार्षम् । इत् हि । द्वावपि पदपूरणौ । हवामहे । सातिर्लाभः । तस्मादियं निमित्तसप्तमी । निमित्तं च प्रयोजनम् । धनलाभार्थमित्यर्थः । कस्य पुनर्लाभार्थम् । उच्यते । वाजस्य अन्नस्य । के पुनः सन्तः हवामहे । उच्यते । कारवः स्तोतार इत्यर्थः । किंच त्वाम् । द्वितीयानिर्देशात् ह्वयतिरनुषक्तव्यः । त्वां ह्वयन्ति वृत्रेषु शत्रुषु । यस्य च भावेन भावलक्षणम् (पा. २. ३. ३७) इति सप्तमी । तच्छ्रुतेश्च लक्षणभूतं योग्यक्रियापदमध्याहर्तव्यम् । शत्रुषु हन्तव्येषु । हे इन्द्र सत्पतिं सतां पालयितारम् । नरः अन्येऽपि मनुष्याः । त्वां काष्ठासु । काष्ठाशब्देन वृष्टिलक्षणाः आपः उच्यन्ते । तस्मादियं निमित्तसप्तमी । अप्सु च निमित्तभूतासु । तदर्थं त्वामाह्वयन्तीत्यर्थः । कस्य पुनः सम्बन्धिनीष्वप्सु निमित्तभूतासु । उच्यते ।

अर्वतः। ऋ गतावित्यस्य वनिप्रत्ययान्तस्य अवर्णः त्वादेशेनैतद्रूपम्। गन्तुर्मेघस्य स्वभूतास्वित्यर्थः। अथवा काष्ठाशब्देन सङ्ग्राम उच्यते। अर्वशब्देनापि अश्व उच्यते। अन्तर्णीतमत्वर्थमेतद्द्रष्टव्यं प्रथमाबहुवचनान्तं च। सङ्ग्रामेषु सङ्ग्रामभूमिषु वा स्थिताः अर्वतः अश्ववतः आत्मनो जयार्थं त्वामाह्वयन्तीत्यर्थः ॥

शंयुः भारद्वाजः। त्वामित् त्वामेव वयं हवामहे आह्वयामः। हि इति पूरणः। सातौ लाभे निमित्ते। वाजस्य अन्नस्य। कारवः स्तोतारः। त्वां हवामहे वृत्रेषु उपद्रवेषु सत्सु हे इन्द्र। सतां प्रभवतां श्रेष्ठः सत्पतिः। तं नरः मनुष्याः वयं त्वां हवामहे। काष्ठासु युद्धेषु अर्वतः अश्वस्य। अश्वार्थम्॥ २॥

अभि प्र वः सुराधसमिन्द्रमर्च यथा विदे।
यो जरितृभ्यो मघवा पुरूवसुः सहस्रेणेव शिक्षति॥

वालखिल्यानामार्षम्। अभि प्र इत्युपसर्गौ अर्चेत्याख्यातेन सम्बन्धयितव्यौ। वः। द्वितीयाबहुवचनमिदं एकवचनस्य स्थाने द्रष्टव्यम्। त्वाम्। सुराधसं शोभनधनं इन्द्रम्। अर्च इति प्रथमपुरुषैकवचनमिदमुत्तमपुरुषैकवचनस्य स्थाने द्रष्टव्यम्। अभिप्रार्चामि। आभिमुख्येन स्थित्वा प्रकर्षेण पूजयामीत्यर्थः। कीदृशमिन्द्रं पूजयामि। उच्यते। यः जरितृभ्यः स्तोतृभ्यः। मघवान् धनवान्। पुरूवसुः। पुर्विति बहुनाम। वस्वित्यपि धननाम। पुरु धनं यस्य सः पुरुवसुः। पुरुवसुरेव पुरूवसुः। बहुधन इत्यर्थः। सहस्रेणेव प्रकारेणेति वाक्यशेषः। बहुभिः प्रकारैरित्यर्थः। शिक्षति ददातीत्यर्थः। किं पुनर्ददाति। सामर्थ्याद्धनम्॥

वालखिल्या ऋषयः। अभि उद्दिश्य इन्द्रं प्रार्च प्रगाय हे स्तोतः। वः। त्वमित्यर्थः। सुराधसं सुधनं इन्द्रम्। यथा विदे विद्यते ज्ञायते यथा

तथा प्रार्च। यः मघवा। मघं दानं मंहते। दानवान् नित्यदानः। पुरूवसुः बहुधनः। जरितृभ्यः स्तोतृभ्यः। शिक्षति प्रयच्छति। पुरूवसुः इति विशेषणबलात् वसूनि सिध्यन्ति। सहस्रेण इति विभक्तिव्यत्ययः। सहस्रं धनानि। इव इति पूरणः ॥ ३ ॥

तं वो दस्ममृतीषहं वसोर्मन्दानमन्धसः।
अभि वत्सं न स्वसरेषु धेनव इन्द्रं गीर्भिर्नवामहे ॥

नोधस आर्षम्। तं वः। द्वितीयाबहुवचनमिदमेकवचनस्य स्थाने द्रष्टव्यम्। त्वाम्। इन्द्र दस्मम्। तसु दसु उपक्षये इत्यस्येदं रूपम्। उपक्षयितारं शत्रूणाम्। ऋतीषहम्। ऋतयः सेनाः गन्तृत्वात्। ता योऽभिभवति स ऋतीषाट्। तं ऋतीषहम्। परकीयानां सेनानामभिभवितारं इत्यर्थः। वसो प्रशस्तधन। अन्धसः सोमलक्षणस्यान्नस्य। मन्दानम्। मदि मुदि मोदे इत्यस्येदं रूपम्। अत्तारम्। भक्षयितारमित्यर्थः। अभीत्ययमुपसर्गः नवामहे इत्याख्यातेन सम्बन्धयितव्यः। वत्सं न वत्समिव। यथा वत्सं धेनवः अचिरप्रसूता गावः तद्वदित्यर्थः। स्वस्वरेषु यागगृहेषु। इन्द्रं गीर्भिर्नवामहे। नु स्तुतावित्यस्येदं रूपम्। अभिनवामहे। आभिमुख्येन स्तुम इत्यर्थः॥

नोधाः। तं प्रसिद्धम्। दस्मं दर्शनीयम्। ऋतीषहम्। अर्तेः ऋतिः अरिः। अरीणामभिभवितारम्। वसोः प्रशस्यस्य अन्धसः अन्नस्य। तृतीयार्थे षष्ठी। मन्दानं मोदमानम्। अभिनवामहे अभिष्टुमः। इन्द्रं ईश्वरम्। गीर्भिः स्तुतिभिः। वत्सं न वत्समिव स्वसरेषु गोष्ठेषु धेनवः। इति सोमपूर्णतां आत्मनः द्योतयति ॥ ४ ॥

तरोभिर्वो विदद्वसुमिन्द्रं सबाध ऊतये।
बृहद्गायन्तः सुतसोमे अध्वरे हुवे भरं न कारिणम् ॥

कलेः प्रगाथस्य आर्षम् । तरोभिरात्मीयैर्बलैः । वः । द्वितीयाबहुवचनमिदं द्वितीयैकवचनस्य स्थाने द्रष्टव्यम् । त्वाम् । विदद्वसुम् । विद्लेर्लाभार्थस्येदं रूपम् । वस्वित्यपि धननाम । विदितं धनं येन स विदद्वसुः । तम् । आत्मीयैर्बलैः शत्रुधनानामपहर्तारमित्यर्थः । इन्द्रं सबाधः मदीया ऋत्विजः । ऊतये तर्पणार्थं आत्मनः पालनार्थं वा । बृहद्गायन्तः सुष्ठु अर्चयन्तः । स्तुवन्त इत्यर्थः । सुतसोमे । सुतः अभिषुतः सोमो यस्मिन् स सुतसोमः ज्योतिष्टोमादिसोमयागः । तस्मिन् सुतसोमे । अध्वरे यज्ञे ज्योतिष्टोमादौ । हुवे । उत्तमपुरुषैकवचनमिदं प्रथमपुरुषबहुवचनार्थे द्रष्टव्यम् । आह्वयन्ति । कथं पुनराह्वयन्ति । उच्यते । भरं न द्वितीयैकवचनं सप्तम्येकवचनस्य स्थाने द्रष्टव्यम् । नशब्द उपरिष्टादुपचारत्वादुपमार्थीयः । भरे इव । सङ्ग्रामे इवेत्यर्थः । कारिणम् । करोतीति सन्निधानात् सङ्ग्रामम् । एतदुक्तं भवति । यथा सङ्ग्रामे योद्धा प्रतियोद्धारं महता यत्नेन आह्वयति तद्वदाह्वयन्तीत्यर्थः ॥

कलिः प्रगाथः । तरोभिः वेगैः युक्तः । वः । त्वामित्यर्थः । विदद्वसुं लब्धवन्तं धनानि । इन्द्रं ईश्वरम् । सबाधः संबाधमानाः परस्परम् । यद्वा बाधसहिताः शत्रुभिः बाध्यमानाः । ऊतये रक्षणाय । हुवे इति वचनव्यत्ययः । ह्वयामहे । बृहत् परिवृढं गुणैः । साम गायन्तः सुतसोमे अध्वरे यज्ञे । भरं न भरन्तमिव बलवन्तमिव । कारिणं उपकारिणं योद्धारम् ॥ ९ ॥

तरणिरित्सिषासति वाजं पुरन्ध्या युजा ।
आ व इन्द्रं पुरुहूतं नमे गिरा नेमिं तष्टेव सुद्रुवम् ॥

वसिष्ठस्यार्षम् । तरणिः क्षिप्रकारी इन्द्रः । इदिति पदपूरणः । सिषासति संभक्तुमिच्छति । किम् । उच्यते । वाजं अन्नम् । पुरन्ध्या

पत्न्या। युजा युक्तेन। आकारः पदपूरणः। वः। युष्मच्छब्दोऽत्र व्यत्ययेन अस्मच्छब्दस्य स्थाने द्रष्टव्यः। बहुवचनमेकवचनस्य स्थाने द्रष्टव्यम्। मम वसिष्ठस्य स्वभूतम्। यत एवमतः इन्द्रं पुरुहूतं बहुभिर्यजमानैः यज्ञेष्वाहूतम्। नमे प्रह्वीकरोमि। ऋजुं करोमीत्यर्थः। केन पुनर्ऋजुं करोमि। उच्यते। गिरा स्तुतिलक्षणया वाचा। स्तुत्वेत्यर्थः। कथं ऋजुं करोमि। उच्यते। नेमिं तष्टेव सुद्रुवं शोभनकाष्ठम्। एतदुक्तं भवति। यथा शोभनं काष्ठं तक्षणादिभिः तष्टा वर्धकिः वक्रं करोति तद्वत् स्तुतिभिः ऋजूकरोमीत्यर्थः ॥

वसिष्ठः। तरणिरित् त्वरित एव। स्तुत्यादिषु सिषासति संभजति। वाजं अन्नम्। पुरन्ध्या बुद्ध्या। युजा सहायभूतया। सिषासति इत्यत्र सनोतेः स्वार्थिकस्सन्। आनमे वशं नयामि। वः त्वाम्। इन्द्रं ईश्वरम्। पुरुहूतं बहुभिराहूतम्। गिरा स्तुत्या। नेमिं चक्रस्य बाह्यवलयम्। तष्टेव तक्षेव। यथा नेमिं तष्टा आनमते सुद्रुवं शोभनदारुकं तथा त्वां आनमे ॥ ६ ॥

तृतीये पञ्चम्या दशत्या

नकिष्टं कर्मणा नशद्यश्चकार सदावृधम्।
इन्द्रं न यज्ञैर्विश्वगूर्तमृभ्वसमधृष्टं धृष्णुमोजसा ॥

पुरुहन्मन आर्षम्। नकिः न कश्चित् रक्षःपिशाचादि वा। तं यजमानम्। कर्मणा मारणात्मकेन। नशत्। शुद्धोऽप्ययं नशिः विपूर्वो द्रष्टव्यः अन्तर्णीतश्च। विनाशयतीत्यर्थः। यो यजमानः किं कृतवान्।

उच्यते । यश्चकार करोति । सदा सर्वदा वृधं वर्धयितारम् । इन्द्रं न । न-शब्द उपरिष्टादुपचारत्वादुपमार्थीयः । अस्त्युपमार्थस्य संप्रत्यर्थे प्रयोग इति पादपूरणः । यः सर्वदा वर्धयितारं आत्मनः इन्द्रं करोतीत्यर्थः । कैः पुनर्वर्धयितारमिन्द्रं करोति । उच्यते । यज्ञैरग्निष्टोमादिभिः । कीदृशमिन्द्रम् । उच्यते । विश्वगूर्तं सर्वशत्रूणां वधाय आवृतम् । ऋभ्वसं महान्तम् । अधृष्टमधर्षितम् । अनभिभूतपूर्वं केनचिदित्यर्थः । धृष्णुं शत्रूणामभिभवितारम् । ओजसा स्वेन बलेन ॥

पुरुहन्मा । नकिः नशत् न व्याप्नुयात् । नानुगच्छेत् । तं जनं कर्मणा स्तुतिभिः । यः कश्चन इन्द्रं सदावृधं सर्वदा वृद्धं चकार कुर्यात् यज्ञैः । नेति पूरणः । विश्वगूर्तं विश्वैः स्तुतम् । गृणातेर्गूर्तः । ऋभ्वसं महान्तम् । ऋभु भवति इति ऋभ्वसः । अधृष्टं अनभिभूतम् । धृष्णुं धर्षकम् । ओजसा बलेन । सकललोकधृष्णुं बलेनापि अधृष्यम् ॥ १ ॥

य ऋते चिदभिश्रिषः पुरा जत्रुभ्य आतृदः ।
संधाता संधिं मघवा पुरूवसुर्निष्कर्ता विह्रुतं पुनः ॥

प्रगाथस्यार्षम् । भग्नस्य महावीरस्याभिमर्शनमनया ऋचा क्रियते । य इन्द्रः । ऋते यज्ञे । चिदिति पादपूरणः । अभिश्लिषः अभिराभिमुख्ये । श्रिषतिः श्रयणार्थः । आभिमुख्येन श्रितः अभिश्रितः । तस्य । अभिश्रिषः । यज्ञे आश्रितस्य महावीरस्येत्यर्थः । पुरा प्राक् । जत्रुभ्यः ग्रीवानाडीभ्य इत्यर्थः । आतृदः आतर्दनात् । प्राक् ग्रीवानाडीभ्यो हिंसाया इत्यर्थः । सन्धाता सन्धिं इति षष्ठ्यर्थे द्वितीया । सन्धेः भग्नस्यापि महावीरस्य य इन्द्रः सन्धाता । मघवान् पुरूवसुः बहुधनः । निष्कर्ता संस्कर्तेत्यर्थः । कीदृशस्य पुनर्महावीरस्य संस्कर्ता । उच्यते । विह्रुतम् । इदमपि षष्ठ्यर्थे द्वितीया ।

विह्रुतस्य इतश्चेतश्च विक्षिप्तावयवस्य । भग्नस्येत्यर्थः । किं सकृदेव संस्कर्ता । उच्यते । पुनः पुनः । य ऋते चिदिति यच्छब्दश्रुतेः साकाङ्क्षत्वात् तं वयं स्तुम इति वाक्यशेषः ॥

मेधातिथिः मेध्यातिथिश्च अस्याः परस्याः चर्षी । यो मघवा इन्द्रः ऋते चित् विनापि अभिश्लिषः अभिश्लेषकात् श्लेष्मणः । येन छिन्नं संश्लिष्यते तत् श्लेष्म । पुरा पुरस्तादेव । जतृभ्यः अंसग्रीवाभ्यां मध्ये नाडीभ्यः । आतृदः आतर्दनात् लोहितनिस्सारणात् । पुरा छिन्नमात्र एव सन्धि सन्धातव्यम् । सन्धाता संधातुं शक्तः । पुरूवसुः बहुधनः । स इन्द्रः विह्रुतं विच्छिन्नम् । पुनः निष्कर्ता संस्कर्ता भवति ॥ २ ॥

आ त्वा सहस्रमा शतं युक्ता रथे हिरण्यये ।
ब्रह्मयुजो हरय इन्द्र केशिनो वहन्तु सोमपीतये ॥

प्रगाथस्यार्षम् । आ इत्ययमुपसर्गः वहन्त्वित्येतेन सम्बध्यते । आवहन्तु । त्वा त्वां सहस्रम् । आ इत्युपसर्गाभ्यासात् क्रियापदाभ्यासः । आवहन्तु त्वां सहस्रसङ्ख्याकाः । शतसङ्ख्याकाश्च आवहन्तु । हरय अश्वाः । कीदृशाः सन्तः आवहन्तु । उच्यते । युक्ताः नियुक्ता इत्यर्थः । क पुनर्नियुक्ताः । उच्यते । रथे हिरण्यये हिरण्मये । ब्रह्मयुजः । एतदपि अश्वानामेव विशेषणम् । ब्रह्म अन्नम् । तेन निमित्तभूतेन ये युज्यन्ते ते ब्रह्मयुजः । हविर्लक्षणस्यान्नस्य भक्षणाय गन्तुं ये रथे नियुज्यन्त इत्यर्थः । अथवा अन्नैर्विद्यमानलक्षणं ब्रह्म । तेन निमित्तभूतेन ये युज्यन्ते ते ब्रह्मयुजः । अथवा ब्रह्मणा प्रजापतिना अनुज्ञातस्येन्द्रस्य ये युज्यन्ते ते ब्रह्मयुजः । हे इन्द्र केशिनः केशवन्तः । किमर्थं पुनरावहन्तु । उच्यते । सोमपीतये सोमपानार्थमित्यर्थः ॥

आवहन्तु त्वां सहस्रं हरयः । आवहन्तु शतम् । युक्ताः सन्तः । रथे हिरण्यये हिरण्मये । ब्रह्मयुजः मन्त्रैर्युज्यमानाः । केशिनः प्रशस्तकेशाः । हे इन्द्र सोमपीतये सोमपानार्थम् ॥ ३ ॥

आ मन्द्रैरिन्द्र हरिभिर्याहि मयूररोमभिः ।
मा त्वा केचिन्नियेमुरिन्न पाशिनोऽति धन्वेव ताँ इहि ॥

विश्वामित्र आह । आ इत्ययमुपसर्गः याहीत्याख्यातेन सम्बध्यते । आयाहि अस्मद्यज्ञं हे इन्द्र । कैः पुनरागच्छामि । उच्यते । मन्द्रैर्मन्द्रस्वरैः गम्भीरस्वरैः हरिभिः । मयूररोमभिः मयूरशब्दसदृशैर्हेषितशब्दैरित्यर्थः । अथवा मयूरपक्षसदृशैः रोमभिः । मा इत्ययमुपसर्गः नियेमुरित्यनेन सम्बध्यते । यमिश्चात्र बन्धनार्थः । मा नियेमुस्त्वां केचित् । मा निबध्नन्त्वित्यर्थः । इदिति पादपूरणः । न पाशिनः । नशब्दः पुरस्तादुपचारोऽपि इह उपमार्थीयः । पाशिन इव । एतदुक्तं भवति । यथा केचित्पाशिनः लुब्धकाः शकुनिं निबध्नन्ति तद्वत् त्वां आगच्छन्तं मा केचिन्निरुध्यन्तु इत्यर्थः । यद्यपि च केचिन्निरुध्यन्ति तथापि । अति इत्ययमुपसर्गः । उपसर्गाश्च पुनरेवमात्मकाः । यत्र क्रियावाची कश्चिच्छब्दः प्रयुज्यते तत्र विशेषमाहुः । यत्र तु न प्रयुज्यते तत्र ससाधनां क्रियामाहुः । न चात्र क्रियावाची कश्चिच्छब्दः प्रयुज्यते । अत उपसर्गः एवं क्रियां ब्रवीति । अतीत्य तान् धन्वेव । इवशब्दः उपमार्थस्यासंभवात्पादपूरणः । धन्वेत्यत्र च तृतीयायाः लुग्द्रष्टव्यः । धन्वना अन्तरिक्षेण । अथवा धन्वना धनुषा । अस्त्रैर्विजित्य तान् इह आगच्छ । एतदुक्तं भवति । यद्यप्यतीत्य तान् अन्तरिक्षेण धनुषा वा विजित्य आगच्छेत्यर्थः ॥

विश्वामित्रः । आयाहि मन्द्रैः मदनशीलैः स्तुत्यैर्वा हरिभिः । मयूररोमभिः श्यामवर्णैः । हे इन्द्र मा नियेमुः मा निरोत्सिषुः त्वां केचित् अन्ये स्तोत्रस्तु-

तिभिः। इत् एव। न पाशिनः। नेति पुरस्तादुपचारोऽपि उपमार्थीयः। पाशिनः इव पक्षिणं पाशैः अति अतीत्य तान् अन्यान् इहि गच्छ अस्मान्। धन्वेव मरुदेशमिव पिपासितः॥ ४॥

त्वमङ्ग प्रशंसिषो देवः शविष्ठ मर्त्यम्।
न त्वदन्यो मघवन्नस्ति मर्डितेन्द्र ब्रवीमि ते वचः॥

गौतम आह। त्वं हे इन्द्र अङ्ग क्षिप्रम्। प्रशंसिषः। प्रशस्तं करोषि। देवः दानात् द्योतनात् द्युस्थानात् शत्रूणां दमनाच्च। हे शविष्ठ अतिशयेन बलवन्। कं पुनः क्षिप्रं प्रशस्तं करोषि। उच्यते। मर्त्यं स्तोतारं मनुष्यम्। किंच न त्वदन्यः हे मघवन् धनवन् अस्ति विद्यते। मर्डिता सुखयिता हे इन्द्र। यत एवमतो ब्रवीमि उच्चारयामि। ते तव। वचः स्तुतिलक्षणं वचनम्। एतदुक्तं भवति। यत एवमतोऽहमपि गौतमः त्वां स्तौमीत्यर्थः॥

गौतमः। प्रशंसिष इति अन्तर्णीतण्यर्थः। प्रशंसयः। प्रशस्तं कुरु। मर्त्यं स्तोतारम्। अङ्ग क्षिप्रम्। देवः त्वं शविष्ठ अतिशयेन बलयुक्त। न त्वदन्योऽस्ति मर्डिता सुखयिता। हे मघवन् इन्द्र। अतो ब्रवीमि ते तुभ्यं वचः स्तुतिरूपम्॥ ५॥

त्वमिन्द्र यशा अस्यृजीषी शवसस्पतिः।
त्वं वृत्राणि हंस्यप्रतीन्येक इत् पुर्वनुत्तश्चर्षणीधृतिः॥

नृमेधसः पुरुमेधसश्च आर्षम्। हे इन्द्र यशाः यशः अन्नं कीर्तिर्वा। अन्तर्णीतमत्वर्थं चेदं द्रष्टव्यम्। यशस्वी अन्नवान्वा कीर्तिमान्वा। असि भवसीत्यर्थः। ऋजीषी। सोमस्य पूयमानस्य यदतिरिच्यते तत् ऋजीषम्।

तेन तद्वान् । कथं पुनरसौ तेन तद्वान् । उच्यते । शवसः पतिः । शवः बलम् । तस्याधिपतिभूतः । किंच त्वं वृत्राणि हंसि शत्रुकुलानि मेघवृन्दानि वा । कीदृशानि पुनर्वृत्राणि हंसि । उच्यते । अप्रतीनि अप्रतिकुर्वन्ति । प्रतिबन्धं कर्तुं न शक्नुवन्तीत्यर्थः । एक इत् । इच्छब्द एवशब्दस्यार्थे । एक एव हंसि । केन पुनः हंसि । उच्यते । पुरु बहुरूपः । अनुत्तः । चर्षणीधृतिः । चर्षणयो मनुष्याः । तैर्यो धार्यते स चर्षणीधृत् । तेन चर्षणीधृता । एतदुक्तं भवति । तव पश्चाद्यः मनुष्यैः धार्यते वज्रः तेन हंसीत्यर्थः । कथं च मनुष्यैः धार्यते वज्रः । प्रभूणां येऽनुचरास्ते धारयन्त्यायुधम् । अथवा यजमानस्य चर्षणयः स्वभूता ऋत्विजः । तैर्धार्यते यः स वज्रोऽभिधीयते । अथवा चर्षणीधृतिरिन्द्रः । मनुष्याश्चर्षणयः । तं धारयति इति वा ॥

नृमेधाः पुरुमेधाः च । त्वं हे इन्द्र यशाः यशस्वी असि । यशश्शब्दान्मत्वर्थीयलोपः । ऋजिषी । ऋजीषं गतरसमपि सोमं न त्यजसि सोमेच्छया । ऋजीषं हि तृतीयसवनेऽभिषुण्वन्ति । शवसो बलस्य पतिः । त्वं वृत्राणि शत्रून् हंसि । अप्रतीनि अप्रतिद्वन्द्वीनि । एक इत् एक एव । पुरू पुरूणि बहूनि । शेश्छन्दसि (पा. ६. १. ७०) इति शेर्लोपः । अनुत्तः अप्रेरितः केनापि । चर्षणीधृतिः चर्षणीनां जनानां धारकः त्वम् ॥ ६ ॥

इन्द्रमिद्देवतातय इन्द्रं प्रयत्यध्वरे ।
इन्द्रं समीके वनिनो हवामह इन्द्रं धनस्य सातये ॥

मेधातिथिराह । इन्द्रं इत् । इच्छब्दः एवशब्दस्यार्थे । इन्द्रमेव । देवतातये यज्ञे इत्यर्थः । इन्द्रमेव प्रयति प्रोत्सरति । अध्वरे यज्ञे । इन्द्रमेव समीके सङ्ग्रामे । वनिनः । वनमुदकं सोमलक्षणम् । तेन तद्वन्तः ।

सोमवन्त इत्यर्थः । इन्द्रमेव धनस्य सातये लाभार्थमित्यर्थः । हवामहे इत्येतत्सर्वत्रानुषक्तव्यम् ॥

मेधातिथिः तिसृणामृषिः । इन्द्रमित् इन्द्रमेव देवतातये यज्ञाय यज्ञलाभार्थं हवामहे । इन्द्रमेव प्रयति प्रयच्छति क्रियमाणे अध्वरे हवामहे । इन्द्रं समीके सङ्ग्रामे । वनिनः संभजनवन्तः हवामहे । इन्द्रं हवामहे धनस्य सातये लाभाय ॥ ७ ॥

इमा उ त्वा पुरूवसो गिरो वर्धन्तु या मम ।
पावकवर्णाः शुचयो विपश्चितोऽभि स्तोमैरनूषत ॥

मेधातिथेरार्षम् । इमाः । उ इति पदपूरणः । त्वा त्वाम् । पुरूवसो । पुर्विति बहुनाम । वस्वित्यपि धननाम । पुरु वसु यस्य सः पुरुवसुः । पुरुवसुरेव पुरूवसुः । छान्दसो दीर्घः । तस्य सम्बोधनं हे पुरूवसो । बहुधन । गिरः स्तुतयः वर्धन्तु । वृधिरन्तर्णीतण्यर्थो द्रष्टव्यः । वर्धयन्तु । कतमाः । उच्यते । याः मम मेधातिथेः स्वभूताः । सत्कर्तृका इत्यर्थः । किंच येऽप्येते मदीया ऋत्विजः पावकवर्णाः पावक इव वरणीयाः । शुचयः दीप्ताः । विपश्चितः मेधाविनः । एतेऽपि स्तोमैः स्तोत्रैस्त्वां अभि अनूषत आभिमुख्येन अस्तुवत स्तुवन्ति वा । एतत्कर्तृका अपि स्तुतयः त्वां वर्धयन्तीत्यर्थः ॥

इमा गिरः स्तुतयः । त्वा त्वां वर्धन्तु हे पुरूवसो बहुधन । याः मम मदीया गिरः ता इमा इति समन्वयः । पावकवर्णाः शुचयः विपश्चितः विद्वांसः अभ्यनूषत अभिष्टुवन्ति स्तोमैः त्वाम् ॥ ८ ॥

उदु त्ये मधुमत्तमा गिरस्तोमास ईरते ।
सत्राजितो धनसा अक्षितोतयो वाजयन्तो रथा इव ॥

मेधातिथेरार्षम् । उदित्ययमुपसर्गः ईरते इत्याख्यातेन सम्बन्धयितव्यः । त्येशब्दस्तवशब्दपर्यायः । त्ये तव । मधुमत्तमाः अत्यन्तमधुराः । प्रीतिकरा इत्यर्थः । गिरः स्तुतयः स्तोत्रलक्षणाः । स्तोमासः स्तोत्राणि च । उदीरते शस्त्राणि ते ऊर्ध्वं गच्छन्ति । भवन्तं इन्द्रं प्रतिगच्छन्तीत्यर्थः । कथं पुनः उदीरते । उच्यते । यथा सत्राजितः । सदा ये जयन्ति शत्रून् ते सत्राजितः । सदा शत्रूणां जेतारः । धनसाः परकीयानां धनानां सम्भक्तारः । आहर्तार इत्यर्थः । अक्षितोतयः । अक्षीणा ऊतिः पालनं येषां ते अक्षितोतयः । अक्षीणपालना इत्यर्थः । वाजयन्तः पूजयन्तः । अथवा वाजशब्दो वेगवचनः । वेगवन्तः रथा इव । एतदुक्तं भवति । यथा एवंगुणविशिष्टा रथाः गच्छन्ति तद्वत् त्वां प्रति मदीयानि शस्त्राणि स्तोत्राणि च गच्छन्तीत्यर्थः ॥

उदीरते उदीरयन्ते । त्ये ते इमे स्तोमासः स्तोतारः । मधुमत्तमाः रसवत्तमाः । गिरः स्तुतीः । सत्राजितः सर्वदा जेतारः इन्द्रप्रसादात् । धनसाः धनानां संभक्तारः । अक्षितोतयः अक्षीणरक्षाः । वाजयन्तः युद्धमिच्छन्तः रथा इव अकृतनेमिस्वनाः ॥ ९ ॥

यथा गौरो अपा कृतं तृष्यन्नेत्यवेरिणम् ।
अपित्वे नः प्रपित्वे तूयमा गहि कण्वेषु सु सचा पिब ॥

देवातिथेरार्षम् । यथा गौरः गौरमृगः सिंहो व्याघ्रो वा । अपा उदकेन कृतं प्रदेशं तडागादिकं प्रति । तृष्यन् एति आगच्छति । अव इत्युपसर्गश्रुतेः क्रियापदमध्याह्रियते । अवहाय । इरिणं प्रदेशम् । एवं त्वां हे इन्द्र अपित्वे अपगमनकाले । प्रपित्वे प्राप्ते । नः अस्माकम् । तूयं तूर्णां क्षिप्रं आगहि आगच्छेत्यर्थः । एत्य च कण्वेषु । सप्तमीबहुवचनमिदं

तृतीयाबहुवचनस्य स्थाने द्रष्टव्यम् । कण्वैर्मेधाविभिरस्मदीयैः ऋत्विग्भिः सह पिब सोमम् ॥

देवातिथिः काण्वः । यथा गौरः गौरमृगः । तृष्यन् पिपासुः । अपाकृतं वर्जितं उदकेन । इरिणं ऊषरं क्षेत्रम् । अवैति गच्छति अभिगच्छति । उदकभ्रान्त्या । इरिणमिति निदर्शनं उदकाभावात् तृष्णातिशयनिदर्शनार्थम् । तथा त्वं अपित्वे आगमने दिवसस्य । प्रातः । प्रपित्वे प्रगमने अपराह्णे । नः अस्मान् अभि । तूयं क्षिप्रम् । आगहि आगच्छ । आगत्य च कण्वेषु कण्वपुत्रेषु अस्मासु यजमानेषु । सु सुष्ठ त्वं पिब सोमं सचा सहास्माभिः ॥१०॥

तृतीये षष्ठ्या दशत्या

शग्ध्यू षु शचीपत इन्द्र विश्वाभिरूतिभिः ।
भगं न हि त्वा यशसं वसुविदमनु शूर चरामसि ॥

भर्गस्यार्षम् । शग्धि साधय । ऊ सु इति द्वावपि पदपूरणौ । हे शचीपते । शचीति कर्मनाम । शच्याः पतिः स्वामी शचीपतिः । तस्य सम्बोधनं हे शचीपते । सर्वकर्मणां ज्योतिष्टोमादीनां अधिपतिभूत इन्द्र । किं पुनर्याचामहे । विश्वाभिः ऊतिभिः । सहयोगलक्षणा एषा तृतीया । विश्वैः पालनैः सह । भगं न । नशब्द उपरिष्टादुपचारत्वादुपमार्थीयः । अस्त्युपमार्थस्य संप्रत्यर्थे प्रयोग इति पदपूरणः । पालनसहितं धनमित्यर्थः । हीति पदपूरणः । कं पुनर्याचामहे । उच्यते । त्वा त्वां इन्द्रम् । कीदृशं त्वाम् ।

उच्यते । यशसम् । अन्तर्णीतमत्वर्थमिदं द्रष्टव्यम् । यशस्विनमन्नवन्तं त्वामित्यर्थः । वसुविदम् । वसु धनम् । तत् यः विन्दति लभते स वसुवित् । तं वसुविदम् । शत्रुवस्त्वार्थानां लब्धारमित्यर्थः । कस्मात्पुनस्त्वां प्रार्थयामहे । उच्यते । अनु शूर चरामसि । अन्वित्ययमुपसर्गः परिशब्दस्य पर्यायः । यस्मात्त्वां हे शूर परिचरामः तस्मात्प्रार्थयामः ॥

भर्गः । शग्धि देहि यदभिलषितं अस्माकं तत् । उ षु इतीमौ पूरणौ । हे शचीपते । शचीति प्रज्ञाकर्मणोः नाम । हे इन्द्र विश्वाभिः ऊतिभिः मरुद्भिः सह । भर्गं न भगमिव देवम् । हि यस्मात् त्वा त्वाम् । यशसं यशस्विनम् । वसुविदं धनलम्भनम् । अनुचरामसि परिचरामः हे शूर ॥ १ ॥

या इन्द्र भुज आभरः स्वर्वाँ असुरेभ्यः ।
स्तोतारमिन्मघवन्नस्य वर्धय ये च त्वे वृक्तबर्हिषः ॥

रेफ आह । यास्त्वं हे इन्द्र भुजः । भुज्यन्ते ताः इति भुजः अन्नानि । आभरः आहृतवानसि । केभ्यः सकाशात् । उच्यते । स्वर्वान् । स्वर्शब्दो धनवचनः । तद्यस्यास्ति सः स्वर्वान् । प्रथमैकवचनमिदं पञ्चमीबहुवचनस्य स्थाने द्रष्टव्यम् । स्वर्वद्भ्यः धनवद्भ्यः । केभ्यः पुनः स्वर्वद्भ्यः । उच्यते । असुरेभ्यः सकाशादित्यर्थः । स्तोतारं इत् स्तोतारमेव । हे मघवन् धनवन् । अस्य । षष्ठ्येकवचनमिदं तृतीयाबहुवचनस्य स्थाने द्रष्टव्यम् । एभिरन्नैर्वर्धय पुष्टान् कुर्वित्यर्थः । न केवलं माम् । ये च त्वे । यस्य च भावेन भाव-लक्षणम् (पा २. ३. ३७) इत्येवमियं सप्तमी । तच्छब्दश्रुतेश्च लक्षणभूत-क्रियापदाध्याहारः । ये च त्वे त्वयि । त्वयीष्टव्ये सति । वृक्तबर्हिषः आस्तीर्णबर्हिषः त्वां ये व्यञ्जन्ते तानपि तैरन्नैः पोषयेत्यर्थः ॥

रेफः काश्यपः। याः भुजः भोजनानि धनानि। आभरः आहरः असुरेभ्यः। हे इन्द्र स्वर्वान् सर्वधनवान् त्वम्। तान् अस्मभ्यं प्रयच्छ इति शेषः। स्तोतारमित् स्तोतारमेव वर्धय। अस्य कर्मणः स्तोतारं इति सम्बन्धः। अथवा करणे षष्ठी। तव स्तोतारं अनेन धनेन वर्धय इति। ये च त्वे अन्ये वृक्तबर्हिषः स्तीर्णबर्हिषः यज्वानः तांश्च वर्धय हे मघवन्॥ २॥

प्र मित्राय प्रार्यम्णे सचथ्यमृतावसो।
वरूथ्ये वरुणे छन्द्यं वचः स्तोत्रं राजसु गायत॥

जमदग्निः आत्मीयान् ऋत्विजः आह। प्रेत्ययमुपसर्गः गायत इत्यनेन सम्बन्धयितव्यः। मित्राय अर्यम्णे। द्वे अप्येते तादर्थ्यचतुर्थ्यौ। मित्रस्य अर्यम्णश्चार्थायेत्यर्थः। ऋतावसो। ऋतो यज्ञः। स वसुभूतो यस्य सः ऋतवसुः इन्द्रः। ऋतवसुरेव ऋतावसुः। छान्दसं दीर्घत्वम्। सम्बुध्येकवचनं चतुर्थ्यर्थे द्रष्टव्यम्। ऋतवसवे इन्द्रस्य चार्थायेत्यर्थः। वरुणे। सप्तम्येकवचनमिदं चतुर्थ्यर्थे द्रष्टव्यम्। वरुणस्य चार्थायेत्यर्थः। सचथ्यं सचनीयम्। सम्भजनीयमित्यर्थः। वरूथ्ये। सप्तम्येकवचनमिदं द्वितीयैकवचनस्य स्थाने द्रष्टव्यम्। वरूथ्यं वरणीयम्। छन्द्यम्। छन्दशब्देन स्तुतिरुच्यते। तस्यां स्तुतौ भवसीत्यर्थः। किं पुनस्तत्। वचः वचनं स्तोतृलक्षणं स्तोत्रं च। राजसु। सप्तमीबहुवचनमिदं चतुर्थी-बहुवचनस्य स्थाने द्रष्टव्यम्। राजभ्य ईश्वरेभ्यः दीप्तेभ्यो वा मित्रादिभ्यः। तेषां अर्थाय। प्रगायत हे मदीया ऋत्विज इत्यर्थः॥

जमदग्निः। प्र प्रकर्षेण गायत इत्युपरितनं विपरिणतं अत्र सम्बद्धयते। गायत गीतं कुरु हे स्तोतः। मित्राय प्रगायत। अर्यम्णे च प्रगायत। सचथ्यं सचथस्य सेवायाः योग्यं स्तोत्रम्। हे ऋतावसो यज्ञधन। अथ जमदग्निः बहुवदात्मानं आह। वरूथ्ये वरूथ्यं वरूथाय गृहाय हितम्।

छन्द्यं कमनीयम् । वचः स्तोत्रम् । वरुणे वरुणमुद्दिश्य गायत । अथ सर्वान् आदित्यान् उद्दिश्य आह । स्तोत्रं गायत जमदग्नयः राजसु नियन्तृषु आदित्येषु । तान् उद्दिश्य ॥ ३ ॥

अभि त्वा पूर्वपीतय इन्द्र स्तोमेभिरायवः ।
समीचीनास ऋभवः समस्वरन् रुद्रा गृणन्त पूर्व्यम् ॥

मेधातिथेरार्षम् । अभीत्ययमुपसर्गः गृणन्त इत्याख्यातेन सम्बध्यते । त्वा त्वाम् । पूर्वपीतये अनादिकालप्रवृत्ताय सोमपानाय । हे इन्द्र स्तोमेभिः स्तोमैः । आयवः ऋत्विग्लक्षणा मनुष्याः । कीदृशा मनुष्याः । उच्यते । समीचीनासः सङ्गताः । सहभूता इत्यर्थः । ऋभवः महान्तः । समस्वरन् पूर्वकालेऽपि स्तुतिमुच्चारितवन्तः । रुद्राः रोदनस्वभावकाः । स्तुत्युच्चारणशीला इत्यर्थः । अभिगृणन्ते आभिमुख्येन स्तुवन्तीत्यर्थः । कीदृशं त्वां स्तुवन्ति । उच्यते । पूर्व्यं पूर्वतनमित्यर्थः ॥

मेधातिथिः । अभिसमस्वरन् अभिसंस्तुवन्ति । त्वा त्वाम् । पूर्वपीतये प्रथमपानाय । हे इन्द्र स्तोमेभिः स्तोत्रैः । आयवो मनुष्याः । समीचीनासः सङ्गताः । ऋभवः दीप्ताः । रुद्राः स्तोतारः अन्ये गृणन्त अस्तुवन् । पूर्व्यं पुरातनं इन्द्रम् । रुद्राः रुवन्तः शब्दायमानाः । रुवन्ति उपगायन्ति इति रुद्राः ॥ ४ ॥

प्र व इन्द्राय बृहते मरुतो ब्रह्मार्चत ।
वृत्रं हनति वृत्रहा शतक्रतुर्वज्रेण शतपर्वणा ॥

पुरुमेधाः आत्मीयान् ऋत्विजः आह । प्रेत्ययमर्चतेत्यनेन सम्बन्धयितव्यः । वः । द्वितीयाबहुवचनमिदं प्रथमाबहुवचनस्य स्थाने द्रष्टव्यम् । यूयम् । इन्द्राय बृहते इन्द्रस्य बृहतोऽर्थाय । हे मरुतः

मदीया ऋत्विजः । ब्रह्म सोमलक्षणमन्नम् । प्रार्चत प्रकर्षेण स्तुतेत्यर्थः । स इन्द्रः कीदृशः यस्यार्थाय स्तुमः । उच्यते । यः वृत्रं मेघं हनति हन्ति । वृत्रहा पूर्वकालमपि शत्रूणां हन्ता । शतक्रतुः बहुप्रज्ञः बहुकर्मा वा । कथं पुनर्यो वृत्राणि हन्ति । उच्यते । वज्रेण । कीदृशेन वज्रेण । शतपर्वणा । पर्वशब्देन सन्धिरुच्यते । शतसन्धिना । बहुसन्धिनेत्यर्थः ॥

अस्याः परस्याश्च नृमेधपुरुमेधौ द्वावृषी । प्रार्चत प्रकुरुत इत्यर्थः । वः यूयम् । इन्द्राय बृहते हे मरुतः स्तोतारः । महत् रुवन्तीति मरुतः । ब्रह्म स्तोत्रम् । स्तुतश्च शतक्रतुः शतकर्मा शतप्रज्ञो वा इन्द्रः । वृत्रं शत्रुं युष्माकम् । हनतीति पञ्चमलकारान्तम । वृत्रहा वृत्राणां हन्ता । वज्रेण शतपर्वणा ॥ ५ ॥

बृहदिन्द्राय गायत मरुतो वृत्रहन्तमम् ।
येन ज्योतिरजनयन्नृतावृधो देवं देवाय जागृवि ॥

मेधातिथिः आत्मीयान् ऋत्विज आह । बृहत् महत् । सुष्ठ्वित्यर्थः । इन्द्राय गायत उच्चारयत । किं तत् । सामर्थ्यात् स्तुतिरूपम् । हे मरुतः मदीया ऋत्विजः । कीदृशं पुनः स्तुतिरूपमुच्चारयामः । उच्यते । वृत्रहन्तमं अतिशयेन वृत्रस्य हन्तृ । येनासौ स्तुतः वृत्रं हन्तुं शक्नोतीत्यर्थः । येन च ज्योतिरादित्याख्यं अजनयत् आरोपितवानित्यर्थः । हे ऋतावृधः । ऋतो यज्ञः । तं ये वर्धयन्ति ते ऋतावृधः । तेषां सम्बोधनं हे ऋतावृधः । यज्ञस्य वर्धयितारः । उपरि समीपयितार इत्यर्थः । कीदृशं पुनः स्तुतिरूपमुच्चारयामः । उच्यते । देवं । द्वितीया तृतीयार्थे द्रष्टव्या । देवेन सोमेन संयुक्तम् । कीदृशस्येन्द्रस्यार्थाय । उच्यते । देवाय । दानादिगुणयुक्तस्येन्द्रस्यार्थाय । कीदृशं पुनः स्तुतिरूपमुच्चारयामः । उच्यते । जागृवि अतिप्रीतिकरमित्यर्थः ॥

बृहत् महत् स्तोत्रं बृहदाख्यमेव वा साम। इन्द्राय गायत हे मरुतः स्तोतारः। वृत्रहन्तमं वृत्राणां पापानां अतिशयेन हन्तृ। येन साम्ना ज्योतिः यज्ञः अजनयन्। ऋतावृधः यज्ञस्य वर्धयितारः अङ्गिरसः। देवं दीप्तज्योतिषम्। देवाय इन्द्राय। जागृवि प्रबुद्धं अतिरोहितम्॥ ६॥

इन्द्र क्रतुं न आभर पिता पुत्रेभ्यो यथा।
शिक्षा णो अस्मिन् पुरुहूत यामनि जीवा ज्योतिरशीमहि॥

शक्तिरिन्द्रमाह। हे इन्द्र क्रतुं प्रज्ञानम्। नः अस्माकम्। आभर आहर। आनयेत्यर्थः। शिक्ष देहि। कथं वा देहि। पिता पुत्रेभ्यो यथा यथा पिता पुत्रेभ्यो ददाति तद्वदित्यर्थः। क्व पुनर्ददामि। उच्यते। अस्मिन् यामनि। यान्ति देवा यस्मिन् सः यमा यज्ञः। तस्मिन् यामनि। यज्ञे इत्यर्थः। हे पुरुहूत पुरुभिर्यजमानैः आहूत। त्वद्दत्तया च प्रज्ञया जीवा जीवन्तो वयम्। ज्योतिः ज्ञानं अशीमहि प्राप्नुयामेत्यर्थः॥

वसिष्ठः। हे इन्द्र क्रतुं कर्म प्रज्ञानं वा। नः अस्मभ्यम्। आभर आहर। पिता पुत्रेभ्यः यथा धनम्। शिक्षा देहि नः अस्मभ्यं धनं हे पुरुहूत। अस्मिन् यामनि यज्ञे। जीवा वयम्। ज्योतिः सूर्यम्। अशीमहि प्राप्नुयाम प्रतिदिनम्॥ ७॥

मा न इन्द्र पराव़ृणग्भवा नः सधमाद्ये।
त्वं न ऊती त्वमिन्न आप्यं मा न इन्द्र पराव़ृणक्॥

रेफो नाम ऋषिः इन्द्रमाह। मा नः अस्मान्। हे इन्द्र परावृणक्। वृजी वर्जने इत्यस्येदं रूपम्। मा अस्मान् परावर्जीः। भव नः अस्माकम्। सधमाद्ये इत्येषा सप्तमी प्रथमैकवचनस्य स्थाने द्रष्टव्या। सहभूतानां

मदनीयः । किंच त्वं नः अस्माकम् । ऊती अविता रक्षिता तर्पयिता वा । त्वं इत त्वमेव नः आप्यं ज्ञातव्यमित्यर्थः । यतश्चैवमतः पुनरपि ब्रवीमि मा न इन्द्र परावृणक् ॥

रेफः । हे इन्द्र मा परावृणक् मा त्याक्षीः । नः अस्मान् हे इन्द्र । भव नः अस्माकं असाधारणः सधमाद्ये यज्ञे । त्वं नः ऊती ऊतये रक्षायै भव । त्वमित त्वमेव हि नः आप्यं ज्ञातेयम् । बन्धुः इत्यर्थः । पुनरुक्तिः आदरार्था ॥ ८ ॥

वयं घ त्वा सुतावन्त आपो न वृक्तबर्हिषः ।
पवित्रस्य प्रस्रवणेषु वृत्रहन् परि स्तोतार आसते ॥

मेधातिथेरार्षम् । घ इति पदपूरणः । त्वा त्वाम् । परि इत्येतत् आसत इत्येतेन सम्बन्धयितव्यम् । कीदृशा वयम् । उच्यते । सुतावन्तः सोममभिषुतवन्तः । कृतसोमाभिषवा इत्यर्थः । न केवलं सुतावन्तः । वृक्तबर्हिषश्च आस्तीर्णबर्हिष इत्यर्थः । पर्यास्महे त्वां परिवार्य व्यवतिष्ठामहे । न केवलं वयम् । येऽप्येते मदीया ऋत्विजः पवित्रस्य भवतः इन्द्रस्य स्तोतारः एतेऽपि त्वां हे वृत्रहन् पर्यासते । कथं पुनः पर्यासते । आपो न । नशब्द उपरिष्टादुपचारत्वादुपमार्थीयः । आप इव प्रस्रवणेषु । एतदुक्तं भवति । यथा आपः नद्यः निम्नस्थानेषु द्वीपं परिवार्य व्यवतिष्ठन्ते तद्वत् वयं स्तोतारश्च त्वां परिवार्य व्यवतिष्ठाम इत्यर्थः ॥

मेधातिथिः । वयं सुतवन्तः अभिषुतवन्तः सोमम् । वृक्तबर्हिषः स्तीर्णबर्हिषः । त्वा त्वां उपगच्छामः इति शेषः । घेति पूरणः । आपो न आप इव प्रवणाः । पवित्रस्य सोमस्य । प्रस्रवणेषु सवनेषु । हे वृत्रहन् स्तोतारः इमे पर्यासते स्तोतुं त्वाम् ॥ ९ ॥

यदिन्द्र नाहुषीष्वाँ ओजो नृम्णं च कृष्टिषु ।
यद्वा पञ्च क्षितीनां द्युम्नमाभर सत्रा विश्वानि पौंस्या ॥

शंयुराह । हे इन्द्र नाहुषीषु । नहुष इति मनुष्यनाम । तेषु भवा नाहुष्यः । मनुष्यजातीयाः । ताश्चावान्तरजातीया अभिप्रेताः । या यक्ष-रक्षोगन्धर्वादयः तासु । यत् ओजः बलम् । नृम्णं धनं च । तत् मम शंयोः आभर आनय । न केवलं यक्षरक्षोगन्धर्वादिष्वेव यत् ओजो नृम्णं च तत् आभर । किं तर्हि । कृष्टिषु मनुष्येषु च । रक्षःपिशाचादिषु मनुष्येषु च यद्धनं बलं च तदपि आभर । यद्वा वाशब्दश्चशब्दस्यार्थे । यच्च पञ्च क्षितीनाम् । क्षितय इत्यपि मनुष्यनाम । पञ्च च ते क्षितयश्च । कतमे पुनस्ते । चत्वारो वर्णाः निषादाः पञ्चमः । तेषां क्षितीनां द्युम्नं यशः अन्नं वा तत् आभर । न सकृदेव । किं तर्हि । सत्रा । यद्यपि सत्राशब्दः सत्यनामसु पठितः तथापीह सर्वदाशब्दपर्यायो द्रष्टव्यः । सर्वदा इत्यर्थः । विश्वानि सर्वाणि पौंस्यानि बलानि आभरेत्यर्थः ॥

शंयुः । यत् ओजो बलं हे इन्द्र । नाहुषीषु मानुषीषु । कृष्टिषु प्रजासु विद्यते । आ इति चार्थे । नृम्णं धनं च विद्यते । यद्वा यच्च द्युम्नं अन्नम् । पञ्च पञ्चानाम् । विभक्तेर्लुक् । क्षितीनां जनानाम् । निषादपञ्चमा वर्णाः पञ्च क्षितयः । तदाभर आहर अस्मभ्यम् । सत्रा महान्ति । विश्वानि पौंस्यानि वीर्याणि चाहर ॥ १० ॥

तृतीये सप्तम्या दशत्या

कुलमग्रे परीक्षेत ये मातृतः पितृतश्चेति यथोक्तं पुरस्तात् ॥

अग्र इति[1] प्रथममित्यर्थः । कुलं परीक्ष्य प्रथमं पश्चाद्वरस्य ये गुणाः वध्वाश्च । सत्स्वप्युत्तरोत्तरगुणेषु कथं कुलमग्रं प्रधानं स्यादिति । एतच्च प्रयोजनं अग्रग्रहणस्य[2] । कथं पुनस्तत्परीक्ष्यं[3] कुलम् । तदुक्तं पुरस्तादिति[4] । अथ वरगुणा अभिधीयन्ते ॥

कुलशब्देनोभौ वंशौ महापातकादिरहिताविति सिद्धौ । तथापस्मारादिदोष-रहिताविति । कुलमग्रे प्रथमं परीक्षेत । कथम् । ये मातृतः पितृतश्चेति यथोक्तं पुरस्तात् । 'ये मातृतः पितृतश्च दशपुरुषं समनुष्ठितविद्यातपोभ्यां पुण्यैश्च कर्मभिर्येषामुभयतो वा ब्राह्मण्यं निनयेयुः पितृतश्चैके' इति । अग्रेवचनं वधूवर-गुणेभ्यः कुलमेव प्रधानं स्यात् इत्येवमर्थम् । अथ वरगुणमाह ॥ (१)

बुद्धिमते कन्यां प्रयच्छेत् ॥

तत्र[5] बुद्धिमत इति बुद्धिमत्तरायेत्यर्थः[6] । का[7] पुनर्बुद्धिः । यार्थ-दर्शिनी[8] । यो यः[9] शास्त्रवित् तद्वते । एवं वरगुणा[10] उक्ताः । कन्या-गुणा वक्तव्याः ॥

[1] Before अग्र इति A. has कुलमग्रे पुरस्तात्. L. has कुलमग्र इति.

[2] A. T. अग्रग्रहण L. अग्रग्रहणम्.

[3] L. पुरस्तात्परीक्षं A. पुण्यनस्तत्परीक्षं.

[4] A. L. पुरस्ताच्चेति.

[5] Before तत्र A. has बुद्धि-च्छेत. L. has बुद्धिमत इति. L. has तच्च instead of तत्र.

[6] L. बुद्धिमतिशयेत्यर्थः. A. बुद्धिमत्तवायेत्यर्थः

[7] L. किं.

[8] A. यार्थादर्शिनी.

[9] A. योर्योयः. L. T. योऽर्थः

[10] A. वत्तरगुणा.

अर्थदर्शिनी बुद्धिः । कोऽर्थः । यः शास्त्राविरुद्धः । तद्वते बुद्धिमते कन्यां प्रयच्छेत् । अथ कन्यागुणमाह ॥ (२)

बुद्धिरूपशीललक्षणसम्पन्नामरोगामुपयच्छेत ॥

बुद्धिर्व्याख्याता[1] । रूपमिति । रोचते यद्रूपम् । तत्र हि मनो रमते । तैः लक्षणैः[2] संपन्ना लक्षणसंपन्ना । तामुपयच्छेत[3] । तत्र तु लक्षणबहुत्वात् तस्य शास्त्रस्य दुरवगाहत्वात् तेन आचार्य उद्देशेन[4] स्वयमेव लक्षणोपायं शास्ति ॥

बुद्धिरूपशीललक्षणैर्युक्तां रोगवर्जितां कन्यामुपयच्छेत स्वीकुर्यात् । यत्र स्वमनो रमते तद्रूपम् । लक्षणानां दुरगाहत्वं मत्वा परीक्षान्तरमाह ॥ (३)

दुर्विज्ञेयानि लक्षणानीति ॥

तत्र[5] दुर्ज्ञेयत्वात् लक्षणोपायं शास्ति । कः पुनरसावुपायः ॥

लक्षणानि दुर्विज्ञेयानीति कृत्वा एवं परीक्षेत ॥ (४)

अष्टौ पिण्डान् कृत्वा ऋतमग्रे प्रथमं जज्ञ ऋते सत्यं प्रतिष्ठितम् । यदियं कुमार्यभिजाता तदियमिह प्रतिपद्यताम् । यत् सत्यं तद्दृश्यताम् । इति पिण्डानभिमन्त्र्य कुमारीं ब्रूयात् एषामेकं गृहाणेति ॥

[1] Before this A. has बुद्धिरूपलक्षणसंपन्नामुपयच्छेत. A. बुद्धिर्व्याख्याताः instead of बुद्धिर्व्याख्याता. L. does not quote even the Pratīka.

[2] A. T. रसाते लक्षणैः L. रमातैः लक्षणैः

[3] L. नामुपायच्छेत.

[4] L. उद्देशात.

[5] Before this A. quotes the whole sūtra. L. has दुर्विज्ञेयानीति.

ऋतमग्र[1] इत्यनेन मन्त्रेण पिण्डानभिमन्त्र्य कुमारीं ब्रूयात्[2] एषामेकं ग्रहाणेति। अथ[3] पिण्डाधिकारे पुनः पिण्डग्रहणं किमर्थम्। कुमार्या[4] अभिमन्त्रणं माभूदिति। कः पुनः प्रसङ्गः। एकवाक्यनिर्देशात्। कुमार्याश्च द्वितीयानिर्देशात् प्रसज्येत[5]। तन्निवृत्त्यर्थं[6] पिण्डग्रहणं क्रियते[7]। अथ कुतस्ते पिण्डा भवन्तीति[8] उपरिष्टादन्वाचष्टे॥

क्षेत्रादिभ्योऽष्टभ्यो मृदमाहृत्याष्टौ पिण्डान् कृत्वा 'ऋतमग्रे' इत्यनेन मृत्पिण्डानभिमन्त्र्य कुमारीं ब्रूयात् एषामेकं गृहाणेति। पुनः पिण्डग्रहणं कुमार्या अभिमन्त्रणं मा भूत्। सापि हि द्वितीयानिर्दिष्टा॥ (५)

क्षेत्राच्चेदुभयतः सस्याद्गृह्णीयादन्नवत्यस्याः प्रजा भविष्यतीति विद्यात्। गोष्ठात् पशुमती। वेदिपुरीषाद्ब्रह्मवर्चस्विनी। अविदासिनो ह्रदात् सर्वसम्पन्ना। देवनात्कितवी। चतुष्पथाद्द्विप्रव्राजिनी। इरिणादधन्या। श्मशानात् पतिघ्नी॥

क्षेत्राच्चेदुभयतः सस्यात्[9] आहृत्य पिण्डं[10] गृह्णीयात्। अन्नवत्यस्याः प्रजा भविष्यतीति विद्यात्[11]। उभयतःसस्यादिति। एकस्मिन्[12] संवत्सरे

[1] Before this A. has अष्टौ पिण्डान् कृत्वा. L. has अष्टौ पिण्डान् कृत्वेति.
[2] A. ब्रयात.
[3] A. अर्थ पिडाधिकारे.
[4] A. L. कुर्यात्.
[5] A. प्रसज्योत.
[6] A. तन्निवृत्त्यर्थं.
[7] A. क्रियतेः
[8] A. भवतीति.
[9] Before this A. has क्षेत्राविद्यात L. has क्षेत्राच्चेदुभयत इति.
[10] A. आहृत पिदु.
[11] A has only प्रविद्य स after अन्नवत्यस्याः
[12] A. सस्यादिकत्यस्मिन्.

यत्रोभयं सस्यं निष्पद्यते तदुभयतःसस्यम् । तस्मात् क्षेत्रात्[1] । गोष्ठाच्चेदाहृतं[2] पिण्डं गृह्णीयात् पशुमत्यस्याः प्रजा भविष्यतीति विद्यात् । वेदिपुरीषाच्चेदाहृतं पिण्डं गृह्णीयात् ब्रह्मवर्चस्विन्यस्याः प्रजा भविष्यतीति विद्यात् । अविदासिनो ह्रदादाहृतं[3] पिण्डं गृह्णीयात् सर्वसंपन्नास्याः[4] प्रजा भविष्यतीति विद्यात् । देवनात् कितवी अस्याः[5] प्रजा भविष्यतीति विद्यात् । चतुष्पथाच्चेदाहृतं[6] पिण्डं गृह्णीयात् द्विप्रव्राजिनी[7] भवतीति विद्यात् । प्रव्रजत्यन्यैः सह[8] तिष्ठतीत्यर्थः । इरिणाच्चेदाहृतं पिण्डं गृह्णीयात् अधन्या भवतीति विद्यात्[9] । उपरता यस्य ओषधयः[10] । शुष्का इत्यर्थः । तदिरिणम्[11] । तस्मादिरिणात् श्मशानाच्चेदाहृतं पिण्डं[12] गृह्णीयात् पतिं हन्तीति विद्यात्[13] ॥

उभयतःसस्यात् क्षेत्रादाहृतं मृत्पिण्डं गृह्णीयात् चेत् अस्याः प्रजा अन्नवती भविष्यतीति विद्याम् । एवमुत्तरत्रापि नेयम् । यदेकस्मिन् संवत्सरे

[1] A. निष्पद्यतेऽभयतः सस्यात् क्षेत्रात्. L. निष्पद्यते तदुभयतः सस्यात् क्षेत्रात्.
[2] A. गोष्ठाच्चैदाहृतं.
[3] A. ह्रदादाहृते.
[4] A. सर्वसपन्नास्या:
[5] A. दोवनात्कितवास्याः
[6] A. चतुष्पथाच्चेदाहृते.
[7] A. विप्रव्राजिनी.
[8] A. प्रव्रजत्प्रन्मैः सह. L. प्रव्रजत्यन्यैः सा सह. T. विविधं प्रव्रजति अन्यैः सह.
[9] विद्यात् missing in A.
[10] A. अस्या औषधयः L. अस्या ओषधयः
[11] A. तदिरिण.
[12] A. नमशानाच्चेदाहृत पिण्डं.
[13] After गृह्णीया and पतिं A has the following repeated :— दधन्या भवतीति उपरता अस्या औषधयः शुष्टा इत्यर्थः तदिरिणं तस्मादिरिणात् । श्मशानाच्चेदाहृत-पिंडं गृह्णीयात्. It goes on as गृह्णीयात्पतिं. L. has only अधन्या भवतीति repeated. A. omits इति विद्यात्.

द्विः फलति तदुभयतःसस्यं क्षेत्रम् । अपवृत्ते कर्मणि या वेदिस्तस्याः पुरीषम् । अविदासिह्रदो नामाशोष्यं ह्रदम् । देवनं द्यूतस्थानम् । यत्रोप्तबीजं न प्ररोहति तदिरिणम् । द्वौ प्रव्रजतीति द्विप्रव्राजिनी । स्वैरिणीति यावत् । पतिं हन्तीति पतिघ्नी । अत्र प्रजास्तुतिनिन्दाद्वारेण सैव स्तुता निन्दिता चेति मन्तव्यम् । उत्तरैस्त्रिभिर्वाक्यैः सैव निन्द्यते ॥ (६)

इति मच्चमी खण्डिका

अलंकृत्य कन्यामुदकपूर्वां दद्यादेष ब्राह्मो विवाहः । तस्यां जातो द्वादशावरान् द्वादश परान् पुनात्युभयतः । ऋत्विजे वितते कर्मणि दद्यादलंकृत्य स दैवो दशावरान् दश परान् पुनात्युभयतः । सह धर्मं चरतं इति प्राजापत्योऽष्टावरानष्ट परान् पुनात्युभयतः । गोमिथुनं दत्त्वोपयच्छेत स आर्षः सप्तावरान् सप्त परान् पुनात्युभयतः । मिथः समयं कृत्वोपयच्छेत स गान्धर्वः । धनेनोपतोष्योपयच्छेत स आसुरः । सुप्तानां प्रमत्तानां वापहरेत् स पैशाचः । हत्वा भित्त्वा च शीर्षाणि रुदतीं रुदद्भ्यो हरेत् स राक्षसः ॥

अलंकृत्य[1] कन्यामुदकपूर्वं दद्यादित्येवमादयोऽष्टौ विवाहा वेदितव्याः । तत्र पूर्वे चत्वारो विवाहाः पूर्वः पूर्वः प्रशस्ताः[2] । उत्तरे तु चत्वारः उत्तरोत्तरः पापीयांसः । अथ किं सर्वेषां सर्वे[3] भवन्ति आहोस्वित्[4] विनि-

[1] Here there is no Pratika. L. has स्पष्टोऽर्थः before this.

[2] A. प्रशस्ते:

[3] This word omitted in all MSS.

[4] L. अहोस्वित्.

योगोऽप्यस्ति[1] । केषांचित्[2] विनियोगः[3] । पूर्वौ तावत्[4] ब्राह्मणस्य । इतरेतरयोः[5] प्रतिग्रहाभावात् । ऋत्विगभावाच्च[6] । गान्धर्वः[7] क्षत्रियस्य राक्षसश्च । कथं ज्ञायते । युद्धसंयोगात् । गान्धर्वस्य च पुराणे दृष्टत्वात् । आसुरस्तु वैश्यस्य । कस्मात् । धनसंयोगात् । अन्ये त्रयोऽनियताः । वित्ताभावात् । तेन त्रयाणामपि ते भवन्ति ॥

कन्यामलङ्कृत्य उदकपूर्वां दद्यात् । एष विवाहो ब्राह्मसंज्ञो भवति । तस्यां कन्यायां जातो द्वादशावरानुत्पत्स्यमानान् द्वादश परान् पुनाति उभयतः । मातृतः पितृतश्चेत्यर्थः । एवमुत्तरत्रापि नेयम् । वितते कर्मणीति वैतानिके कर्मणीत्यर्थः । मिथःसमयकरणं नाम त्वं मम भार्या भव अहं तव पुरुषो भवामीत्येवंरूपो विवाहो गान्धर्वसंज्ञः । कन्यापित्रे धनदानेन यो विवाहः स आसुरसंज्ञः । सुप्तेभ्यः प्रमत्तेभ्योऽनवधानेभ्यः कन्यामपहृत्य यो विवाहः स पिशाचसंज्ञकः । युद्धं कृत्वा कन्यामपहृत्य यो विवाहः स राक्षससंज्ञकः । एवमेतेऽष्टौ विवाहाः । तत्र पूर्वेषु चतुर्षु पूर्वः पूर्वः प्रशस्तः । उत्तरेषु चतुर्षु उत्तरोत्तरः पापीयान् । तत्र पूर्वौ ब्राह्मणस्य । इतरयोः प्रतिग्रहाभावात् आर्त्विज्याभावाच्च । गान्धर्वः क्षत्रियस्य पुराणे दृष्टत्वात् । राक्षसश्च तस्यैव युद्धसंयोगात् । आसुरस्तु वैश्यस्य धनसंयोगात् । इतरे त्रयोऽनियताः ॥ (१)

इति षष्ठी खण्डिका

---

[1] Perhaps नियम would be a better word in both the places. See the word अनियत at the end of the commentary on this section.

[2] All MSS. read केचित्.

[3] See note 1 above.

[4] L. पूर्वौ उक्तः तावत्.

[5] A. इतरतरयोः. L. omits this word.

[6] A. ऋत्विगभावाच्च.

[7] A. गीधर्वा.

अथ खलूच्चावचा जनपदधर्मा ग्रामधर्माश्च । तान्विवाहे प्रतीयात् ।

अथशब्दो[1]ऽधिकारार्थः । इत उत्तरं यद्वक्ष्यामः तत् सर्वेषां वेदितव्यम् । खलुशब्दोऽपार्थकः । उच्चावचा इति नानाप्रकाराः । बहव इत्यर्थः । अथ खलु जनपदधर्मा इति वक्तव्ये उच्चावचग्रहणमपार्थकम् । नेत्युच्यते । उच्चावचग्रहणे[2]ऽक्रियमाणे सर्वे धर्मा ग्रामेषु जनपदेषु च ये शक्याः तेषां सर्वेषां समुच्चयः प्राप्नोति । स चानिष्टः[3] । तेनोच्चावचा[4] नानाप्रकारा एव क्रियेरन्निति । अत उच्चावचग्रहणम् । जनपदा इति च[5] अङ्गा वङ्गा[6] मगधाः कुरवो विदेहाः पाञ्चालाः[7] शूरसेना इत्येवमादयः । एतेषु च ये ग्रामाः तेषु जनपदेषु ग्रामेषु च ये धर्माः तान् विवाहे धर्मान् प्रतीयात् । जानीयादित्यर्थः । कुर्यादित्येतदुक्तं भवति । तानिति शक्यमकर्तुम् । कस्मात् । अधिकृतत्वात् तेषाम्[8] । नेत्युच्यते । ग्रामधर्माश्च विवाहे प्रतीयादित्येवमुच्यमाने[9] न जनपदधर्माणां[10] ग्रामधर्माणां[11] च विधानं स्यादिति । कथं विधानार्थेन लिङ्गासंबन्धो[12] मा भूदिति । अतस्तानीत्युच्यते । किं सिद्धं भवति । अन्येऽपि धर्माः तानीत्यनेनाकृष्यन्ते । के

[1] Before this A. has अथ खलू. प्रतीयोगात. L. has अथ खल्विति.

[2] A. उच्चावग्रहणे.

[3] This word not in any MSS.

[4] A. तेनोच्चानचा.

[5] A. इतिश्च.

[6] A. अगा.

[7] A. पान्चालाः

[8] L. only instead of तेषाम्. A. तेषी.

[9] A. प्रतीयादित्येनमुच्यमाने. L. प्रतीयादित्यनेनमुच्यमाने.

[10] A. omits न before जनपदधर्माणां.

[11] A. ग्रामधर्माणा.

[12] A. लिगासबधो. L. लिङ्गात् संबन्धो.

पुनस्ते धर्माः । कुलधर्माश्च । तान् विवाहे प्रतीयादिति सिद्धं भवति । तेन ग्रामधर्माः[1] कुलधर्माश्च विवाहे प्रतीयादित्यर्थः साधितो भवति । विवाहे स्युः । कथं वा अकृत्स्ने विवाहे स्युः । उपनयनादुत्तरकाले[2] विहितत्वात् उपनयने न स्युः[3] । इत्यतो विवाहग्रहणं क्रियते । अथवा विवाहग्रहणं कुर्वन् तज्ज्ञापयति प्राक् चौळादीनामधिकारोऽनुवर्तत इति । किं पुनरधिकारानुवृत्तौ प्रयोजनमिति । कुलमग्रे परीक्षेतेति योऽयं विशेष उक्तः तस्य सर्वार्थता हविःकल्पिता भवति । तेन यस्य चौलं करिष्यन् भवति तस्य कुलमग्रे परीक्षेतेत्येतत् साधितं भवति । एवमुत्तरेषां साधारण्ये तत्प्रयोजनार्थं विवाहग्रहणम् ॥

अथशब्दोऽधिकारार्थः । यद्वक्ष्यते तद्विवाहे वेदितव्यमिति । खलुरनर्थकः । उच्चावचग्रहणं कथम् । एते जनपदधर्मादयो नानाप्रकाराः क्रियेरन् नैकेन कर्त्रा समुच्चेरन्निति । जनपदधर्मा देशधर्माः । ग्रामशब्देन नगरमुच्यते । धर्मशब्दादेव द्वितीयानिर्देशे सति अन्वये सिद्धे तानितिवचनं कुलधर्मा अपि कार्या इत्येवमर्थम् । तान् तादृशानित्यर्थः । विवाहाधिकारे पुनर्विवाहग्रहणं कृत्स्ने विवाहे यथा स्युरित्येवमर्थम् । इतरथोपयमनकालादुत्तरकालं विहितत्वादुपयमने न स्युः । उपयमनं नाम कन्यायाः स्वीकरणम् । प्रतीयादिति कुर्यादित्यर्थः ॥ (१)

यत्तु समानं तद्वक्ष्यामः ॥

यद्वक्ष्यामः[4] तत्सर्वं समानं वेदितव्यम् । समानं तुल्यं अविसंवादि ।

[1] L. ग्रामाः instead of ग्रामधर्माः

[2] A. उपनयनादुत्तरकाल.

[3] A. उपनयेनेतस्युः

[4] A. has before this यत्तु समान तद्वक्ष्यामः L. does not give the pratīka.

तदिदमनारभ्यं[1] सिद्धत्वात् । यथान्यानि कर्माणि उपदेशादेव सर्वत्र समानानि भवन्ति एवमपि सर्वत्र समानं भविष्यति[2] । ब्रवीति[3] । नियमार्थमिदमारभ्यते नान्यदिति । किं पुनः[4] तदन्यदिति । जनपद-धर्मत्वेन च यो धर्मः प्राप्नोति यश्च वक्ष्यमाणस्तयोर्विकल्पः स्यात् । स मा भूदिति कृत्वा निश्चयः क्रियते । न च भविष्यति विकल्पः । वक्ष्यमाण एव धर्मो भविष्यति । किं कारणम् । शास्त्रविहितत्वात् । नेत्युच्यते । जनपदधर्मा अपि शास्त्रविहिताः । तेन विकल्प उपपद्यते । तस्मान्नियमार्थमारब्धव्यम् । कः पुनरसौ धर्मो योऽनभिप्रेतो निवर्त्यते । यस्मात्तत्र लौकिकेषु[5] सद्य एव व्यवायो दृष्टः । शास्त्रेषु त्रिरात्रादि-ब्रह्मचर्यं चोपपद्यते । तत् कथं ब्रह्मचर्य एव नियमः[6] स्यात् । न व्यवाय इत्येतदिदं सूत्रमारभ्यते । अथवा यत्तु समानं तद्वक्ष्याम इत्यारभ्यते । अष्टौ विवाहा विहिताः । सर्वैरेतैः कर्मविशेषैः भवितव्यमिति प्राप्तमेव हि उपपन्ना संख्या भवति[7] । एवं प्राप्ते वक्ष्यमाणं तु[8] कर्म सर्वेषु समानमेव[9]

[1] र looks more like ए in A. After this word there are two letters before सिद्धत्वात्. The second is व्य. The first may be read ब्ध. These letters not wanted. The only possible word in between is कस्मात्. What is written is decidedly not this. What is written is a confusion of अनारभ्य and अनारब्धव्यं.

[2] वि looks more like नि in A.

[3] A. व्रवीति.

[4] A. कि पुन:

[5] A. लोकेषु.

[6] A. L. एव repeated unnecessarily after नियमः

[7] L. भवन्ति.

[8] A. L. वक्ष्यमाणां.

[9] L. समानमेवं.

भवति । अथ संख्या किमर्था । दानोपायमात्रे संग्रहानुग्रहो द्रष्टव्यः । फलं[1] चैतद्वा प्रयोजनम्[2] ॥

किमर्थमिदम् । यथा अन्यान्युपदेशादेव सर्वत्र भवन्ति पार्वणादीनि तथेदमपि स्यात् । नियमार्थम् । तर्हि जनपदादिधर्माणां वक्ष्यमाणधर्माणां च विरोधे सति वक्ष्यमाणमेव धर्मं कुर्यात् । जनपदादिधर्ममिति यद्वक्ष्यामस्तत् सर्वत्र समानमेवेत्यर्थः । वैदेहेषु सद्य एव व्यवायो दृष्टः । गृह्ये तु ब्रह्मचारिणौ त्रिरात्रं इति ब्रह्मचर्यं विहितम् । तत्र गृह्योक्तमेव कुर्यात् न देशधर्ममिति सिद्धम् ॥ (२)

पश्चादग्नेर्दृषदमश्मानं प्रतिष्ठाप्योत्तरपुरस्तादुदकुम्भं समन्वारब्धायां हुत्वा तिष्ठन् प्रत्यङ्मुखः प्राङ्मुख्या आसीनाया गृह्णामि ते सौभगत्वाय हस्तं इत्यङ्गुष्ठमेव गृह्णीयाद्यदि कामयीत पुमांस एव मे पुत्रा जायेरन्निति ॥

अग्नेः[3] पश्चात् दृषदमश्मानं प्रतिष्ठापयति । तत्राश्मग्रहणेन[4] कस्य ग्रहणं भवति । अश्मग्रहणेन[5] उभयोरपि प्रतिष्ठापनं[6] कर्तव्यम् । एवमेके । अन्ये पुनरश्मग्रहणमश्ममयीं दृषदमिति ब्रुवन्ति[7] । अस्मिन् पक्षे दृषद एव प्रतिष्ठापनं कर्तव्यं[8] प्राप्नोति । दृषत्पुत्रकस्यापि[9] तत्र प्रतिष्ठापनं भवति

[1] A. फल.

[2] After this L has लक्ष्मीनारायणार्पणमस्तु.

[3] Before this A. has पश्चादग्नेर्दृषदमश्मानं प्रतिष्ठाय पुत्रा जायेरन्निति. L. does not give even the pratika.

[4] A. तत्राश्मग्रहणोन.

[5] After this A. has the word पुत्रस्व ; L. पुत्रस्य. Perhaps to read दृषदः पुत्रकस्य here.

[6] A. प्रतिष्ठापमं. In ति the mark above the line missing.

[7] A. ब्रवीति.

[8] A. कर्तव्य.

[9] A. दृषत्पुत्रकास्यापि.

मङ्गलार्थत्वात्[1] । यद्युभयोरपि कार्यो दृषत्पुत्रस्य प्रतिष्ठापनचिन्तायाः[2] किं प्रयोजनम् । यद्यश्मग्रहणेन दृषत्पुत्रो गृह्यते तत्र परिणीयाश्मानमारोहयतीति[3] दृषत्पुत्रेऽप्यारोहणं कर्तव्यम् । अथाश्ममयीं[4] दृषदमिति ये वर्णयन्ति तेषां दृषद्येवारोहणं[5] भवति । एतस्मिन् पक्षे अश्मग्रहणमपार्थकम् । कस्मात् । येन नाश्ममय्येव दृषद्भवतीति । नेत्युच्यते । अनश्ममय्यपि[6] विद्यते[7] । तन्निवृत्त्यर्थं विशेषग्रहणं क्रियते । आगमस्त्वयमेव[8] । उत्तरपुरस्तात् उदकुम्भं प्रतिष्ठाप्याग्नेः समन्वारब्धायाम्[9] । समन्वारब्धवत्यामित्यर्थः[10] । हुत्वा तिष्ठन् प्रत्यङ्मुखः[11] । तिष्ठद्ग्रहणं कुर्वन् ज्ञापयति आसीनेन होमः क्रियत इति । प्रत्यङ्मुखवचनं प्राङ्मुखतानिवृत्त्यर्थम्[12] । प्राङ्मुख्या आसीनायाः । प्राङ्मुख्या इति प्राङ्मुखीयवचनं नियमार्थम् । तस्य नित्या इति कर्तृविहितत्वात् प्रत्यङ्मुखीत्वनिवृत्त्यर्थम्[13] । आसीनाया इति कस्मात्[14] । कथमित उत्तरं कर्म तिष्ठन्त्याः स्यात्[15] । तत्राङ्गुष्ठग्रहणं[16] हस्तोपलक्षणार्थम् ।

[1] After this A has ब्रवीति extra.
[2] L. प्रतिष्ठापनं चितायाः
[3] A. परिणीयाश्मारोहयतीति.
[4] A. अथाश्ममयी.
[5] A. दृषद्व्येवारोहणं.
[6] L. अनश्ममय्यापि.
[7] A. विद्यत.
[8] After this word there is in A a letter which looks like ए.
[9] A. समान्वाब्धायी.
[10] A. समन्वारंभभवत्यामित्यर्थः. L. समन्वारम्भभंवत्यमित्यर्थः
[11] L. तिष्ठन्निति and omits प्रत्यङ्मुखः
[12] A. L., प्राक्चेष्टतानिवृत्यर्थम्.
[13] A. प्रत्यङ्मुखीनिवृत्यर्थ्रा. L. प्रत्यङ्मुखीनिवृत्यर्थम्.
[14] A. कस्मोत्.
[15] After this L. has लक्ष्मीनारायणार्पणमस्तु. A. has गृभ्णीमिते ह्वीयादिति किं वाक्यशेषः
[16] A. तत्रीगुष्ठग्रहणं.

अङ्गुष्ठे हस्तं गृह्णीयात् अनेन कामेन । यदि कामयेत पुमांस एव मे पुत्रा जायेरन्निति[1] । अत्र तु[2] पुमांसग्रहणं अपार्थकं[3] पुत्रशब्देनैव सिद्धत्वात् । नेत्युच्यते । पुत्रशब्दोऽयमुभयत्र दृष्टः । पुंसि स्त्रियां च । लोके वक्तारो भवन्ति । एहि पुत्रेति दुहितरम्[4] । यथा च मेधातिथिनोक्तं[5] दुहितरमङ्क उपविश्य पुत्र कस्ते जामातेति[6] । तेनैवं दृष्टत्वात् विशेषणमुपपद्यते । तस्मात् विशेषेण ग्रहणं[7] क्रियते । पुमांसः पुत्रा इति ॥

अग्निप्रतिष्ठापनोत्तरकालं पश्चादग्नेर्दृषदमश्मानं प्रतिष्ठाप्य उत्तरपूर्वदेशे उदकुम्भं प्रतिष्ठापयेत् । तत आज्यस्य बर्हिषि सादनान्तं कृत्वा समन्वारब्धायां वध्वां इध्माभ्याधानान्तं कृत्वा ततः पूर्वोक्ता आज्याहुतीर्हुत्वा तिष्ठन् प्रत्यङ्मुखः प्राङ्मुख्या आसीनाया अङ्गुष्ठमेव गृह्णीयात् गृह्णामीत्युक्त्वा पुत्रकामश्चेत् । मन्त्रस्तूत्तरयोरपि हस्तग्रहणयोर्भवत्येवायम् । दृषत् प्रसिद्धा । अश्मा तत्पुत्रकः । तत्रोभयोः प्रतिष्ठापनं सिद्धम् । एवं चेत् दोषः । अश्मानमारोहयति इत्यत्र पुत्रकारोहणं स्यात् । तर्हि अश्मग्रहणं तस्य विशेषणं स्यात् दृषदमश्मानमिति । अश्ममयीमित्यर्थः । मृन्मय्यपि हि लोके दृषद्विद्यते । तर्हि पुत्रकप्रतिष्ठापनं न स्यात् । न । स्यादेव मङ्गलार्थत्वात् । दक्षिणतः पत्न्युपविशेत् । उत्तरतः पतिः इति शास्त्रान्तरे दृष्टम् । स्रुवेण होमः साधनान्तरानुपदेशात् । एवम्भूतो व्यक्तहोमेत्यनेनैवावस्थाने लिङ्गे तिष्ठन् समिधमादध्यात् इत्यत्र तिष्ठद्ग्रहणं कथम् । अन्यत्रासीनस्य कर्माणि स्युरित्येवमर्थम् । ततोऽत्रासीनप्राप्तौ तन्निवृत्त्यर्थं तिष्ठद्ग्रहणम् । प्रत्यङ्मुख इति प्राङ्मुखत्वनिवृत्त्यर्थम् । तस्य नित्याः प्राञ्चश्चेष्टाः इत्यनेन

[1] A. has only यदिकामयेत पुमांसरन्निति.

[2] L. omits तु.

[3] A. अनर्थकं.

[4] A. दुहितर. In हि the mark above the line missing.

[5] A. मधातिथितोक्तं.

[6] A. L. जातेति.

[7] A. विशेषग्रहणं.

प्राङ्मुखत्वे सिद्धे प्राङ्मुख्या आसीनाया इति वचनं प्रत्यङ्मुखाधिकारनिवृत्यर्थम्। आसीनाया इत्येतत् कथम्। इत उत्तरं वध्वा विहितं कर्म तिष्ठन्त्या स्यादित्येवमर्थम्। उत्तानेनोत्तानं पाणिं गृह्णीयात् नीचेन चोत्तानं इति शाखान्तरे दृष्टम्। पुत्रशब्दः पुंसि स्त्रियाञ्च स्मृतौ दृष्टः।

अकृता वा कृता वापि यं विन्देत् सदृशात् सुतम्।
पौत्री मातामहस्तेन दद्यात् पिण्डं हरेद्धनम्॥

इति। दौहित्रेण मातामहः पौत्री भवति इत्यर्थः। लोके च दुहितरि पुत्रशब्दं प्रयुञ्जाना दृश्यन्ते एहि पुत्र इति। मन्त्रे च दृश्यते पुमांस्ते पुत्रो जायतां इति। तस्मात् पुमांसः पुत्रा इति विशेषणम्। अथवा

पुन्नाम्नो नरकाद्यस्मात् पितरं त्रायते सुतः।
तस्मात् पुत्र इति प्रोक्तः पूर्वमेव स्वयम्भुवा॥

इति। एवंविधः स पुत्रो जायेत न प्रथमप्रकृतिमात्रं इत्येवमर्थमुभयोर्ग्रहणम्॥ (३)

अङ्गुलीरेव स्त्रीकामः॥

अत्रापि[1] अंगुलीषु हस्तं गृह्णाति[2] स्त्रीकामश्चेत्। हस्तग्रहणेन प्रज्ञाप्यमाने मन्त्रस्याधिकारो भवतीति[3] प्रज्ञापितं भवति॥

एवकारोऽङ्गुष्ठनिवृत्यर्थः। स्त्रीकामो दुहितृकाम इत्यर्थः॥ (४)

रोमान्ते हस्तं साङ्गुष्ठमुभयकामः॥

पुत्रकामः[4] स्त्रीकामश्च द्वे[5]॥

[1] Before this A. has अंगगुलीरेव स्त्रीकामः. L. has अङ्गुलीरेवेति.
[2] A. गृह्णीति.
[3] A. L. भवति.
[4] Before this A. has रौमी ते हस्तं कामः L. has रोमान्त इति. A. reads पुत्रकामा.
[5] L. स्त्रीकामश्चेति द्वे.

उभयकामः पुत्रदुहितृकामः अङ्गुष्ठाङ्गुलीभिः सह हस्तं गृह्णीयात्॥ (५)

प्रदक्षिणमग्निमुदकुम्भं च त्रिः परिणयन् जपति—अमोहमस्मि सा त्वं सा त्वमस्यमोहं द्यौरहं पृथिवी त्वं सामाहमृक् त्वं तावेह विवहावहै प्रजां प्रजनयावहै संप्रियौ रोचिष्णू सुमनस्यमानौ जीवेव शरदः शतं इति ॥

अमोहमस्मीत्येतं मन्त्रम्[1] । उदकुम्भग्रहणं[2] शक्यमकर्तुं यज्ञपात्रत्वात्[3] । अक्रियमाणे हि दोष उपपद्यते । अन्येषां यज्ञपात्राणां बहिःकरणं प्राप्नोति[4] । तत्रैके एवमिच्छन्ति । अन्येषां त्विदं प्रयोजनम् । कथम् । विवाहं प्रति यद्विशिष्टमात्रं तस्य बहिःकरणं[5] यथा स्यादिति । किं पुनस्तत् । दृषत्[6] । त्रिः परिणयन् नयतीति विचारयिष्यामः । किं त्रिर्जपति । परिणयन्निति । आहोस्वित्[7] परिणयन् जपतीति । किञ्चातः । यदेताः त्रिर्जपति परिणयन्नित्येवं करोति त्रिर्जपः[8] सकृत परिणयनं[9] प्राप्नोति । अथ चेत्[10] परिणयन् त्रिर्जपतीति । एवं त्रिः परिणयनम्[11] । एवमपि सकृन्मन्त्रः प्राप्नोति । उभयथा च दोषः । एवं तर्हि कथमस्तु त्रिः

[1] A. has प्रदक्षिणमोह etc. The reading should be प्रदक्षिणमिति । अमोह etc. L. omits the whole of it and has instead प्रदक्षिणमग्निमिति.
[2] Before this, L. has प्रदक्षिणमग्निमिति. A. reads उदकुभग्रहणम्.
[3] A. यज्ञापात्रत्वात्.
[4] A. प्राप्नोतिः
[5] A. and L. विवाहे प्रतिपद्विशिष्टमात्रान्तस्य हविः करणं.
[6] A. L., दृषदं.
[7] L. अहोस्वित्.
[8] L. त्रिजपः
[9] A., L. परिणयं.
[10] L. omits अथ चेत्.
[11] A. परिणयन.

परिणयनं[1] त्रिश्च जपः । कथमेतत् गम्यते । अनेकं तावत् परिणयनं दर्शयति । परिणीय परिणीय[2] इति । यावच्च परिणयनं तावत् जपतीति सिद्धं भवतीति[3] । तस्मात् त्रिश्च परिणयति त्रिश्च जपतीत्येतत् सिद्धम् । कथम् । परिणयनाङ्गत्वाज्जपस्य । तेनात्रापि[4] यावत् प्रदक्षिणं तावज्जपति ॥

अग्निमुदकुम्भं त्रिः प्रदक्षिणं वधूः स्त्रीः परिणयन् जपति—अमोहमस्मीति । उदकुम्भग्रहणमन्येषां यज्ञपात्राणां बहिःकरणार्थमित्येके । अन्ये तु विवाहे यदन्यद्दृष्टं पात्रं अश्मा तस्यैव बहिःकरणार्थमिति । त्रिर्ग्रहणं परिणयनेन सम्बध्यते उत जपेन । यदि पूर्वेण तर्हि सकृज्जपः स्यात् । अथ जपेन तर्हि सकृत् परिणीतिः । पूर्वेणेति ब्रूमः । कुतः परिणीय परिणीयेति तस्य बहुत्वं दर्शितम् । जपश्च परिणयाङ्गमिति कृत्वा यावत् परिणयनमावर्तते ॥ (६)

परिणीय परिणीयाश्मानमारोहयति ।

इममश्मानमारोहाश्मेव त्वं स्थिरा भव ।
सहस्व पृतनायतोऽभितिष्ठ पृतन्यतः ॥

इति ॥

परिणीयेत्येतेन[5] मन्त्रेण यत्रावरोहणं[6] भवति । तदुक्तं प्राक् । वीप्साग्रहणं यावत् परिणयनं तावत् यथा स्यादिति ॥

[1] A. परिणय L. परिणयं.
[2] L. only one परिणीय.
[3] D. भवति.
[4] A. नात्रापि. L. मात्रापि.
[5] A. परिणीणरोहेत्येतेन. There is no pratika here.
[6] A. यत्रावरोहणी.

वीप्सावचनं सर्वपरिणयनेष्वश्मानमारोहणं कारयितव्यमित्येतदर्थम्। अथास्य कर्मणः कः कर्ता। आचार्यः। कुतः। वक्ष्यति। 'शिरसी उदकुम्भेनावसिच्य' इति। स्वयंकर्तृत्वे सति अवसेचनं कर्तुं न शक्यते। तदसत्। वर एव कर्ता। आचार्येण ह्ययं विसृष्टो विवाहं करोति। उदकुम्भग्रहणन्तु तत्रस्थमुदकुम्भं लक्षयति॥ (७)

वध्वञ्जलावुपस्तीर्य भ्राता भ्रातृस्थानो वा द्विर्लाजानावपति॥

वध्वा[1] अञ्जलिः वध्वञ्जलिः[2]। वध्वञ्जलिः इत्येवं प्राप्ते वध्वोऽञ्जलाविति[3] पठ्यते। तत्रायमपपाठो[4] द्रष्टव्यः। छान्दसो वा निर्देशः[5]। वध्वः अञ्जलाविति[6] वा अलुक्समासेन[7] वा पाठो द्रष्टव्यः। उपस्तीर्याभिघार्येत्यर्थः। भ्राता[8] भ्रातृस्थानः। मातुलपुत्रः पितृव्यपुत्रो वा भ्रातृस्थान[9] उच्यते। भ्रातुरभावे भ्रातृस्थानो[10] भवति।

ततो बध्वञ्जलौ उपस्तीर्य वध्वा भ्रात्रादिर्द्विर्लाजानावपति। वरो जामदग्न्यश्चेत्रिः। ततः शेषं प्रत्यभिघार्य अवदानं च प्रत्यभिघारयति। एवमवदायावदाय त्रिभिर्मन्त्रैर्जुहोति। भ्रातृस्थानः पितृव्यपुत्रो मातुलपुत्रश्च॥ (८)

[1] Before this A. has वध्वाञ्जलावुपस्तीर्य भ्राता। अविच्छिन्दत्यंजलीं स्रुचेव जुहुयात्. L. has वध्वञ्जलाविति.

[2] L. वध्वाञ्जलिः

[3] A. वध्वोजलाविति.

[4] A. has an avagraha S mark between म and प.

[5] L. निदेशः

[6] L. वध्वा जलाविति.

[7] A. अलुक्समासेम.

[8] L. भ्रातेति.

[9] L. भ्रातृस्थाने.

[10] L. भ्रातुःस्थानो.

त्रिर्जामदग्नानाम् ॥

यदि जामदग्न्यो वरो भवति तदा त्रिः लाजानावपति ॥

पञ्चावत्तिनामित्यर्थः ॥ (९)

प्रत्यभिघार्यं हविः ॥

तत्र हविश्शब्दं केचिदवदाने कल्पयन्ति । केचित् शेषे कल्पयन्ति । तत्र शेषे उपपद्यते नावदाने । कुतः । दर्शनात् । किं पुनस्तद्दर्शयति[1] । स्विष्टकृदिति वक्ष्यति । नात्र हवींषि प्रत्यभिघारयति[2] । तत्र हविश्शब्दो वर्तते । तेन[3] शेषस्य प्रथममभिघारणं भवति । पश्चादवदानस्य ॥

हविःशब्दः शेषे वर्तते । यथा नात्र हवींषीति ॥ (१०)

अवत्तश्च ॥

प्रत्यभिघार्यं । अवत्तमवदानमित्युच्यते[4] ॥

अवदानमित्यर्थः ॥ (११)

एषोऽवदानधर्मः ॥

[1] A. and L. have after this तमिति extra.

[2] A. प्रत्याभिघारयति.

[3] L. only न instead of तेन.

[4] L. has after this श्रीलक्ष्मीनारायणार्पणमस्तु.

तत्र अवदानधर्ममुपजीवन् आचार्य इमां परिभाषामतिसृष्टवान् एषोऽवदानधर्म इति। अवदानेन[1] कथमयं धर्मः स्यादिति। कुतः। यथा मध्यात् पूर्वार्धाच्च हविषोऽवद्यति। अवदानसंपदा जुहुयादिति च। अथाभिघारणप्रत्यभिघारणे कः करोति। भ्राता करोति। कस्मात्। अधिकृतत्वात्। समानकर्तृवचननिर्देशात्। नेत्युच्यते। यदि हि[2] भ्राता कर्ता स्यात् भ्रातरमधिकृत्य[3] उपस्तरणं चोदयेत्[4]। यस्मादुत्तरकाले[5] भ्राता चोद्यते तस्मादुपस्तरणस्य भ्राता न भवति कर्ता[6]। एवं तर्हि आचार्यः कर्ता। असावपि नोपपद्यते कर्ता[7]। कस्मात्। आचार्येणासौ[8] विसर्जितः। एवं तर्हि वर एव कर्तास्तु। वरस्यापि कर्तृत्वं नोपपद्यते[9]। यस्मादुपरिष्टादन्यं कर्तारं दर्शयति उदकुम्भेनावसिच्येति। स्वयंकर्तृकत्वे[10] सति अवसेचनं न शक्यते[11] कर्तुम्। नेत्युच्यते[12]। तत्रोदकुम्भशब्दः कुम्भस्थे उदके वर्तते। तेन तत्रस्थेनोदकेनावसेचनं कर्तव्यम्[13]। तस्मात् वर एव कर्ता भवतीत्येतत् सिद्धम्॥

[1] L. अवदानेनोऽथ.
[2] A. यदि ह. L. यदि तु.
[3] L. भ्रातरसमधिकृत्य.
[4] L. चोदये.
[5] L. यस्मादुत्तरकाळं.
[6] L. कः extra between भवति and कर्ता.
[7] A. कर्त.
[8] A. आचार्येणास्मैः
[9] A. नोपपद्येते.
[10] A. स्वयंकर्तृत्वे.
[11] A. शस्यते.
[12] A. नित्युच्यते.
[13] A. तत्रस्थोदकेनावस्यचनं तंव्यं.

यत्र यत्रावदानमस्ति तत्र तत्रैष धर्मो भवतीत्यर्थः। मध्यात् पूर्वार्धाच्च हविषोऽवद्यतीत्यादौ। उपस्तरणाभिघारणे कः करोति। भ्राता। कुतः। समानकर्तृत्वनिर्देशात्। तदयुक्तम्। यदि ह्यत्र भ्राताऽभिप्रेतः स्यात् वध्वञ्जलौ भ्रातोपस्तीर्येत्येवावक्ष्यत्। तस्माद्वर एव करोति। यत्तूक्तं समानकर्तृत्वनिर्देशादिति तत्र ब्रूमः। असमानकर्तृकत्वेऽपि हि क्त्वाप्रत्ययो दृश्यते। यथा 'आज्याहुतिं हुत्वा मुख्यं धनं दद्यात्' इति होमे ब्रह्मा कर्ता। दाने यजमानः। इत्यादिषु पूर्वकालतामात्रमेव विवक्षितम्। तद्वदत्रापि ॥ (१२)

अर्यमणं नु देवं कन्या अग्निमयक्षत स इमां देवो अर्यमा प्रेतो मुञ्चातु नामुतः स्वाहा। वरुणं नु देवं कन्या अग्निमयक्षत स इमां देवो वरुणः प्रेतो मुञ्चातु नामुतः स्वाहा। पूषणं नु देवं कन्या अग्निमयक्षत स इमां देवः पूषा प्रेतो मुञ्चातु नामुतः स्वाहेत्यविच्छिन्दत्यञ्जलिं स्रुचेव जुहुयात् ॥

अर्यमणं[1] नु देवमित्येतैर्मन्त्रैः लाजान् जुहोति। कथं जुहोति[2]। अविच्छिन्दत्यञ्जलिं[3] स्रुचेव जुहुयात्[4]। अथ को जुहोति। वधूः। कथं[5] गम्यते। अविच्छिन्दतीति निर्देशात्। अथ मन्त्राः कस्य भवन्ति। तत्रैके वध्वा एवेच्छन्ति[6]। कस्मात्। सा जुहोति। मन्त्रलिङ्गदर्शनाच्च कन्या अग्निमयक्षतेति। नेत्युच्यते। वध्वा मन्त्रा न भवन्ति। कुतः। अनधिकारात्। न स्त्री मन्त्रैरधिक्रियते[7]। अधिक्रियते इति ब्रूमः। कथम्।

[1] There is no pratika here in A. or L.

[2] A. जुहाति.

[3] A. अविच्छिदत्यञ्जलि.

[4] L. जुहुयादिति.

[5] A. अथ.

[6] A. एवेच्छसि.

[7] L. स्त्रीरधिक्रियते. A. स्त्रीरधिक्रियति.

यथा पत्नीवाचनादिषु तत्र वचनात् । इह तु सन्दिग्धत्वात् वरस्यैव मन्त्रा भवन्ति प्राधान्यात् । यच्चोक्तं लिङ्गदर्शनादिति तत् स्वलिङ्गं नोपपद्यते । नासौ कन्यामभिदधाति । अन्याः कन्या अभिधीयन्ते । तेन वरस्यैते मन्त्रा भवन्तीति । लिङ्गदर्शनाच्च पश्यामो यथा वरस्यैते मन्त्रा भवन्तीति । किं तर्हि दर्शनम् । एतन्मन्त्रनिर्देशः । स इमां देवो वरुण इति । यदि वध्वा मन्त्रा भवन्तीति स इमां देव इति लिङ्गदर्शनं नोपपद्यते । तस्मात् वरस्यैते मन्त्रा भवन्तीत्येतत् सिद्धम् ॥

को जुहोति । वधूः । कुतः । अविच्छिन्दत्यञ्जलिमिति स्त्रीलिङ्गनिर्देशात् । कस्यैते मन्त्राः । वध्वाः । कुतः । सा हि जुहोति । मन्त्रलिङ्गात् कन्या अग्निमयक्षतेति । तदसत् । न हि स्त्रीणां मन्त्रेष्वधिकारोऽस्ति । ननु कथं पत्नीवाचने । तत्र वचनमस्ति । अत्र तु सन्दिग्धम् । तस्मात् वरस्य मन्त्राः । मन्त्रलिङ्गाच्च । स इमां देव इति हि परोक्षनिर्देशः । यदि हि वध्वाः स्युः स इमां देव इति न स्यात् । यत्तूक्तं सा हि जुहोतीति तत्र ब्रूमः । अन्यस्यापि मन्त्रो दृश्यते । अध्वर्युर्जुहोति । होता वषट्करोति । यत्तूक्तं मन्त्रलिङ्गादिति तत्र ब्रूमः । न ह्यत्रेयं कन्याभिधीयते । अन्या एव तु कन्याः । यदीयमभिधीयते बहुवचनं नोपपद्यते । तथाभूतश्च प्रत्ययः । तस्मात् वरस्येति सिद्धम् ॥ (१३)

अपरिणीय शूर्पपुटेनाभ्यात्मं तूष्णीं चतुर्थम् ॥

चोदितक्रयः प्राप्तः[1] । चोदनासामर्थ्यात् । अश्मारोहणस्य व्यवधानोपदेशात्[2] । तस्मादव्यवहितानां प्रयोगः प्राप्तः । तेन व्यवधानप्रयोगदर्शनार्थं अयमेव परिणयनग्रहणं कल्पयन्ति । तूष्णीं परिणीय भवन्ति । एतत् सिद्धं भवति । एवमपरिणीयग्रहणं कल्पयन्ति । तूष्णीं ग्रहणं तूष्णीं होमधर्म-

[1] A. शप्त: instead of प्राप्त:

[2] A., L. व्यवधान उपदेशात्.

प्राप्त्यर्थम् । चतुर्थग्रहणं परिसंख्यानार्थम् । शेषात् स्विष्टकृत् इति स्विष्टकृन्निवृत्त्यर्थं चतुर्थग्रहणम् । एवमपरे कल्पयन्ति । अस्यार्थं एवं वर्णयतां[1] त्रीण्येव परिणयनानि भवन्ति । त्रिः परिणयं जपतीति चोदनासामर्थ्यात् । अयमेव चागमः । एवमनेकार्थविचारणायामुत्तम आगमपक्षो वेदितव्यः[2] ॥

अप्राप्तनिषेधः किमर्थः । चतुर्थहोमं कृत्वा कथममन्त्रकं परिणयनं स्यादित्येवमर्थमित्येके । अन्ये तु त्रीणि परिणयनान्यानन्तर्येणोक्तानि । तत्र त्रयो होमाः । तत्र पूर्वं पूर्वं परिणयनं कृत्वा पश्चात् होमः स्यादिति ज्ञापयितुमिति । शूर्पपुटः कोणः । तूष्णींवचनं प्रजापतिज्ञापनार्थम् । चतुर्थग्रहणं कथम् । एतस्य द्रव्यस्य स्विष्टकृतं न स्यात् । स एव च कर्ता यथा स्यादिति । तेन वधूर्जुहोति ॥ (१४)

ओप्योप्य हैके लाजान् परिणयन्ति तथोत्तमे आहुती न सन्निपततः ॥

एके आचार्या ओप्योप्य लाजान् परिणयनमिच्छन्ति । हकारोऽभिमतपक्षज्ञापनार्थः । अयमस्याभिमतः पक्ष आचार्यस्य । द्वितीयोपदेशात् दुर्बलत्वं मा भूत् । तुल्यबलत्वे विकल्पः सिद्धो भवति । तथोत्तमे आहुती न संनिपततः[3] । तथा सति क्रियायामुत्तमयोराहुत्योः सन्निपातो न भवति ।

[1] A. एवं तु वर्णयतां.

[2] Here L. has श्रीलक्ष्मीनारायणाय नमः ।

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

[3] Devasvāmin and Haradatta takes this part as a separate sūtra and all MSS. read so. But since the sūtra numbering follows the Bibliotheca Indica Edition, the entire sūtra is printed as one.

यद्येवं वचनमपार्थकम् । नैवोत्तमयोराहुत्योः सन्निपातोऽस्ति । तच्चैके[1] प्रशंसायां इमां मन्यन्ते । यस्मादुत्तमयोराहुत्योः सन्निपातो न भवति तस्मादयं पक्षः कर्तव्य इति । अन्ये पुनर्निन्दां मन्यन्ते । तेन नायं पक्षः कर्तव्य इति । तदिदमुभयं नोपपद्यते[2] । किमर्थं तर्हीदमारभ्यते । तथा कर्तव्यं परिणयनं यथोत्तमयोराहुत्योः सन्निपातो न भवति । कथं वा प्राप्नोति[3] । इह प्रागुक्तं अपरिणीयेति । तदन्यार्थम् । कृतं सत्[4] इह दोषमुत्पादयति । तत्[5] को दोषः । परिणयनमकृत्वा चतुर्थो होमः कर्तव्यः ॥

अभिमतार्थज्ञापनार्थो हशब्दः । एके लाजानोप्योप्य पश्चात्परिणयन्ति । किमिति । तथा सत्युत्तमे आहुती न संनिपतत इति कृत्वा । पूर्वस्मिंस्तु पक्षे उत्तमे आहुती संनिपततः । कोऽयं संनिपातो नाम । यदि पूर्वाहुतिशिरसि प्रक्षेपः । न तर्हि कश्चिदप्यसाविष्यते । किं पुनः पूर्वस्मिन्पक्षे । अथानन्तरम् । न तर्ह्यसौ दोषः । पार्वणादौ दृष्टत्वात् । तस्मादयमर्थः । यथोत्तमे आहुती न संनिपततस्तथा कर्तव्यम् । उत्तमयोराहुत्योर्मध्ये परिणयनं कर्तव्यमित्यर्थः । कथं वा न स्यात् । अपरिणीय शूर्पपुटेनाभ्यात्ममिति । अन्यार्थं कृतमपीह मध्ये परिणयनं निवर्तयेत् । अथवा पूर्वस्मिन्पक्षे उतमे संनिपततः । अत्र तु न संनिपतत इति वदन्नपरिणीयवचनं चतुर्थपरिणयनार्थमित्यस्मिन्नपि पक्षे पूर्वं परिणयनं कृत्वा पश्चाद्धोमो न चानन्तर्येण होम इति ज्ञापयति । यदि त्वानन्तर्येण होमः स्यात्सर्वासामेव संनिपातादुत्तमयोराहुत्योः पूर्वस्मिन्पक्षे संनिपात इति नोपपद्यते ॥ (१९)

अथास्यै शिखे विमुञ्चति यदि कृते भवतः ॥

[1] L. तत्रैके.

[2] A. नत्विदमुतयत्रौपपद्यते. L. ननु इदमुभयं नोपपद्यते.

[3] A. कथं वा न प्राप्नोति.

[4] A. तदल्पार्थं कृतं सन्. L. तद्द्रव्यार्थं कृतं सन्त.

[5] L. omits तत्. A has only त् instead of तत्

अथशब्दः अनन्तरार्थः[1] । एतस्मिन्नन्तराले स्विष्टकृन्मा भूदिति । अस्यै इति किमर्थम् । अथ शिखे विमुञ्चतीत्येवमुच्यमाने उभयोः शिखाविमोकः स्यादिति स माभूदिति अस्यै इत्युच्यते[2] । यदि कृते भवतः । यदि जनपदधर्मत्वेन[3] वा[4] ग्रामधर्मत्वेन वा[4] कुलधर्मत्वेन वा कृते भवतः । अथ विमोको भवति ॥

कीदृशे पुनः शिखे ॥

अथशब्द इदानीं स्विष्टकृन्निवृत्यर्थः । अस्यै इति वरस्य निवृत्यर्थः । यदीत्यनित्ये । देशधर्मादिना यदि कृते भवतः ॥ (१६)

के कृते भवत इत्याह ॥

ऊर्णास्तुके केशपक्षयोर्बद्धे भवतः प्र त्वा मुञ्चामि वरुणस्य पाशात् इति ॥

तयोर्विमोको भवति । प्र त्वा मुञ्चामीत्येताभ्यां ऋग्भ्यां दक्षिणे पूर्वया ॥

प्र त्वा मुञ्चामीति दक्षिणां शिखां विमुञ्चति ॥ (१७)

उत्तरामुत्तरया ॥

उत्तरे पक्षे उत्तरया ॥

प्रेतो मुञ्चामि इत्युत्तरां शिखां विमुञ्चति । वरस्य तु शिखे तूष्णीं विमुञ्चति ॥ (१८)

[1] A. अनन्तरायामर्थः

[2] A., L. इत्युच्यमाने.

[3] A. जवयदधर्मत्वेन.

[4] L. omits वा in both cases.

अथैनामपराजितायां दिशि सप्तपदान्यभ्युत्क्रामयति इषे एकपदी ऊर्जे द्विपदी रायस्पोषाय त्रिपदी मायोभव्याय चतुष्पदी प्रजाभ्यः पञ्चपदी ऋतुभ्यः षट्पदी सखा सप्तपदी भव सा मामनुव्रता भव पुत्रान्विन्दावहै बहूंस्ते सन्तु जरदष्टय इति ॥

अथैनामपराजितायां[1] दिशि सप्त पदान्यभ्युत्क्रामयति । इष एकपदीत्येतैर्मन्त्रैः । अथशब्दः पूर्वेण व्याख्यातः । अथात्र संशयः । किमेतावानेवायं[2] मन्त्रः । आहोस्वित् अन्योऽप्यस्ति[3] इति । कुतः पुनः संशयः । साकाङ्क्षत्वात्[4] । इष एकपदीति साकाङ्क्षोऽयं[5] मन्त्रः । एतावत्तावद्भवितव्यम्[6] । कस्मात् । अशेषानुपदेशात् । नेत्युच्यते । य[7] उपदिष्टः शेषः उत्तमेन मन्त्रेण स इहानुपपद्यते । तत्रोपदिष्टः[8] कथमिहानुकृष्यते । उच्यते । यथाग्निहोत्रे प्राश्नामीति पुरस्तादुक्तं उपरिष्टात् भवति[9] तेन यथा[10] तत्रानुकर्षो[11] भवति एवमिहापि अनुकर्षो[12] भविष्यति । तदेतन्नोपपद्यते । पुरस्तादुक्तं उपरिष्टाद्भवति[13] । उपरिष्टात्

[1] A. अथैनामशपजितायां.
[2] L. किमेतावानवायं.
[3] L. अहोस्विदन्त्योऽप्यस्ति. A. आहोस्विदत्योऽप्यस्ति.
[4] L. साकंक्षत्वात्.
[5] A. साकांक्षो मन्त्रः
[6] A. एतावताद्भवितव्यम्.
[7] य omitted in L.
[8] ष्टः not at all clear in A. Looks more like पः
[9] A. भयति.
[10] A. पथ.
[11] L. तथानुत्कर्षो. A. तत्रानुत्कर्षो.
[12] A. L. अनुत्कर्षो.
[13] A. उपरिष्टाद्भावति.

विधीयमानः[1] पुरस्तान्न भवति । नेत्युच्यते । शास्त्रान्तरेऽप्युपरिष्टादप्याम्नातः पुरस्तात् भवति । यथा घृताचीनाम्ना[2] प्रियेण[3] प्रिये सदसि सीदेति यथोपरिष्टान्मन्त्रो दृष्टः । जुह्वादिषु च प्राणाय त्वेत्येवमादिषु उल्लिखामीति उपरिष्टादाम्नातः पुरस्ताद्भवति । एवमिहापि । नेत्युच्यते । इह याजुषाणां मन्त्राणां[4] अनुकर्षो[5] भवति । समासः ऋचः संपद्यते[6] । सप्तपदी भवेति सामादिना[7] मन्त्रेणानुकृष्यमाणेन ऋचामनुकर्षः कृतो भवति । नेत्युच्यते । तस्मिन् सन्दिग्धे ऐतरेयिणां वचनमारब्धम् । भवादिषु सर्वत्र समानम्[8] । तेनेहाप्यनुषङ्ग एवाध्यवसीयते । तेनास्माकमप्यनुकर्षो भवति[9] ॥

अथशब्दः पूर्वेण तुल्यः । एनां वधूम् । अपराजिता प्रागुदीची । तत्र सप्तपदान्यभ्युत्क्रामयति वधूं सप्तभिर्मन्त्रैः । वाक्यस्य साकाङ्क्षत्वात् भवादेश्च योग्यत्वात् सन्निहितत्वाच्च प्रत्येकं सम्बध्यते । यथा रहस्ये उल्लिखामीति शब्दः 'प्राणाय त्वापानाय त्वा व्यानाय त्वोल्लिखामि' इत्यन्त्ये वाक्ये पठितोऽपि पूर्वत्रापि सम्बध्यते तद्वदत्रापि । ऐतरेयिभिरप्युक्तं—'भवादिषु सर्वत्र समानम्' इति । तेन इष एकपदी भव । सा मामनुव्रता भव इति सर्वत्र सम्बन्धनीयम् ॥ (१९)

उभयोः सन्निधाय शिरसी उदकुम्भेनावसिच्य ॥

[1] A. विधीययानः
[2] L. घृचीनाम्ना.
[3] A. L. नाम्ना extra after this word.
[4] A. मन्त्रार्णां.
[5] A. अनुत्कषे L. अनुत्कर्षो.
[6] L. संपद्यंते.
[7] L. सामादिनां.
[8] L. समासः
[9] Here L. has श्रीलक्ष्मीनारायणार्पणमस्तु.

उदकुम्भस्थेन उदकेनासेचनं[1] कर्तव्यम् । तत्रावसेचनं कृत्वा एतस्मिन् अन्तराले स्विष्टकृद्भवतीति ॥

सप्तमे पदे अभ्युत्क्रामिते तत्रस्थ एवोभयोः शिरसी सन्निधाय केनचिदुदकुम्भमानाय्य तत्रस्थेनोदकेन शिरसी अवसिञ्चति । अथाज्येन स्विष्टकृतं जुहोति ॥ (२०)

ब्राह्मण्याश्च वृद्धाया जीवपत्न्या जीवप्रजाया अगार एतां रात्रिं वसेत् ॥

ब्राह्मणी[2] या जीवपतिर्भवति[3] जीवप्रजा च या भवति तस्या एवंलक्षणाया ब्राह्मण्या अगारे एतामनन्तरां रात्रिं प्रतिश्रयेत् । तत्र प्रतिश्रयणे सत्ययं विशेषः । किमुक्तं भवति । देशान्तरे यदा विवाहः तदा प्रतिश्रयणविधिरयं भवति । किमर्थं स्त्री विशेष्यते न पुरुष इति । पुरुषस्य बहुभार्यत्वात् तस्य काचिन्मृतप्रजा भविष्यति । तस्या अगारे मा भूदिति अत्र स्त्रीविशेषणं क्रियते ॥

ग्रामान्तरगमने यद्यन्तरा वसतिः स्यात् तदा एवंगुणयुक्तायाः ब्राह्मण्या गृहेऽनन्तरां रात्रिं वसेत् । वसतिं कुर्यादित्यर्थः । स्वग्रामे विवाहश्चेन्नायं विधिः ॥ (२१)

ध्रुवमरुन्धतीं सप्त ऋषीनिति दृष्ट्वा वाचं विसृजेत जीवपत्नीं प्रजां विन्देय इति ॥

[1] A. उदकेनात्सेचनं.

[2] A. ब्राणी.

[3] A. जीवपतिर्भवतिर्भवति.

जीवपत्नीत्यनेन मन्त्रेण वाग्विसर्गविधानात् वाङ्नियमोऽस्ति । कस्य पुनरयं वाग्विसर्गो भवति । उच्यते । वध्वाः । कुतः । मन्त्रलिङ्गात् ॥

समाप्ते होमे रात्रौ ध्रुवादीन् दृष्ट्वा वाचं विसृजेत 'जीवपत्नीम्' इति मन्त्रेण । इदानीं वाग्विसर्जनविधानात् होमादारभ्य एतावन्तं कालं वाचो नियम इति गम्यते । कस्यायं वाग्विसर्गः । वध्वाः । कुतः । मन्त्रलिङ्गात् । तथा हि । जीवः पतिर्यस्याः सा जीवपत्नी । जीव इति कर्तरि पचाद्यच् । 'पत्युर्नो यज्ञसंयोगे' [पा. ४. १. ३३] 'विभाषा सपूर्वस्य' [पा. ४. १. ३४] इति ङीप्प्रत्ययो नश्चान्तादेशः ॥ (२२)

इति सप्तमः खण्डः

प्रयाण उपपद्यमाने पूषा त्वेतो नयतु हस्तगृह्य इति यानमारोहयेत् ॥

प्रयाण उपपद्यमाने इति कस्मात् । पूषा त्वेतो नयतु हस्तगृह्य इति यानमारोहयेदित्येवमुच्यमाने त्वहरहर्यानारोहणं प्राप्नोति । एवमपि उपपद्यमानग्रहणं[1] अपार्थकम् । इदमपि[2] वक्तव्यम् । इतरथा हि प्रयाणे यानमेव नित्यं स्यात् । तत्र यानं नाम चक्रीवच्छकटादिकं[3] उच्यते[4] । उपपद्यमाने याने[5] अनेन मन्त्रेणारोहयेत् । असति यानेऽन्यत्रायं मन्त्रो[6] न भवति । अन्येनापि नयनं भवतीत्येतच्च ज्ञापितं भवति ॥

[1] A. L. उपपद्यमानाग्रहणं.

[2] A. L. इदकमपि.

[3] A. चक्रवशाछोदिष्कं.

[4] A. वियतेन. L. विद्युतेन.

[5] L. repeats याने.

[6] A. त्रोमं.

विवाहहोमानन्तरं स्वगृहं गन्तव्यम् । तत्र यदि ग्रामान्तरे गृहं स्यात् तथा सति तत्र प्रयाणे यदि यानमुपपद्यते तथा सत्युपपद्यमाने याने यानमारोहयेत् वधूं मन्त्रेण । तेन प्रयाणे यानस्यानियमः । यानादन्येन शिबिकादिना प्रयाणे च न भवति मन्त्रः । स्वग्रामविवाहपक्षे स्वगृहगमने नायं विधिः ॥ (१)

अश्मन्वतीरीयते संरभध्वं इत्यर्द्धर्चेन नावमारोहयेत् ॥

अर्धर्चग्रहणं ऋङ्निवृत्त्यर्थम् ॥

यद्यन्तरा नाव्या नदी स्यात तदानेनार्द्धर्चेन नावमारोहयेत् । वधूमिति शेषः ॥ (२)

उत्तरेणोत्क्रमयेत् ॥

उत्तरेणार्धर्चेन उत्क्रमयेत् । तत्र चोत्क्रमयेत्[1] उत्तारयेद्वा[2] ॥

उत्तरेणार्द्धर्चेन अत्राजगाम इत्यर्द्धर्चेन वधूमुदकादुत्तारयेत ॥ (३)

जीवं रुदन्तीति रुदत्याम् ॥

जपेत् ॥

नीयमाना वधूः यदि रोदिति बन्धुवियोगात् तदा एतां जपेत् । अयं विधिः स्वग्रामेऽपि भवत्यविशेषात् ॥ (४)

विवाहाग्निमग्रतोऽजस्रं नयन्ति ॥

[1] A. तचोत्क्रमयेत्. L. तत्रोत्क्रमयेत्.

[2] A. उन्मरयेत् द्वा. L. उत्तारयेत् (वा omitted).

विवाहाग्निग्रहणं अन्यस्याग्नेर्नयनं माभूदिति । अजस्रग्रहणं किमर्थम् । प्रत्यक्षनयनार्थम् । ननु[1] अग्निशब्दादेवायमर्थः सिद्धः । एवं[2] सिद्धे यदजस्रग्रहणं[3] करोति तज्ज्ञापयति अरणिमत्त्वं[4] माभूदिति । अविधानादरण्योः । कुतः प्रसङ्गः । अत एवाजस्रग्रहणं क्रियते अरणिमानयं भवतीति । तथा सत्यप्रत्यक्षस्य नयनं स्यात् । तन्मा भूत् इति कृत्वा यत्नः क्रियते । अरण्योश्च शास्त्रान्तरे दृष्टत्वात् । पुंसवनाद्येकेषां जातकर्माद्यपरेषाम् । उक्तं च प्राक्—शास्त्रान्तरदृष्टानामप्रतिषिद्धानां विधीनामिह प्रामाण्यम्—इति । अतः अरण्योरध्यवसायनं स्यादीदृग्यत्नात् । तेनैवं ब्रुवता एकस्मिन्नेवाग्नौ सर्वाणि कर्माणि भवन्तीति यदुक्तं प्राक् तत् सिद्धम् ॥

विवाहाग्निग्रहणं अग्निविशेषनियमाभावशङ्कानिवृत्त्यर्थम् । अजस्रग्रहणं ध्रियमाणस्य नयनार्थम् । तेनान्यत्र प्रयाणे समारोपणं कृत्वा नयनं गम्यते । अयञ्च विधिः स्वग्रामेऽपि भवत्यविशेषात् ॥ (५)

कल्याणेषु देशवृक्षचतुष्पथेषु मा विदन् परिपन्थिनः इति जपेत् ॥

तत्र कल्याणा इति शोभनाः प्रशस्ताः प्रकाशादित्यर्थः । तेषु कल्याणेषु देशादिषु एषा ऋग्भवति । नन्वन्येषामियं[5] ऋक्[6] भये[7] दृष्टा । इह भयं नोपपद्यते । नेत्युच्यते । इहापि भयमस्ति । कथम् ।

[1] L. नयनं तु.
[2] A. स व.
[3] A. यदस्रग्रहणं.
[4] A. अरणीमानयं.
[5] L. तत्रन्येतन्येषां नियम.
[6] A. ऋ L. omits ऋक्.
[7] L. उभये.

एतेषु देशेषु[1] कल्याणेषु गन्धर्वाप्सरसः सन्ति[2]। न तयोः दम्पत्योः लभ्यन्ते[3]। तेन तयोरपीदं भयस्थानं[4] भवति। तस्मादत्रापि भये एवैषा[5] ऋक्[6] प्रयुज्यते[7] ॥

कल्याणेषु विवाहादिशोभनेषु देशवृक्षचतुष्पथेषु एतां जपेत् ॥ (६)

वासे वासे सुमङ्गलीरियं वधूः इतीक्षकानीक्षेत ॥

वासे वासे इति वसतौ वसतौ इत्यर्थः। ये ईक्षका भवन्ति तान्[8] अनेन मन्त्रेणे ईक्षेत[9] सुमङ्गलीरिति[10]। तत्र वासे[11] इति नियमार्थमारभ्यते। कः पुनर्नियमः। कथं वासे वासे एवेक्षणं स्यादिति। अन्यत्र ये ईक्षकाः तेषामीक्षणं मा भूदिति ॥

वसतौ वसतौ ईक्षकाः सन्ति चेत् तानेतया ईक्षेत। वासादन्यत्रेक्षणे न मन्त्रः। वीप्सावचनं प्रतिवसतौ मन्त्रप्राप्त्यर्थम् ॥ (७)

इह प्रियं प्रजया ते समृध्यतामिति गृहं प्रवेशयेत् ॥

[1] L. omits देदेषु.

[2] A. सन्तिति.

[3] L. लुभ्यन्ति. A. लभ्यन्ति.

[4] L. omits भय.

[5] A. L. एवैता.

[6] L. ऋच:

[7] L. प्रयुज्यन्ते.

[8] तान् not in the MSS.; inserted by me.

[9] A. L. ईक्षते.

[10] A. सुमंगलीरितिति.

[11] L. वासो.

इह प्रियमित्यनेन मन्त्रेण गृहं प्रवेशयेदिति[1] ॥

अनया वधूं गृहं प्रवेशयेत् । इदमादयो विधयः स्वग्रामेऽपि विवाहे भवन्ति ॥ (८)

विवाहाग्निमुपसमाधाय पश्चादस्यानडुहं चर्मास्तीर्य प्राग्ग्रीवमुत्तरलोम तस्मिन् उपविष्टायां समन्वारब्धायां आ नः प्रजां जनयतु प्रजापतिः इति चतसृभिः प्रत्यृचं हुत्वा समञ्जन्तु विश्वेदेवाः इति दध्नः प्राश्य प्रतिप्रयच्छेदाज्यशेषेण वानक्ति हृदये ॥

तत्र विवाहाग्निग्रहणं न कर्तव्यम् । कस्मात् । अधिकृतत्वात् । अत एव कर्तव्यम् । नयने अधिकृतत्वात्[2] । होमे यः कश्चनाग्निः प्रसज्येत स मा प्रसाङ्क्षीदिति[3] विवाहाग्निग्रहणं क्रियते । उपसमाधायेति न वक्तव्यं सिद्धत्वात् । तत्र क्रियते चर्मास्तरणकालोपदेशार्थम्[4] । अथवा एककर्त्रर्थम् । तेन किं सिद्धं भवति । अन्यत्रान्योऽप्युपसमाधानं करोति[5] । न विवाहे उपसमाधानं अन्यः करोतीति । पश्चादित्यग्नेर्देशः । प्रत्यगित्यर्थः । अस्याग्नेः । आनडुहं इति[6] चर्मविशेषणं क्रियते । प्राक् चास्य ग्रीवा भवति । ऊर्ध्वं लोमानि च[7] भवन्ति । तस्मिन् उपविष्टायामिति[8] । तस्मिन्निति न

[1] A. प्रवेशयति.

[2] A. नयनेयधिकृतत्वात्. Between य and धि there is a curved stroke which looks like a half त.

[3] A., L. समाप्यसाकांक्षादिति.

[4] A. चर्मास्तरणं कालोपदेशार्थम् .

[5] A. करोतिति.

[6] A. आनडुहमिमिति.

[7] L. च omitted.

[8] A. उपविष्टायति.

वक्तव्यम् । अधिकृतत्वात् । तस्मिन्निति यदि नोच्यते न चात्रोपवेशनं स्यात् । तस्माद्वक्तव्यम् । समन्वारब्धायाम्[1] । समन्वारब्धवत्यामित्यर्थः । आ नः प्रजां जनयतु प्रजापतिः[2] इति चतसृभिः ऋग्भिः । प्रत्यृचं होमो भवति । तत्र प्रत्यृचग्रहणमपार्थकम् । यथा धाता ददातु इत्यत्र प्रत्यृचं होमो भवति असति प्रत्यृचग्रहणे एवमिहापि भविष्यति । तस्मात् प्रत्यृचग्रहणं न भवति । उच्यते । कर्तव्यम्[3] । इह एते होममन्त्राः कर्मकरणाः । कर्मकरणत्वात् स्वाहाकारान्तता इति । यत्र प्रत्यृचग्रहणं नास्ति तत्र च स्वाहाकारान्ते होमः कर्तव्यः । तेन कचिदुद्देशेन होमः स्यादिति नैवास्ते । तत्र तु वचनम् । तत्परीक्षा क्रियये[4] । समञ्जन्तु विश्वे देवा[5] इति दध्नः प्राश्य प्रतिप्रयच्छेत्[6] । तत्र संशयः । किमयं प्राशनमन्त्रः । आहोस्वित्प्रयच्छनमन्त्र इति । उच्यते । उभयार्थः । यद्युभयार्थः अभ्यासः[7] प्राप्नोति । उच्यते । न भवत्यभ्यासः । कस्मात् । उभयलिङ्गत्वात्[8] मन्त्रस्य । यथा द्वयोरभिमर्शनमन्त्रः[9] सकृदेव प्रयुक्तः सन्नुभयार्थो भवति तद्वद्यमपीति । स्वयं प्राश्य पश्चात् प्राशनार्थं तस्याः प्रयच्छति । आज्यशेषेण वानक्ति हृदये । अथवाज्यशेषेण हृदये अनक्ति । न पूर्वं करोति । द्वे हृदये अनक्ति । आत्मनश्च तस्याश्च । अनेनैव मन्त्रेण । अपरे आज्यशेषेण वानक्ति हृदये इति वाशब्दं चार्थे[10] वर्णयन्ति ॥

[1] L. समन्वारब्धायामिति.

[2] L. जनयतु प्रजापतिः omitted.

[3] A., L. have न before this word.

[4] L. has here श्रीलक्ष्मीनारायणार्पणमस्तु.

[5] L. omits विश्वे देवाः

[6] A. has only समञ्जतु प्रयच्छेत्.

[7] A. अ not at all legible. Looks more like ज्य.

[8] L. has तु before this word.

[9] A. यथा भार्ययोरभिमर्शनमन्त्रः L. यथाहार्ययोरभिमर्शनमन्त्रः

[10] A., L. have अथवाशब्दः चार्थो.

अग्निप्रणयनान्तं कृत्वाग्निमुपसमादधाति । समिधः प्रक्षिप्य प्रज्वलयतीत्यर्थः । ततः पश्चादस्यानडुहं चर्मास्तृणाति । प्राग्ग्रीवमुत्तरलोम ऊर्द्ध्वलोम । ततोऽन्वाधानाद्याज्यस्य बर्हिषि सादनान्तं कृत्वा तस्मिन् चर्मण्युपविष्टायां समन्वारब्धायां वध्वां इध्माधानाद्याज्यभागान्तं कृत्वा आ नः प्रजां इति चतसृभिः प्रत्यृचं हुत्वा ततः समञ्जन्तु इत्यृचा दध्न एकदेशं स्वयं प्राश्य वध्वे प्राशनार्थं शिष्टं दधि प्रयच्छेत् । सा तु तूष्णीं प्राश्नाति । सकृत् प्रयुक्तस्य मन्त्रस्य उभयप्राशनार्थत्वात् । उभयार्थत्वं नौ इति द्विवचनात् । आज्यशेषेण वा उभयोर्हृदये अनक्ति तेनैव मन्त्रेण । हृदये अत ऊर्ध्वं इति विवृत्या पाठः कार्यः प्रगृह्यत्वात् । ततः स्विष्टकृदादि समापयेत् । विवाहाग्निग्रहणं अन्यनिवृत्त्यर्थम् । कथं पुनरन्याग्निप्राप्तिशङ्का । 'गृह्याणि वक्ष्यामः' (१ । १ । १) इति प्रतिज्ञातम् । उच्यते । दायविभागकाले अग्निः परिगृह्यते चेत् अत्राप्यन्योऽग्निः प्रसज्येत । तन्निवृत्त्यर्थमिदम् । अपिचात्र विवाहाग्निग्रहणात् न विवाहहोममात्रेण अग्नेर्गृह्यत्वसिद्धिः । किन्तर्हि । गृहप्रवेशनीयहोमे कृते । एवमुभाभ्यां होमाभ्यां गृह्यत्वसिद्धिः । नैकेन इति ज्ञायते । तेन गृहप्रवेशनीयहोमादर्वाक् दर्शपूर्णमासप्राप्तौ पार्वणस्थालीपाको न कार्यः । परिचरणहोमस्तु कार्य एव । 'पाणिग्रहणादि' (१ । ८ । १) इति वचनात् । वैश्वदेवं च कार्यमेव । तस्याग्निविशेषविध्यभावात् । तेनाग्निनाशे होमद्वयं कार्यमिति सिद्धम् । उपसमाधायेति आस्तरणकालोपदेशार्थम् । अथवा समानकर्तृकत्वसिद्ध्यर्थम् । तेन यत्रोपसमाधानग्रहणं नास्ति तत्रान्यो वोपसमाधानं कुर्यात् । तस्मिन्निति वचनं चर्मस्तरणानन्तरं तन्त्रान्तरमिति ज्ञापनार्थम् । प्रत्यृचग्रहणं कथं ऋगन्ते होमः स्यात् । न स्वाहाकारान्ते इत्येवमर्थम् । स्वाहाकारं पठन् जुहुयादित्यर्थः । तेन यत्र प्रत्यृचग्रहणं नास्ति तत्र स्वाहाकारं कृत्वा पश्चात् होमः । आज्यशेषेण वेति सिद्धवदुपदेशात् अनादेशे आज्येन होम इति गम्यते ॥ (९)

अत ऊर्ध्वमक्षारालवणाशिनौ[1] ब्रह्मचारिणावलंकुर्वाणावधःशायिनौ स्याताम् ॥

[1] अत ऊर्ध्वं is not in the Bibliotheca Indica edtion.

अत ऊर्ध्वं इति। अत इत्यनेन किं निर्दिश्यते। गृहप्रवेशनीयः। तस्य[1] प्रकृतत्वात्। तेन प्रवेशनीयादूर्ध्वमनयोर्व्रतचर्या भवति। यद्येवं दोषः। को दोषः। प्राग्गृहप्रवेशनादेतानि व्रतानि न[2] प्राप्नुवन्ति। इष्यते च। तस्मान्नायमर्थः। एवं तर्हि अतःशब्देन विवाहो निर्दिश्यते। ननु च व्यवधानाद्गृहप्रवेशनेन तस्य निर्देशो नोपपद्यते। नेत्युच्यते[3]। विवाह एव प्राधान्येन प्रकृतः। गृहप्रवेशनीयः प्रसंगोक्तः। तस्माद्विवाह एव निर्दिश्यते अत इति। तेन विवाहादूर्ध्वमनयोः व्रतचर्या भवति। एवमपि दोषः। प्रागपि गृहप्रवेशनीयात् व्रतसमाप्तिः प्राप्नोति। न चेष्यते। तस्मादेष दोषः। एवमुभयथापि दोषः। एवं तर्ह्यन्यथा सूत्रविन्यासं करिष्यामः। अक्षारलवणाशिनौ[4] ब्रह्मचारिणावधःशायिनौ स्याताम्। तेनेमानि विवाहप्रभृतीनि विधीयन्ते ॥

विवाहादारभ्य एते नियमा भवन्त्युभयोः।

हैडिम्बिका राजमाषा माषा मुद्गा मसूरिकाः।
लङ्कयाढक्याश्च निष्पावास्तिलाद्याः क्षारसंज्ञिताः॥

गृहप्रवेशीयहोमात् प्रागपि नियमानामिष्टत्वात् योगविभागः कृतः॥ (१०)

उत्तरावधिमाह।

अत ऊर्ध्वं त्रिरात्रं द्वादशरात्रम् ॥

तेन अतःशब्देन गृहप्रवेशनीयो गृह्यते। तेन गृहप्रवेशनीयादूर्ध्वं[5]

[1] A. L. गृहप्रवेशनीयस्य.

[2] A. omits न.

[3] L. omits नेत्युच्यते.

[4] L. अक्षारलवणाशिनाविति and omits all up to स्याताम्.

[5] L. गृहप्रवेशादूर्ध्वम्.

कालनियमो भवति[1] । प्राक् च अनियतः कालः । एवमादिष्टोऽर्थः सिद्धो भवति[2] ॥

अतो गृहप्रवेशनीयहोमादूर्ध्वं त्रिरात्रं द्वादशरात्रं वा नियतौ स्याताम् ॥ (११)

संवत्सरं वैक ऋषिर्जायत इति ॥

संवत्सरमेके व्रतमिच्छन्ति । कस्मात् । एवं नियमसंयुक्तस्य ऋषिकल्पः किल पुत्रो जायत इति ॥

संवत्सरं वा नियतौ स्यातां एक ऋषिकल्पः पुत्रो जायत इति कृत्वा । अन्ये त्वाहुः । व्रतान्ते एक ऋषिः सम्पद्यते । पितृगोत्रं विहाय पतिगोत्रं भजते इत्यर्थः ॥ (१२)

चरितव्रतः सूर्याविदे वधूवस्त्रं दद्यात् ॥

चरितव्रतः समाप्तव्रत इत्यर्थः । सूर्याविदे । सूर्यया[3] दृष्टो मन्त्रः सूर्यैव भवति । यथा[4] वृषाकपिरिति । तं मन्त्रं यो वेत्ति स भवति सूर्यावित् । तस्मै सूर्याविदे वधूवस्त्रं दद्यात् । कथं पुनरसौ वेदितव्यः । स्वरैर्वर्णैः इत्येवमादिभिः लक्षणैः । तच्च कतमस्य पुनर्वाससः दानमुपदिशति । यद्वासः विवाहकाले[5] आसीत् तस्येदं दानमुपदिष्टं द्रष्टव्यम्[6] ॥

[1] L. कालनियमोऽयं प्राप्नोति.

[2] After कालनियमो भवति, A. has यतः काल एवेष्टोऽर्थः सिद्धो भवति ; L. has अतः काल एवेष्टोऽर्थः सिद्धो भवति.

[3] L. सूर्याया.

[4] L. तथा.

[5] A., L. यद्वासव्यवधापकाले.

[6] K. दानमुपदिष्टद्रव्यं. Both A. and L. have कृत्यं after this.

व्रतानन्तरं सूर्याविदे वध्वा उपयमनकाले उपहितं वस्त्रं दद्यात्। सूर्यया दृष्टो मन्त्रः सूर्या। यथा वृषाकपिरिति। सा च सत्येनोत्तभिता इति सूक्तम्। कथं तत् पुनरसौ वेत्ति। स्वरतो वर्णत इत्यादि ॥ (१३)

अन्नं ब्राह्मणेभ्यः ॥

अन्नं ब्राह्मणेभ्यो दद्यात् ॥

दद्यादिति शेषः ॥ (१४)

अथ स्वस्त्ययनं वाचयीत ॥

अथानन्तरं स्वस्त्ययनवाचनं[1] स्वस्तिरिति ॥

ओं स्वस्ति भवन्तो ब्रुवन्ति इति। ते च ओं स्वस्तीति प्रत्यूचुः ॥ (१५)

इति प्रथमे अष्टमी खण्डिका

पाणिग्रहणादि गृह्यं परिचरेत् स्वयं पत्न्यपि वा पुत्रः कुमार्यन्तेवासी वा ॥

पाणिग्रहणमादिर्यस्य तदिदं पाणिग्रहणादि विधानम्। किं पुनस्तत्परिचरणं पाणिग्रहणाद्वेदितव्यम्। तत्र पाणिग्रहणादिग्रहणं न कर्तव्यम्।

[1] A. स्वस्त्ययनं वाचनं.

अधिकृतत्वात् । नेत्युच्यते । गृहप्रवेशनीयोऽधिकृतः । तेन गृहप्रवेशनीयादूर्ध्वं गृह्यपरिचर्या स्यात् । अतः पाणिग्रहणादिग्रहणं[1] क्रियते । ये पुनः पाणिग्रहणमधिकृतं मन्यन्ते तेषां किं प्रयोजनम् । कथमव्यवच्छिन्नं परिचरणं[2] स्यादित्यतो वचनमारभ्यते । कथं पुनर्व्यवच्छेदः स्यात् । उपदेशादेव । नेत्युच्यते । यावन्नोपशाम्येत[3] गृह्योऽग्निस्तावत्परिचरणं स्यात् गृह्यभावात् । कथमुपशान्तेऽप्यन्यमग्निमाहृत्य[4] होमकार्ये आहरणप्रायश्चित्तं कृत्वा परिचरणं स्यात् इति अतो वचनमारभ्यते । तत्र गृहसंप्रयोगादयं गृह्य इत्येषा संज्ञा भवति । तत्र किं परिचरणं यदिदं[5] कर्मोत्तरं[6] विधास्यते । एतत्परिचरणं सहोमकमेके मन्यन्ते । अन्ये[7] पुनर्लौकिकमेवेच्छन्ति । कस्मात् । मन्त्रविरोधात् । न हि कन्याया मन्त्रेऽधिकारो भवति पत्न्याश्च । नेत्युच्यते । अनयोरपि मन्त्रो भवति । यथा पत्नीवाचनादि पत्न्या भवति तद्वदिहापीति । तस्माद्द्वयोरपि मन्त्रः सिद्धः । स्वयंग्रहणमुत्तरविवक्षायाम् । अथ अपरे । पाणिग्रहणादिप्रयोजनं परिचरणस्य कालविध्यर्थम्[8] । गृह्यस्यैव यदा पाणिग्रहणं तदाद्येव[9] गृह्यस्य परिचरणं न प्राक् । कथं पुनः प्राक् स्यात् । गृह्यं परिचरेदित्यविशेषेणाभिधानात् । तस्मादिदं वचनम् । तेनैवं[10]

[1] A. L. पाणिग्रहणं.

[2] A. कथमव्यवच्छिन्नत्वं परिचणं.

[3] A. यावन्नोमपशोम्येत.

[4] L. कथमुपशम्यति.

[5] L. omits यदिदं.

[6] L. परिचयोत्तरं.

[7] A. L. सहोमकमन्ये.

[8] L. कालविधानार्थम्.

[9] L. तदाद्येच.

[10] L. तेनैव.

ब्रुवता तेनैवाग्निः उत्पन्न[1] इत्येतत्साधितं भवति । साधारण्यं[2] धारिण्याः कर्मव्यतिरिक्ते काल इति । पत्नी वा[3] परिचरेत् । अथवा पुत्रादयः परिचर्यां कुर्वन्ति । तत्रान्तेवासीति शिष्य[4] उच्यते ॥

पाणिग्रहणप्रभृति गृह्यमग्निं परिचरेत् स्वयं पत्न्यादयो वा । पाणिग्रहणादिवचनं गृहप्रवेशनीयहोमानन्तरकाले प्रारम्भशङ्कानिवृत्त्यर्थम् । यद्विधास्यते तत्परिचरणम् । पत्नीकुमार्यौ न होमकर्म कुर्यातामित्येके । कुतः । स्त्रीणां मन्त्रानधिकारात् । अन्ये तु सहोमकम् । कुतः । वचनात् पत्नीसन्नहनवत् । अन्तेवासी शिष्यः ॥ (१)

नित्यानुगृहीतं स्यात् ॥

नित्यं परिगृहीतः[5] स्यादित्यर्थः । यावज्जीवमग्नेः संधारणमित्येतत्प्रदर्शयति[6] । अयमस्य मुख्योऽर्थः । कथं पुनरेतत् ज्ञायते । अनुगमने प्रायश्चित्तोपदेशात् । धारणं च विहितम् । एतत्सिद्धं भवति एतावता । असंमुख्यमाना[7] बहुधा कल्पयन्ति । कथम् । यदि धारणमेवात्र विवक्षितं[8] स्यात् नित्यः स्यादिति सिद्धमेतावता । अनुगृहीतवचनं किमर्थम् । एवमतिरिच्यमाना अनुगृहीतवचनं ब्रुवते । नित्यं[9] अनुगृहीतश्च नित्यानु-

[1] L. तेनैवाग्निमुत्पन्न.
[2] A. साधारणं.
[3] A. L. पत्नीं वा.
[4] A. L. विशेष for शिष्य.
[5] A. L. have no परि.
[6] A. यावदिषेसेधारणमित्येतत्प्रादर्शयति. L. यावज्जीवादिसंधारणमित्यतप्रदर्शयति.
[7] A. L. असंमुख्यमाणा.
[8] A. L. विवक्षितः
[9] L. omits नित्यं.

